In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी षष्ठ्यब्दग्रन्थमाला (iii) - 08

श्रीकृष्णकविप्रणीतम्

॥ रामेश्वरविजयचम्पूप्रबन्धः ॥

(राजवंशरत्नावलीसहितः)

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः परियोजना – अनुसन्धाता च

आचार्यः के. नीलकण्ठः

निदेशकः

सम्पादिका

डॉ. के. वरलक्ष्मीः

सहाचार्या (संशोधनम्), उपनिदेशिका

सहायकः

डॉ. के वि सूर्यप्रकाशः

सहायकाचार्यः (संशोधनम्)

संस्कृत अकाडमी

(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शसंस्कृतशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07

2024

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी षष्ठ्यब्दग्रन्थमाला (iii) - 8
In Public domain. Digitization Muthulakshmi Research Academy

श्रीकृष्णकविप्रणीतः

॥ रामेश्वरविजयचम्पूप्रबन्धः ॥

(राजवंशरत्नावलीसहितः)

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः परियोजना – अनुसन्धाता च

आचार्यः के. नीलकण्ठः

निदेशकः

सम्पादिका

डा के वरलक्ष्मीः

सहाचार्या (संशोधनम्) ,उपनिदेशिका

सहायकः

डा. के वि सूर्यप्रकाशः

सहायकाचार्यः (संशोधनम्)

संस्कृत अकाडमी

(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शसंस्कृतशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07

2024

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Ṣaṣṭhyabda Granthamālā (iii)- 08

Rāmeśvavijayacampūprabandhaḥ

(Re-printing of rare book project)
This book is published with the financial support under Ashtadashi Scheme of **Central Sanskrit University, New Delhi**

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University,
Hyderabad – 500 007

Phone
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Page Setup
by
Joshi Bharadwaj

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Rāmeśvavijayacampū Prabandhaḥ

ISBN – 978-81-969575-0-6

© Sanskrit Academy

Year	:	2024
Pages	:	xxxiv+259
Copies	:	300
Price	:	₹ 450

Sanskrit Academy Ṣaṣṭhyabda Granthamālā (iii)- 08

In Public domain. Digitization Muthulakshmi Research Academy

Rāmeśvavijayacampūprabandhaḥ

Rājavaṃśaratnāvalī

by

Sri Krishna Kavi

(Published under 'Re-printing of rare books project', Ashtadashi scheme of Central Sanskrit University, New Delhi)

Chief-Editor & Project Investigator

Prof. K. Neelakantham

Director

Editor

Dr. K Varalakshmi

Associate Professor (Research)

Dy. Director

Assistance

Dr. K V Suryaprakash

Assistant Professor (Research)

Sanskrit Academy

Adarsha Sanskrit Shodha Sansthan

(Recognised by Central Sanskrit University, New Delhi)

Osmania University, Hyderabad – 500 007

2024

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Ṣaṣṭhyabda Granthamālā (iii)- 08

Rāmeśvavijayacampūprabandhaḥ

(Re-printing of rare book project)
This book is published with the financial support under Ashtadashi Scheme of **Central Sanskrit University, New Delhi**

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University Campus,
Hyderabad – 500 007

Phone
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Page Setup
by
Joshi Bharadwaj

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Rāmeśvavijayacampū Prabandhaḥ

ISBN – 978-81-969575-0-6

© Sanskrit Academy

Year	:	2024
Pages	:	xxxiv+259
Copies	:	300
Price	:	₹450

In Public domain. Digitization Muthulakshmi Research Academy

Foreword

ओम् श्री गुरुभ्यो नमः

॥ श्री शङ्करभगवत्पादाः विजयन्ते ॥

गिरि हस्ते धत्तां धरतु धरणिं वापि जलधौ
विधत्तां सेतुं वा हरिरपि विना यत्र कथनम्।
उदग्रां विख्यातिं जगति नलभेतैव सततं
नमस्तस्मै कुर्मस्सुकविकवितायै निरवधि।।

(रामेश्वरविजयचम्पूः I – 8)

"Kavya is that which touches the inmost cords of the human mind and defuses itself into crevices of heart, working up a lasting sense of delight. It is an expression in the beautiful form and melodious language of best thoughts and noblest emotions, which is the spectacle of life, awakening the finest souls"[1] said by Mammata in Kavyaprakasha. This Kavya is of two types Sravya and Drishya, literally audible and visible i.e. Poems and plays. The Sravya Kavya is again divided in to three Padya, Gadya and Champu. "The combination of poetry and prose is called Champu[2]" said by rhetoricians of Sanskrit. "This variety of composition enlarges the scope and ease of the poet's expression and entertains the reader by the presentation of combinative of varying

---

1 सकलप्रयोजनमौलिभूत-समनन्तरमेव रसास्वादनसमुद्भूतविगलितवेद्यान्तरमानन्दप्रभुसम्मित-शब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्सम्मितार्थतात्पर्यवत्पुराणादीतिहासेभ्यश्च शब्दार्थयोः गुणभावेन, रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत्काव्यं लोकोत्तरवर्णनानिपुणकविकर्म

2 गद्यपद्योभयमयं चम्पूरित्यभिधीयते

In Public domain. Digitization Muthulakshmi Research Academy

melodies" said by sharabhoji Raja[3] in his Kumara-sambhavachampu[4].

Since last four years, we have published the following Champukavyas from Sanskrit Academy.

1. Varadābhyudayacampū
2. Rāmakṛṣṇayudhiṣṭhiracaritacampū
3. Jagannāthacampū
4. Sri Veṅkaṭeśvaracampūprabandha
5. Yudhiṣṭhirāśvamedhacampū
6. Nalacampū (with Telugu Commentary)
7. Pranayavatīcampū
8. Raghunāthavijayacampū
9. Śrīnivāsavilāsacampū
10. Kārtikotsavadīpikā
11. Rājaratnamālācampū

---

3 अयं महोदयः मराठामहाराजा छत्रपति शिवाजिवंशीयः आसीत्। अयं राजा १७९८ तः १८३२ पर्यन्तं तञ्जावूर् संस्थाने शासनं कृतवान्। यथा विक्रमादित्यः भोजराजश्च कविपण्डितपोषकौ आस्ताम् अयं शरभोजिः तथेति ज्ञायते । शरभोजिमहोदयेन स्थापितं सरस्वतिमहल् इति ग्रन्थालयम् अद्यापि विराजते अनेन कव्यशास्त्रादिचतुस्सहस्त्राधिकाः ग्रन्थाः सङ्गहिताः। यथा भोजराजा रामकथासुधामधुरिति चम्पूप्रबन्धः विरचितवान् तथैवहं "कुमारसम्भवचम्पूप्रबन्धः" विरचितवानस्मीति स्वयमेवास्य काव्यारम्भे प्रकटितवान् शरभोजि महोदयः।

4 पद्यं हृद्यमपीह गद्यरहितं धत्ते न हृद्यास्पदं
गद्यं पद्यविवर्जितं च भजते नास्वादतां मानसे।
साहित्यं हि तयोर्द्वयोरपि सुधामाध्वीकयोर्योगवत्
सन्तोषं हृदयाम्बुजे वितनुते साहित्यविद्याविदाम्॥

(शरभोजिकृते कुमारसम्भवचम्पूकाव्ये 1-6)

In Public domain. Digitization Muthulakshmi Research Academy

Most of these Kavyas were published in Telugu script in the 19th century A D and hence could not come to the notice of the Sanskrit Scholars of other parts of Bharatadesha and other countries. And another important thing that all these were composed by the poets of Telangana state. Now we are bringing out one more champu Kavya Rāmeśvaravijayacampū authored by Śrīkṛṣṇakavi/Hosadurgam Krishnamacharya.

Sri Krishnakavi

According to the History, this Sri Krishnakavi, is said to have been lived between 1830-1919 and composed 100 above books on various Shastras, Kavyas, Stotras.[5] He took Sannyāsāsrama on the advice of his gurus and became famous as Srimatparamahamsa Parivrajakācharya Sri Krishna Brahmateertha Yateendra[6].

Rāmeśvaravijayacampū:

Srikrishnakavi composed this Rāmeśvaravijayacampū Kavya in twelve chapters which are titled as Ullasas. He has described the story of King Rameshwara of Vanaparti Samsthana in 525 verses and sixty (60) huge prose passages. His

---

5 The list of some of the books is given in the Sanskrit foreword.

6 The details of life history of this great poet of Telangana given in the two books **Raghunatha vijaya Champu and Srinivāsavilāsa champu** which are published by us form Sanskrit Academy.

In Public domain. Digitization Muthulakshmi Research Academy

melodies" said by sharabhoji Raja[3] in his Kumarasambhavachampu[4].

Since last four years, we have published the following Champukavyas from Sanskrit Academy.

1. Varadābhyudayacampū
2. Rāmakṛṣṇayudhiṣṭhiracaritacampū
3. Jagannāthacampū
4. Sri Veṅkaṭeśvaracampūprabandha
5. Yudhiṣṭhirāśvamedhacampū
6. Nalacampū (with Telugu Commentary)
7. Pranayavatīcampū
8. Raghunāthavijayacampū
9. Śrīnivāsavilāsacampū
10. Kārtikotsavadīpikā
11. Rājaratnamālācampū

---

[3] अयं महोदयः मराठामहाराजा छत्रपति शिवाजिवंशीयः आसीत्। अयं राजा १७९८ तः १८३२ पर्यन्तं तञ्जावूर् संस्थाने शासनं कृतवान्। यथा विक्रमादित्यः भोजराजश्च कविपण्डितपोषकौ आस्ताम् अयं शरभोजिः तथेति ज्ञायते । शरभोजिमहोदयेन स्थापितं सरस्वतिमहल् इति ग्रन्थालयम् अद्यापि विराजते अनेन कव्यशास्त्रादिचतुस्सहस्राधिकाः ग्रन्थाः सङ्गहिताः। यथा भोजराजा रामकथासुधामधुरिति चम्पूप्रबन्धः विरचितवान् तथैवहं "कुमारसम्भवचम्पूप्रबन्धः" विरचितवानस्मीति स्वयमेवास्य काव्यारम्भे प्रकटितवान् शरभोजि महोदयः।

[4] पद्यं हृद्यमपीह गद्यरहितं धत्ते न हृद्यास्पदं
गद्यं पद्यविवर्जितं च भजते नास्वादतां मानसे।
साहित्यं हि तयोर्द्वयोरपि सुधामाध्वीकयोर्योगवत्
सन्तोषं हृदयाम्बुजे वितनुते साहित्यविद्याविदाम्॥

(शरभोजिकृते कुमारसम्भवचम्पूकाव्ये 1-6)

In Public domain. Digitization Muthulakshmi Research Academy

Most of these Kavyas were published in Telugu script in the 19th century A D and hence could not come to the notice of the Sanskrit Scholars of other parts of Bharatadesha and other countries. And another important thing that all these were composed by the poets of Telangana state. Now we are bringing out one more champu Kavya Rāmeśvaravijayacampū authored by Śrīkṛṣṇakavi/Hosadurgam Krishnamacharya.

Sri Krishnakavi

According to the History, this Sri Krishnakavi, is said to have been lived between 1830-1919 and composed 100 above books on various Shastras, Kavyas, Stotras.[5] He took Sannyāsāsrama on the advice of his gurus and became famous as Srimatparamahamsa Parivrajakācharya Sri Krishna Brahmateertha Yateendra[6].

Rāmeśvaravijayacampū:

Srikrishnakavi composed this Rāmeśvaravijayacampū Kavya in twelve chapters which are titled as Ullasas. He has described the story of King Rameshwara of Vanaparti Samsthana in 525 verses and sixty (60) huge prose passages. His

---

5 The list of some of the books is given in the Sanskrit foreword.

6 The details of life history of this great poet of Telangana given in the two books **Raghunatha vijaya Champu and Srinivāsavilāsa champu** which are published by us form Sanskrit Academy.

In Public domain. Digitization Muthulakshmi Research Academy

style is elegant and attractive. The slokas are very much charming in this Kavya and are composed gracefully in Vaidarbhi riti which delights Sahridyas. He followed strictly the definition of Gadya अपादः पदसन्तानो गद्यम्, गद्यं कवीनां निकषं वदन्ति and took the style of Bana mahakavi while composing the prose passages. He used very rare meters (vrittas) like Narkutakam and has fascinating alankaras in this Kavya.

Raja Rameshwara Rao was the ruler of Wanaparthi Samsthan, he said to have been lived between 1820 to 1866. It is said he was the army general of Nizam rulers and he was greatly honored by them. Sri Krishna Kavi composed this beautiful champukavya on the request[7] of Smt Shankaramaba the wife of Raja Rameshwara Rao. He described the lineage of Rameshwara in the beginning of the Kavya and then went on narrating all the important events in the life of Rameshwara Rao.

Gratitude:

I appreciate the hard-working style of Dr K. Varalakshmi, Associate Professor Research & Deputy Director of the academy. She made thorough research on the life of Krishnakavi and king Rameshwara of this **Rāmeśvaravijayacampū**

---

7 श्रीमदुत्तररङ्गेद्रकरुणासमेधिथस्य अस्मद्राजशेखरमणेः चरित्रम् अतिविचित्रं यथावदादितो ललिततरैः पदैरभिवर्णयन् आनन्दय चम्पूप्रबन्धेन तूर्णमस्मानिति दत्तानुज्ञः ।

(रामेश्वरविजयचम्पू पुटसंख्या – 6)

In Public domain. Digitization Muthulakshmi Research Academy

and prepared a very detailed foreword that could be useful for further research on the contributions of Sanskrit poets in Telangana. She studied almost all books that were written on the history of Samsthanams in Telangana. I congratulate Dr K. Varalakshmi and wish her to bring some more critical studies based on the rare Sanskrit works.

I thank another Associate Professor Research & Deputy Director Dr V. Subrahmanyam who is on deputation in Pune's Vaidika Samshodhana mandali for his continuous help in the publication of Academy and congratulations to Dr. K. V. Suryaprakash Assistant Professor Research and assistant in the project of reprinting of rare books. My thanks to Dr Joshi Santosh Kumar Assistant Professor Research in the academy. I bless my young and sincere research scholar Mr Joshi Bharadwaj who made this book ready for publication.

My sincere thanks to Prof. Srinivasa Varkhedi Honorable Vice Chancellor and Prof. Gayatri Muralikrishna Registrar Central Sanskrit University, New Delhi for their encouragement and for sanctioning such projects to Sanskrit Academy. My thanks to our Hon'ble Chairman Prof. D. Ravinder V. C. and Prof. P. Lakshminarayana Registrar of Osmania University for their amicable support for the development of Sanskrit Academy. I thank Prof. Madhukeshwar Bhat Director, Aadharsh Institutions in CSU Delhi.

In Public domain. Digitization Muthulakshmi Research Academy

I thank Karshak Art Printers Vidyanagar, Hyderabad for printing this book on time.

सुधीजनविधेयः

Prof. K. Neelakantham
Director

In Public domain. Digitization Muthulakshmi Research Academy

उपोद्धातः

वनपर्त्तिसंस्थानम्

तेलङ्गाणाराज्यस्य प्रसिद्धेषु चतुर्दशसंस्थानेषु प्रमुखं स्थानं भजति वनपर्त्तिसंस्थानम्। संस्थानमिदं महबूबनगरजनपदेऽन्तर्भवति। 124 सङ्ख्याकाः ग्रामाः अस्मिन् संस्थाने आसन्। वनपर्तिसंस्थानस्य सारस्वतसेवा निरुपमेति विमर्शकैः प्रशंसिता।

अधः ते ग्रन्थाः उल्लिखिताः येषु रामेश्वरविजयचम्पूकाव्यसम्बद्धाः चारित्रिकांशाः उपलभ्यन्ते येभ्यश्च काव्यातिरिक्तांशाः सङ्कलिताः।

1. तूमाटिदोणप्पविरिचतम् आन्ध्रसंस्थानमुलु साहित्यपोषणम्

2. श्रीकेशवपन्तुलनरसिंहशास्त्रिविरचितं संस्थानमुल साहित्यसेवा

3. श्रीकृष्णदेवरायान्ध्रभाषानिलयमु (हैदराबाद) रजतोत्सवसञ्चिकायां (क्रि.श. 1927) श्रीसुरवरं प्रतापरेड्डिवर्येण विरचितः लेखः *निजामुराष्ट्रमुलोनि आन्ध्रसंस्थानमुल चरित्र*

4. राजा रामेश्वररायस्य (1) प्रार्थनया तदास्थानकविना नेमलूरिवेङ्कटशास्त्रिणा तेलुगुभाषया विरचितं *वनपर्त्तिसंस्थानचरित्र* इति असम्पूर्णं पद्यकाव्यम् । सवै वेङ्कटरेड्डि (4) राजोदन्तपर्यन्तमेव वनपर्त्तिराज्ञां वर्णनमुपलभ्यते।

5. आचार्य तङ्गिराल वेङ्कटसुब्बारावविरचितं तेलुगुजानपदगाथाकवित्वम् इति सिद्धान्तग्रन्थः

6. पि. कोटेश्वरम्मविरचितं लघुवीरगाथल्लो स्त्री विलुवलु

7. Telangana Land and People from 1724-1858 CE vol. 3

8. The Magnificent Diwan – The Life and Times of Sir Salar Jung I

In Public domain. Digitization Muthulakshmi Research Academy

9. होसदुर्गं कृष्णमाचार्यविरचिता राजवंशरत्नावलिः वनपर्त्तिसंस्थानस्य राज्ञां वंशवृक्षं चारित्रिकांशान् कांश्चन वर्णयति। वंशमूलपुरुषादारभ्य द्वितीयरामेश्वररायपर्यन्तं वर्णितमस्ति।

चतुरधिकाशीत्युत्तरनवशतकाधिकचतुस्सहस्रमिते।
कलिवर्षगणेयातेग्रथितेयंराजवंशरत्नावली।।रा.र.श्लो.55

वर्णनस्यास्य आधारेण कृष्णकविरिमां कृतिं क्रि.श. 1883-84 वर्षे चकारेति ज्ञायते।

रामेश्वरविजयचम्पूः

ऐतिकासिककाव्यस्यास्य प्रथमे उल्लासे रामकृष्णरायस्य (I) वृत्तं वर्णितमस्ति। द्वादशोल्लासेषु दश उल्लासाः रामेश्वररायस्य (I) बाल्यं यौवनं शौर्यपराक्रमपूर्णकृत्यं भाग्यनगरे सैनापत्यम् इत्यादीनि प्रमुखानि वृत्तानि वर्णितानि। कुमाराभ्युदयाख्ये द्वादशे उल्लासे द्वितीयरामकृष्णरायस्य (II) वृत्तम् अभिवर्णतमस्ति। सर्वाणीमानि तेलङ्गाणाराज्यैतिहासिकसम्बद्धानीत्यतः प्रामुख्यं भजतीदम् ऐतिहासिकं काव्यम्।

कृतिकर्त्ता – होसदुर्गं कृष्णमाचार्यः
जीवनकालः -खिस्ताब्दः 1840 – 1915
जननम् – शा.श.1761 विकारि ज्येष्ठकृष्णपञ्चमी (खिस्ताब्दः 1840)
मरणम् – शा.श. 1836 आनन्दकार्तीकबहुलपञ्चमी (खिस्ताब्दः 1915)
परकालपीठाधिपत्यम् – खिस्ताब्दः 1885-1915

होसदुर्गं कृष्णकविः वनपर्त्तिसंस्थाने धर्माधिकारी आसीत्। गृहस्थाश्रमे होसदुर्गं कृष्णमाचार्यः इति प्रथितोऽयं कविः अनन्तरं सन्न्यस्य श्रीश्रीश्रीकृष्णब्रह्मतन्त्रपरकालयतीन्द्रमहादेशिक इति विश्रुत अभूत्। परश्शत-ग्रन्थकर्ताऽयं कृष्णकविः रघुनाथविजयचम्पूप्रबन्धे श्रीनिवासविलासचम्पूप्रबन्धे स्ववंशचरित्रमधिकृत्य नैकान् विशेषान् वर्णयामास। संस्कृत अकाडम्या मुद्रितानाम् एतेषां पुस्तकानां पीठिकासु कृष्णकवेः जीवनस्य रचनानाञ्च

In Public domain. Digitization Muthulakshmi Research Academy

विशेषाः विपुलतया वर्णिताः। पुनरावृत्तिर्माभूदिति धिया अत्र ते विषयाः नोल्लिख्यन्ते।

कृतिभर्त्री – शङ्कराम्बा

रामेश्वररायस्य (1) धर्मपत्नी राज्ञी शङ्कराम्बा होसदुर्गं कृष्णमाचार्यं स्वपत्युः लोकोत्तरचरित्रं वर्णयत्विति प्रार्थयत्। तदनुसृत्य कृष्णमाचार्यः रामेश्वरविजयचम्पूप्रबन्धं द्वादशोल्लासान्वितम् अरचयत्। काव्यारम्भे इमान् विशेषान् कविः प्रकटीचकार।

"शङ्कराम्बया.....समर्यादमाहूय.....श्रीमदुत्तररङ्गेन्द्रकरुणासमेधितस्य अस्मद्राजशेखरमणेः चरित्रम् अतिविचित्रं यथावदादितो ललिततरैः पदैरभिवर्णयन् आनन्दय चम्पूप्रबन्धेन तूर्णमस्मानिति दत्तानुज्ञो विधत्ते प्रत्यग्रदुर्गकृतवसतितातार्यवर्यद्वैतीयीकनन्दनः कृष्णकविः...... प्रबन्धम् [8]"

कृतिकालः – 1867-68

प्रभवशरदि तस्यामाश्विने मासि हर्षादथ विजयदशम्यां रत्नपीठे तमेनम्।
नृपसुतमुपवेश्य स्वच्छगङ्गादितीर्थैरभिषिषिचुरुदारा वेदविन्मन्त्रिपौराः।।

यं वासरम् अभिषिक्तश्श्रीमान् राज्ये स रामकृष्णेन्द्रः।
तं वासरमेव जवाद्ग्रथितो रामेश्वरेन्द्रविजयोऽयम्[9]।।

श्लोकद्वयमनुसृत्य एकेनैव दिवसेन काव्यमिदं व्यरचयत् कविरिति क्रि.श. 1867-68 तमे वर्षे आश्विने मासि विजयदशमी कृतिकाल इति च वक्तुं शक्नुमः। होसदुर्गं कृष्णकविः प्रथमरामेश्वररायस्य समकालिकः इत्यतः काव्यस्थम् इतिहासं कविः अक्षिसात् अकरोदिति वक्तुं शक्यते।

---

[8] रा.वि.च.1.प्रा.उ. पृ.सं.8
[9] रा.वि.च.12. 26, 32

In Public domain. Digitization Muthulakshmi Research Academy

वनपत्तिसंस्थानराजवंशवृक्षः



- दत्ततां सूच्यति # इदं चिह्नम्।
- संस्थनं पालित्तवतीनां महाराणीनां सूक्कं * इदं चिह्नम्।

In Public domain. Digitization Muthulakshmi Research Academy

रामेश्वरविजयचम्पूकाव्यस्य पात्राणि

क.सं.	पात्रम्	विवरणम्
1.	रामकृष्णरायः (1)	रामेश्वरायस्य (1) पिता मरणम् क्रि.श. 1820-21
2.	नाच्चारम्बा रामाम्बा	रामकृष्णरायस्य (1) पत्न्यौ
3.	रामेश्वररायः (1)	नायकः भाग्यनगरेन्द्रस्य सेनाधिपतिः जननम् क्रि.श.1820-21 मरणम् क्रि.श. 1866 वनपर्तिराजा रामेश्वरस्य दत्तपुत्रः रमणाम्बफक्रीरेड्डिदम्पत्योः निजपुत्रः भाग्यनगरेन्द्रेण आङ्लेयैश्च दत्तानि बिरुदानि Brigadier-General H.H. Sri Sawai Raja Rameshwar Rao I Balwant Bahadur, Bhupal, Raja of Wanaparthy.
4.	शङ्करम्बा	शिङ्गमाम्बेति अपरनामधेया रामेश्वरस्य (I) पत्नी कोडगल्लुपुरस्य जगन्नाथाम्बाजगन्नाथयोः पुत्री
5.	जानक्यम्बा	शङ्करम्बासोदरी रामेश्वरायस्य (1) द्वितीयपत्नी
6.	रामकृष्णरायः (2)	रामेश्वररायस्य (1) दत्तपुत्रः सञ्जीवाम्बायाः निजपुत्रः जननम् क्रिश 1866 मरणम् क्रि.श.1892 अकालमृत्युग्रस्तः
7.	रामकृष्णरायः	प्रथमरामेश्वररायस्य अनुजः

In Public domain. Digitization Muthulakshmi Research Academy

8.	गोविन्दवेङ्कोबनायकौ	वनपर्त्तिमन्त्रिणौ राधावेङ्कोबदम्पत्योः पुत्रौ
9.	रामचन्द्रनायकः	गोविन्दनायकस्य पुत्रः वनपर्तिमन्त्री
10.	Nizam-ul-Mulk Nawab Mir Farkhunda Ali Khan Nasir-ud-Daulah Asaf Jah IV,	क्रि.श.1794 – क्रि.श.1857 जीवनकालः 21 May क्रि.श.1829 – 16 May क्रि.श.1857 शासनकालः Nizam of Hyderabad
11.	Afzal ad-Dowla Mahbub Ali I Khan Asaf Jah V	क्रि.श.1827 - क्रि.श. 1869 जीवनकालः 18 May क्रि.श.1857 – 26 Feb क्रि.श.1869 शासनकालः Nizam of Hyderabad
12.	रामबक्षिः	दीवानाख्यपदभूषितः पेषिकर् पदभूषितो वा चन्दूलालभागिनेयः क्रि.श. 1843-1845 प्रथमवारं पदवीकालः सेप्टेम्बर क्रि.श. 1849- एप्रिल् क्रि.श.1851 पुनः द्वितीयवारं पदवीकालः अस्य काले अनेनैव मत्सरग्रस्तेण रामेश्वर-रायः निर्बन्धे स्थापितः।
13.	Mir Turab Ali Khan Salar Jung I	Diwan/Chief Minister, Nizam of Hyderabad, Persian Shiah May 1853 – 8th Feb 1883 पदवीकालः
14.	तालपद्दौलाख्यः यवनयोधाग्रगण्यः	रामेश्वराय हूणभाषार्जनार्थं त्रिलक्षं रूप्यकाणि ऋणरूपेण प्रदाय धनम् अप्राप्य रामबक्षिसाहाय्येन तं निगृहीतवान्। सुरङ्ग-मार्गेण राजा निर्बन्धात् मुक्तः।

In Public domain. Digitization Muthulakshmi Research Academy

15.	पैलवान् खान्	सेनानीः तालपद्दौलयवनयोधग्रगण्यस्य साहाय्यार्थं युद्धं करोति।
16.	लक्ष्मणार्यः	आयुर्वेदज्ञः रामेश्वररायस्य निर्बन्धावसरे सहायकरूपेण अस्योल्लेखः दृश्यते।
17.	इन्द्रजित् प्रतापौ	भाग्यनगराधीशास्थाने लेखकौ
18.	शिवराजबहदरः	इन्द्रजितबहदुरुपुत्रः
19.	वेङ्कटराघवरङ्गरायः	कन्दुकूरुनृपतिः रामेश्वरेण पराजितः
20.	शेषरायः	भाग्यनगराधीशस्य सुहृत् रामेश्वरेण उन्मुक्तः
21.	राजा कृष्णरायः	अलम्पूरुनृपतिः रामेश्वरेण पराजितः
22.	रङ्गराजः	नल्लपल्लीपालकः रामेश्वरेण पराजितः
23.	गोपालरायः केशवाम्बा	गोपालपेटसंस्थानम् रामेश्वरेण निगृहीतौ
24.	नागराजः	मुदिनपुरीराजः महबूबनगरजनपदं मोक्थलतालुका रामेश्वरेण भाग्यनगराधीश्वराज्ञया हतः
25.	शेषार्यः	यात्रायां रामेश्वरस्य सहयात्रिकः पण्डितः
26.	श्रीनिवासब्रह्मतन्त्र परकालयतीन्द्राचार्यः	मैसूरु श्रीमठम्
27.	भाष्यराघवाचार्यः	यदुगिरिः
28.	वीरराघवेन्द्रयोगीन्द्रः	यतिः
29.	सुब्बाशास्त्री	वनपर्त्तेः तर्कशास्त्रपण्डितः
30.	वेङ्कटाचार्यः	वनपर्त्तेः वैयाकरणपण्डितः
31.	झङ्कः	कश्चन वनपर्त्तेः अधिकारी

In Public domain. Digitization Muthulakshmi Research Academy

रामेश्वरविजयाख्यश्चम्पूप्रबन्धः - कथासारः

प्रथमः प्रारम्भोल्लासः - श्लोकसङ्ख्या 53

कविः होसदुर्गं कृष्णमाचार्यः काव्यस्य निर्विघ्नसमाप्तये इष्टदेवताः संस्तुत्य तदनु काव्येऽस्मिन् वनपर्तिसंस्थानस्य राज्ञः रामेश्वररावस्य जीवनचरितं वर्णयति। आदौ सप्तदशभिः श्लोकैः देवतास्तुतिं गुरुस्तुतिं सुकविकवितास्तुतिं विधाय काव्यगुणान् आस्वाद्य दोषान् परित्यजन्त्विति सहृदयहृदयान् कविः प्रार्थयते।

कथानेपथ्यम् - पश्चात् वनपर्तिसंस्थानस्य साम्राज्यसिंहासनाधिरूढा राज्ञी शङ्करम्बा वनपर्तिसंस्थानाधिपतेः दिवङ्गतस्य स्वपत्युश्च राज्ञः रामेश्वररावस्य चरितं वर्णयत्विति दत्तानुज्ञोऽहम् एतं रामेश्वरविजयाख्यं चम्पूप्रबन्धं चकार इति गद्येन काव्यप्रणयनहेतुं विशदयति कृष्णकविः। अस्मिन् सन्दर्भे कविः नैकान् ऐतिहासिकविशेषान् प्रस्तौति। राजपुत्रः रामकृष्णरायः बालः इत्यतः सचिवयोः वेन्कोबरामचन्द्रनायकयोः साहाय्येन राज्ञी शङ्करम्बा संस्थानं शास्ति स्म। कविः स्वरचनाः विभिन्नसंस्थानैः प्राप्तानि सम्माननानि बिरुदसत्कारादीनि अपि अत्र प्रस्तौतीति विशेषः। 18 श्लोकात् नवविंशश्लोकपर्यन्तं वनपर्तिसंस्थानकुलाधिदेवं श्रीरङ्गनाथं स्तौति कविः। तदनु गद्यरूपेण रङ्गनाथस्य भक्तानां संस्थानपालकानां नामोल्लेखपुरस्सरं कथामारभते।

पूर्वपूरुषसंस्मरणम् - वनपर्तिसंस्थानराजवंशमूलपूरुषः जनुंपल्लि वीरकृष्णारेड्डि (क्रि.श.1510-1550)। इम्मडि वेङ्कटरेड्डी चतुर्थः पूरुषः। अष्टभाषाकविः राजा बहिरी गोपालरायः पञ्चमः पूरुषः। क्रि.श. 1637 तमे वर्षे दिवङ्गतः। वंशस्य श्रेष्ठपुरुषयोः अष्टभाषागोपालरायस्य वेङ्कटरेड्डिवर्ययोः कुलचूडामणी रामकृष्णरायः अत्र समुपवर्णितः।

In Public domain. Digitization Muthulakshmi Research Academy

प्रथमः रामकृष्णरायः- अनन्तरं दशभिः श्लोकैः (30-39) रामकृष्णरायस्य गुणगणान् कीर्तयति। वर्णने पञ्चमहाकाव्यकृतिकर्तॄन् अनुकरोति कविः। रामकृष्णरायस्य नाचारम्बा रामाम्बा चेति द्वे पत्न्यौ आस्ताम्। अपुत्रोऽयं राजा स्वप्ने श्रीरङ्गनाथस्य दर्शनं प्राप। राजांशरमणीयः कुमारः श्रीरङ्गपुरवासिन्याः रमणाम्बाभिख्यायाः गर्भे समेधते। तत्र यस्य भवनस्य मूर्धनि गरुडः परिभ्रमति तत्र कुमारः उदयते। तमानाय्य संवर्धय। रामेश्वर नामा एष उरुकीर्तिं समुपार्जयतीति उपदिश्य भगवान् अन्तर्हितः। रामकृष्णरायः भगवदादेशानुसारं श्रीरङ्गपुरं गत्वा रमणाम्बां दृष्ट्वा उत्तररङ्गेन्द्रशासनं निवेद्य प्रसन्नेन चित्तेन निजपुरं जगाम।

(बण्डमीदि रङ्गापुरे इवरमुपेटाख्यग्रामस्थयोः फक्कीरेड्डिरमणम्मयोः दम्पत्योः पुत्रं दत्तपुत्रत्वेन स्वीचकार राज्ञीति तेलुगुवीरगाथाकवित्वमिति पुस्तके विविरणमुपलभ्यते। स एव दत्तपुत्रः प्रथमः रामेश्वररायः)

द्वितीयः प्रादुर्भावोल्लासः – 57 श्लोकाः

रमणाम्बागर्भसम्भूतस्य रामेश्वररायस्य जन्मवृत्तान्तं बाल्यं विद्याभ्यासः तत्साहसप्रवृत्तिः इत्यादयः विशेषाः अस्मिन् उल्लासे वर्णिताः। उल्लासस्यास्य आरम्भः शरत्कालवर्णनेन क्रियते। प्रसूत्यनन्तरं मात्रा साकं शिशुं राजमन्दिरम् आनिन्युः। वनपर्तिसंस्थानप्रजाः नृपसुतं निशमय्य विस्मयविवशा बभूवुः। नृपसुतजन्ममहोत्सवे राजा रामकृष्णरायः गोदानं चकार। अपिच सुतस्य रामेश्वर इति नामकरणं चकार। नाचारम्बारामाम्बाभ्यां बालो सुपोषितश्च। चञ्चलस्यास्य बालस्य निग्रहणे चेटीशतकमप्यलं नाभूत्। रामकृष्णरायः द्वादश्यां चित्रभानौ शरदि शरदृतौ कार्तिके शुक्लपक्षे (क्रि.श. 1822-23) दिवङ्गतः। सिंहासने बालकमारोप्य राज्यपालनं क्रियते स्म। गुरुः पञ्चहायनस्य बालस्य अक्षराभ्यासं कारितवान्। तीक्ष्णमतिः रामेश्वरः आन्ध्रमहाराष्ट्रीकर्णाटद्राविडयवनानीवर्णान् अधिगत्य <u>हूणाक्षराणि</u>

In Public domain. Digitization Muthulakshmi Research Academy

पुराणकाव्यदण्डनीतितुरगशिक्षागजशास्त्रादीनि नैकानि विद्यास्थानानि च अधीतवान्।

रामेश्वरस्य पट्टाभिषेकः विरचितः। तदनु द्वादशवर्षः बालोऽयं यवनैः निरुद्धां **ताटिकोण्डपुरीं** बद्ध्वा शत्रुनिर्मूलनं चकार। तथैव यवनभटान् विजित्य **कन्दूरुपुरमपि** स्वायत्तीकृतवान्। भाग्यनगराधीशः रामकृष्णप्रभोः पुत्रस्य अद्भुतशौर्यं शुश्राव। तच्छौर्यं परीक्षितुं **यत्तसंज्ञनगरी** जेतव्येति रामेश्वरम् आज्ञापयामास। तत्रत्यराजं निर्धूय यत्तपुरीं वशीचकार रामेश्वरः। तदनु राजा गजमारुह्य सेनया निजप्रासादात् निर्गतः। **नासदौंलाभिधानेन**(नासिर् उद दौला 24 मई 1829 चौमहल्ला पैलेस में 16 मई 1857, चतुर्थः भाग्यनगराधिपतिः) भाग्यनगराधिनाथेन बहुमिमानयिषया निजपुराद्योजने राजमानस्य **गगनपहडिति** प्रथितस्य पुरस्य निकटम् अभिप्रेषिताभ्यां बहदुरुबिरुदाङ्किताभ्यां **इन्द्रजित्प्रतापाभिदानाभ्यां** लेखकाग्रणीभ्यां सौवर्णराङ्कवमुक्ताहाराभ्यां अभिनन्द्यमानो वन्द्यमानो सोपचारवचनं राजा रामेश्वरः भाग्यनगरीं प्रविश्य उपकार्यां रात्रिम् अनीनयत्।

तृतीयः विजयोल्लासः - 39 श्लोकाः

परेद्युः **नासदौंलावनीश्वरेन्द्रसचिवेन** राजा <u>रामबक्षिनाम्ना</u> दिदृक्षया समाह्वायितः रामेश्वररायः निजोपकार्यायाः निर्गत्य गजमारुह्य आस्थानप्रतिहाराग्रभागम् अवतीर्य तदास्थानं प्रविश्य सचिवेन्द्राय विरचित-तदुचितकरतलनिटिलस्पर्शनरूपप्रणामः समागत्य यवनाधीश्वरसिंहासनं तस्मै विरचय्य दूरादेव एकहस्तफालस्पर्शननमस्कृतीः तदाज्ञया सेवकैरानीते सुवर्णासने निषसाद। रामेश्वरं वीक्ष्य चकितोऽभूत् नासदौंलाधीशः। यत्तेन्द्रमुख्यनृपतीन् जितवान् खलु भवान्। त्वां मम दक्षिणं महाबाहुं मन्ये इति प्रशंसितवान् भाग्यनगराधीशः। रामेश्वरः प्रतिवचनं प्राह यत् तव दयया एव रिपुजेतोऽस्मि। विनयमधुरं तस्य वचनं निशम्य भाग्यनगराधीशः प्राह यत् भवत्कुलीनाः राजाबहादुरिति बिरुदं दधते स्म। **बहिरीति अस्मदर्पितं** नाम

In Public domain. Digitization Muthulakshmi Research Academy

गृह्णीष्व। **कन्दुकूरुनृपतिः वेङ्कटराघवरङ्गरायः** अस्मन्मण्डलवर्तिनं **शेषाभिधं नरपतिं** स्वपुरे रुन्धे। युद्धे तं विजित्य जयं प्राप्नुहि। रामेश्वररायः तद्वचनं शिरसा वहामीति प्रतिश्रुतवान्। तत्र कानिचन दिनानि नीत्वा गत्वा स्वकीयां पुरीं स्थित्वा पञ्चषान् दिवसान् तत्र राजाज्ञाम् अनुसृत्य सैन्येन साकं कन्दुकूरुनगरं प्रति निर्यातः। कन्दुकूरुं न्यरुन्धन् रामेश्वररायस्य योधाः। भाग्यनागराधीशस्य शासनात् शेषभूमीपतिमर्पय इति कन्दुकूरुभूमीश्वरं रङ्गराजं रामेश्वररायः प्राह। तद्वचनम् अपरिगणय्य युद्धक्षेत्रमवतीर्णवन्तं रङ्गराजं रामेश्वररायः पराजितवान्। युद्धरङ्गात् पलायमानं रङ्गराजम् अन्वद्रवन् भटाः। रामेश्वररायः शेषरायम् उन्मोच्य स्वराष्ट्रं प्रस्थापयामास। पत्रमुखेन विजयोदन्तं यवनेश्वराय निवेद्य रामेश्वररायः वनपर्तिनगरनिकटं सम्प्राप्तः। तद्विजयोदन्तं श्रुत्वा आबाल्यसखौ **राधाम्बावेङ्कोबानायकतनयौ गोविन्दवेङ्कोबनायकनामानौ** द्विजकुलावतंसौ प्रत्युद्गतौ। ताभ्यां साकं गजमारुह्य निजभवनं प्रविश्य कतिचिद्दिनानि अत्यवीवहत् रामेश्वररायः।

चतुर्थः यात्रोल्लासः – 46 श्लोकाः

यात्रोल्लासेऽस्मिन् राज्ञा रामेश्वररायेण कृतायाः दिव्यक्षेत्रयात्रायाः तत्सन्दर्भे प्राप्तस्य पुण्यपुरुषसन्दर्शनस्य च विशेषाः समुपवर्णिताः। रामेश्वररायः वसन्तकाले प्रस्थाय यादवाचलं नारायणपुरीं नरसिंहगिरिं कावेरीं महानदीं श्रीरङ्गपत्तनं महीशूरराजधानीं श्रीमत्परकालगुरुवर्याणां श्रीमठं तुङ्गभद्रां यदुगिरिञ्च दृष्ट्वा पेब्बेराभिधानां राजधानीं प्राविशत्। अत्र यादवाचलं, नारायणपुरीं, नरसिंहगिरिं, श्रीरङ्गपत्तनं, महीशूरराजधानीं, श्रीमठं, यदुगिरिं च प्रास्तौत् कविः।

गोविन्दनायकवृत्तान्तः – राजा रामेश्वररायः गोविन्दनायकवेङ्कोबनायकाभ्याम् आबाल्यमित्राभ्यां बहुधा सेवितः। गोविन्दनायकवेङ्कोबनायकयोः पितरौ राधाम्बावेङ्कोबनायकौ इति अवधेयमत्र। कृष्णकविः अस्योल्लासान्ते गोविन्दनायकः भगवतः गोविन्दस्यानुग्रहेण जात इति गोविन्दनायकजन्म-

In Public domain. Digitization Muthulakshmi Research Academy

वृत्तान्तं वर्णयति। अपि च मात्रा अनुजेन च सह गोविन्दनायकः तीर्थयात्रां चकार। तान् विशेषानपि सङ्क्षिप्ततया कविः वर्णयति।

गोविन्दनायकः राधाम्बां निजाम्बाम् अनुजं वेङ्कोबनायकं च पुरस्कृत्य राजानम् आपृच्छ्य परिजनपरिवृतः प्रस्थाय पुष्करणीषु कृतमज्जनः गोदानं सुवर्णदानं वस्त्रदानञ्च कुर्वन् नीलाद्रौ पुरुषोत्तमं संसेव्य काश्यां विश्वेश्वरं परिक्रम्य गयामभिगम्य प्रयागं प्रणम्य श्रीकूर्मे सनातनकूर्मं प्रपद्य बृन्दावनम् अन्यानि चैवंविधानि क्षेत्राणि शतशो दर्शं दर्शं निखिलपृथ्वीमण्डलं परिचक्राम।

वेङ्कोबनायकाभिधानस्य धर्मपत्नीं राधाम्बाभिधानां सानुग्रहम् आहूय कश्चित् अवधूतवर्यः अवोचत् यत् अम्ब भगवन्तं गोविन्दम् आराधय। तवोदरे अयमेव गोविन्दो नाम्ना अवतरिष्यति।

प्रकृतिरमणीयतावर्णनं देवतास्तुतिवर्णनञ्च उल्लासस्यास्य उत्कर्षतां वर्धयतः।

पञ्चमः सुरङ्गनिर्गमोल्लासः – 73 श्लोकाः

प्रातिकूलिकालम्पूरभिख्यनगराधिपत्यकृष्णाभिधनरपालनिग्रहाय भाग्यनगराधिपतेः आज्ञया रामेश्वररायः सेनया सह गत्वा अलम्पूरुपुराधिनाथं जीवग्राहं निगृह्य नासर्दौलाभिधमण्डलेन्द्राय अर्पयितुं यावद्भाग्य-नगरीमुपगच्छति तावदेव अलम्पूरुराजसुहृदः केचन भाग्यनगरेन्द्रनिखिल राज्यतन्त्रधुर्यस्य मन्त्रिवर्यस्य रामबक्षिनाम्नः सन्निकर्षं पुरस्कृत्य रामेश्वररायस्य निग्रहाय निवेदयामासुः। मात्सर्यग्रस्तः सचिवेन्द्रः यावनैः आप्तैः रहसि अमन्त्रयत। यवनेन्द्रपतेः दयाविशेषो रामेश्वरे उज्जृम्भते। आदौ सेनाधिपत्यं सचिवपदं ततःपरं साम्राज्यं करगतमेव करिष्यतीति विचार्य सचिवेन्द्रः रामबक्षिः विनिग्रहाय रामेश्वरस्य कृतसङ्कल्पो साम्राज्यास्थानीं प्राविक्षत्। रामबक्षिप्रेरिताः सेनाभटाः रामेश्वरं ग्रहीतुं यावत् उपकार्यां निरुन्धते तावत् दैवात् रामेश्वररायः हूणेन्द्रदर्शनाय रथं समारुह्य तदास्थानं गतः। तत्र सम्मानितः। विदिततद्वृत्तान्तः अन्यत्र तत्रैव कल्पितावासः दूतमुखेन मन्त्रीन्द्राय तन्निवेदितवान्। विचार्यते

In Public domain. Digitization Muthulakshmi Research Academy

अस्माभिरायातव्यं भवतात्र राजस्थानमिति दत्तोत्तरः चिन्तामुपेत्य रामेश्वरः निर्निद्र एव रात्रिं गमयामास।

अन्येद्युः रामेश्वरः राजस्थानं प्राविक्षत्। राजानं व्यजिज्ञपत् यत् राजाज्ञया गृहीतोऽयम् अलम्पूरुनृपतिः। सैन्याधिपत्यं वोढुं कृतशासनोऽस्मि। तदनुमन्त्रीन्द्रस्य दुर्व्यवहारं गर्हितवान्। तेन सचिवेन्द्रः असूयानलदग्धोऽभूत्। प्रसन्नतां प्रदर्शयन् मनसि कुटिलतां धत्ते स्म सः। राजसमक्षं रामेश्वरं सचिवेन्द्रः प्रशंसितवान्। सभास्थानाग्रात् अवतीर्य प्रतिहारभागं प्राप्तः रामेश्वरः शूरैः निरुद्धः (क्रि.श.1849)। मन्त्रीन्द्रः रामेश्वरं रुद्धं ज्ञात्वा नितरां सन्तुष्टः।

वेङ्कटेशदिव्यभवने राजेश्वराभिधानाभिराममारामं सैनिकैः नीतः रामेश्वरः। मासषट्के अतीते च वनपर्तिराष्ट्रं सचिवेन्द्रप्रेरितेन तालपद्दौलाभिधानेन यवनयोधाग्रगण्येन भाग्यनगरारक्षेण आक्रान्तमिति अवगत्य सन्तप्तान्तरङ्गोऽभूत् रामेश्वरः।

राजा आयुर्वेदज्ञं स्वमित्रं लक्ष्मणार्यं निवेदितवान् यत् सचिवेन प्रतारितोऽस्मि। असहायोऽहं निगृहीतः। तथापि उपजीव्योपजीवकभावः माम् आयासयति। निशम्य तद्वचनं लक्ष्मणार्यः अवोचत्। प्रतीकारः कपटिनां कपटेनैव युज्यते। चातुरिकदनमविरचय्य इतः निर्गन्तुं युक्तमिति प्रतिभाति। यथा पुरा पाण्डवाः सुरङ्गया लाक्षागृहात् निर्गता तथा अहमपि निर्गच्छामि। देवालयप्राकारमिमं समया ब्राह्मणस्य गृहस्य अभ्यन्तरे यथा न ज्ञायते तथा उपक्रम्य प्रकृतमामकीनाभ्यवहारशालागर्भं प्रतिगर्भ एव सुरङ्गा प्रवर्तनीया। तदनु खनिकैः यान्त्रिकैश्च ब्राह्मणगृहे खननमारब्धम्। खननशब्दः सैनिककर्णपदवीं यथा न प्रसरेत् तथा वाराङ्गनातानगानकार्यक्रमाः आयोजिताः। आविप्रगेहात् आमहानसञ्च विरचिता सुरङ्गा।

मार्गशीर्षकृष्णपक्षाष्टम्याम् उत्सवव्याजेन विविधाभ्यवहारैः सेनाभटान् प्रतोष्य आत्मानं सूदद्वितीयं विलोक्य किङ्करसङ्कलिताङ्गुलीप्रहारजनित तनुतरशब्देन अवगत्य समाचितं फलकमेकम् उद्घाट्य सुरङ्गामुखे अवतीर्य

In Public domain. Digitization Muthulakshmi Research Academy

यथापुरं तमेव फलककवाटं पिधाय उत्कील्य अयोयन्त्रेण अग्रतः स्वकीयैः सायुधभटैः अभिनन्द्यमानः तुरङ्गमारुरोह। तालपद्दौलाभिधान नगरारक्षाग्रगण्य रामेश्वरस्य सुरङ्गामार्गनिर्गमनोदन्तं निशम्य आक्रोशत् यत् राजन् कपटेन निर्गमनमुचितं तव। युज्यते हि कपटिनां प्रतीकारः कपटेनैव यथा भवतां निर्बन्धस्तथास्मन्निर्गमनमिदं यद्यस्ति ते शक्तिः गृहाणेदानीं मामित्यवदत् रामेश्वरः। तत्र तत्र निरुद्ध्यमानोऽपि कैश्चित् निर्धूय तान् भाग्यनगरीम् अत्यक्रामत् स वीरः।

भाग्यनगराधीशोऽपि कुतूहलेनागत्य सुरङ्गां व्यलोकिष्ट। निजराष्ट्रं प्रविश्य वनपर्तिराजधानीं दूरादेव अवलोकयन्नतिक्रम्य श्रीरङ्गपुरं प्रविश्य श्रीरङ्गनाथं प्रणम्य स्तुतिं चकार। तदनु निजधाम प्राविक्षत् राजा रामेश्वररायः।

(तेलुगुवीरगाथाकवित्वम् इति पुस्तके इतोऽधिकं विवरणमुपलभ्यते। रामेश्वररायस्य हूणविद्याकौशलं परीक्षितुं भाग्यनगराधीशः तं नगरम् आह्वयत्। रामेश्वररायः पाचिकां सेवकुलबुच्चमां सिद्दि अब्दुलाख्यम् आदाय नगरमागतः। रामेश्वररायस्य हूणविद्याकौशलेन प्रसन्नः भाग्यनगराधीशः कोडवल्लिकल्लु उम्मापुरग्रामौ उपायनीकृत्य रामेश्वरायं सम्मानितवान्। गोल्लन्दासु इति आरामं यावत् आगतः रामेश्वरः तावत् तालन्दौलाख्यः आरक्षाग्रणीः यः रामेश्वराय पूर्वं हूणविद्यार्जनाय त्रिलक्षं रूप्यकाणि ऋणरूपेण प्रादात् सः रामबक्षिप्रोत्साहेन रामेश्वरं निगृहीतवान्। रामेश्वरः सेवकुल-बुच्चम्मायाः साहाय्येन प्रथमं सिद्दिअब्दुलाख्यं समाचारं प्रैषयत्। ततः स्वजनेभ्यः स्वनिर्बन्धसमाचारं प्रैषयत् राजा। रामेश्वरस्य हितैषी निर्बन्धात् निर्गमनोपायं कस्मिंश्चित् लेखे सूचितवान्। सेवकुलबुच्चम्मा तं लेखं भोजनकरण्डके संस्थाप्य कारावासिने राज्ञे दत्तवती। एतत् वृत्तं जानपदगीते वर्णितमस्ति। सेवकुलबुच्चम्मायाः साहसकृत्यं गीते भृशं प्रशंसितमस्ति[10]।

---

10 భైరు బహద్దరు పిట్ట మేలు
భళి మగలాయి బంగరు పిట్ట

In Public domain. Digitization Muthulakshmi Research Academy

द्वादशभिः भटैरागत्य रामेश्वरानुचराः कस्यचित् ब्राह्मणस्य गृहमादाय कोत्तकोटनिकटस्थम् अग्रहारं तस्मै ब्राह्मणाय दत्त्वा ब्राह्मणगृहात् कारावासपर्यन्तं रहसि सुरङ्गां निखाय रामेश्वरम् उन्मोचितवन्तः। अश्वेन रामेश्वररायः कर्नूलुजनपदं प्राप्तः। रामेश्वररायस्य अश्वचालनवेगतीव्रतायाः हेतोः अश्वः पञ्चत्वं गत इति एषा सुरङ्गानिर्गमघटना जानपदगाथारूपेण तेलङ्गाणाजनपदेषु अतीवप्रसिद्धेति साहित्यकाराः प्रशंसन्ति।

षष्ठः कल्याणोल्लासः – 20 श्लोकाः

మన్నెరుసుము తినేవాడు,
ముల్లుకట్టి చేతుల వుంటే
మూడునూర్ల మంది ఆగరు,
ఎడమచేతి డాలు కింద
ఏడునూర్ల ఫౌజు ఆగదు మేల్ భళిభళి,
ఆడ యెక్కిన గుర్రమయ్యా మేలు భళి
పెద్ద జానము పేటకు వచ్చినది మేలు భళి సేవకుల బుచ్చమ్మ పిలిచె దోరకు భోజనము తీసుకుని
పోయె అపుడు యీ జాబును అన్నముల పెట్టి వెయ్యి
రూపాయలు ఆమె చేతికిచ్చె బుచ్చెమ్మ తీసుకుని బుచ్చెమ్మ
వచ్చేవరకు రాజు భోజనము వచ్చె జరగండి భోజనము
తెచ్చి రాజు కిచ్చె అన్నము తిని రాజు చదివి చూడె.
గుర్రము పేగులు తెగి చచ్చినది మేలు భళి,
అక్కడ ఓక గుర్రం ఎక్కినాడు మేలు భళి
చిన్న జానము పేటకు వచ్చినాడు,
ఆడ గుర్రం పేగులు తెగి చచ్చె
ఆడ ఓక గుర్రమును ఎక్కినాడు,
కోత్తకోటకు వచ్చినాడు
అక్కడ గుర్రము పేగులు తెగి చచ్చె,
ఇంక ఓక గుర్రము ఎక్కినాడు
యాపర్లకు వచ్చినాడుకరకర ప్రోద్దు పోడిచినాది
పెద్దేరు చిన్నేరు దాటి
కర్నూలులో వచ్చి చేరినాడు

In Public domain. Digitization Muthulakshmi Research Academy

अस्मिन्नुल्लासे कविः गोविन्दवेङ्कोबनायकयोः यात्राविशेषान् प्रस्तौति। तीर्थस्थलयात्रां कुर्वन् वेङ्कोबनायकं पुरस्कृत्य परिजनैस्साकम् अरण्यानीं प्रविष्टः गोविन्दनायकः। अद्य एकादशी सर्वैरुपवस्तव्यमेव। श्वः प्रभाते कथमिव पारयन्मे द्वादशीव्रतम्। भगवान् दुर्गे कान्तारे निशामिमाम् अस्मान् रक्षिष्यति इति वदन् गोविन्दनायकः क्वचित् कुटीरम् अवलोकयामास। कुटीरात् निर्गतं कमपि पुरुषम् अवलोक्य तन्मुखात् तस्य पुरुषस्य नामधेयं पुरुषोत्तमदास इति स ग्रामः पुरुषोत्तमपुरमिति च तद्विवरणं ज्ञातवान्। तस्य पुरुषोत्तमदासस्य आथित्येन निर्वर्तितपारणाव्रतः तेन प्रदर्शितमार्गः ततः निर्गत्य परिजनैस्साकं किञ्चन नगरं प्राप्तः गोविन्दनायकः। तन्मुखात् पुरुषोत्तमपुरोदन्तं श्रुत्वा तत्रत्याः जनाः तादृशपुरं राष्ट्रे क्वापि नास्तीति ऊचुः। भगवल्लीलैषा इति विदित्वा हृष्टान्तरङ्गः बभूव गोविन्दनायकः। श्रीरामसेतुमुखदिव्यप्रदेशान् परिक्रम्य शेषाद्रिभूषामणेश्श्रीनिवासस्य सन्दर्शनेन जन्म सार्थकं चकार सपरिवारः गोविन्दनायकः। वनपर्तिनगरागमनाय रामेश्वरेन्द्रकृतशासनैः तुरगसादिभिः सम्प्रार्थ्यमानो निजपुरसम्मुखीनोऽभूत् गोविन्दनायकः। यात्रानिवृत्तं स्वसुहृदम् आबाल्यसखं सपरिवारं गोविन्दनायकं रामेश्वरः प्रत्युद्ययौ। सुदीर्घगद्येन कविरत्र मित्रयोः गाढमैत्रीं वर्णयामास। गोविन्दवेङ्कोबनायकाभ्यां परावृत्य श्रीरङ्गपुरं प्रविष्टः।

चक्राङ्कनदीक्षा - तावत् श्रीमत्तोताद्रिविष्णुचित्तरामानुजयतीन्द्राचार्यवर्यम् आगच्छन्तं निशम्य अभिगम्य प्रणम्य तम् आनीय सादरम् अवतीर्य श्रीरङ्गपुरे तदनुगृहीतमङ्गलाक्षतः निजनिकेतनं न्यविक्षत। अन्येद्युः यतिवरं सेवितुमगात् राजा। नमस्कृत्य गुरुं तदाज्ञया निषसाद। यतिवरं व्यजिज्ञपत् राजा यत् श्रीचक्रं प्रदाय शुभदमयनं दर्शयत। गुरुः तदा प्रतिसरं चक्राङ्कनदीक्षायै करेऽबध्नात्। तप्तं तच्चक्रं नृपस्य दक्षिणभुजे अधात् गुरुः। पाञ्चजन्यमितरभुजे च अधात्। रामेश्वरः तीर्थं स्वीकृत्य समर्प्य कनकगजतुरगाग्रहारान् प्रणम्य नीत्वा कानिचन दिनानि तत्र शिबिकाम् आरूढं प्रस्थितं स्वाचार्यं यतिवर्यं सुदूरमनुगम्य निवृत्य पेब्बेराभिधानां राजधानीं प्रविश्य तत्र कतिचन दिनानि निनाय।

विवाहमहोत्सवः - कोडगल्लुपुराधिनाथजगन्नाथावनिपालस्य जगन्नाथाम्बायाश्च कन्यां शङ्कराम्बाभिधानां श्रीरङ्गपुर्यां शुभलग्ने उपयेमे राजा रामेस्वररायः। शङ्कराम्बायाः शिङ्गमाम्बा चेति अपरं नामधेयमस्ति। धर्मपत्न्या साकं निजनिकेतनं प्रविश्य ससुखं निनाय कतिचन वासरान् रामेश्वररायः।

सप्तमः सङ्गरोल्लासः – 78 श्लोकाः

भाग्यनगरे यवनाः रामेश्वरनृपतेः सुरङ्गामुखनिर्गमनेन क्रुद्धाः आसन्। तालपद्दौलाख्यः यवनाग्रणीः भटान् आज्ञापयामास। पैलवान् खानभिख्यः सेनानीः सैन्यस्य नायकत्वम् ऊढवान्। सैनिकाः वनपर्तिपत्तनं प्रस्थिताः। यावत् वनपर्त्तिसंज्ञनगरप्रत्यग्दिशारण्यभूजाग्रत्कुष्णपुराग्रहारनिकटं सैन्यं समागच्छति तावत् चारमुखात् तज्ज्ञात्वा रामेश्वररायः स्वसेनां सज्जीचकार। सेनावर्णनं दीर्घगद्येन व्यधात् कविरत्र। कृष्णपुरनिकटे सेनया साकं पदं निदधे राजा। जाते तुमुले युद्धे पैलवान् खानभिख्येन सह रामेश्वरस्य द्वन्द्वयुद्धमभूत्। पराजितः पैलवान् खानः रणरङ्गात् पलायितः। हतशिष्टाः तदीयसेनाभटाः वनपर्त्तिराजसामन्तराष्ट्रविराजमानसोलीपुराख्यपल्लीम् अवष्टभ्य तालपद्दौला-भिधान प्रेरितया तत्रागतया सेनया कवचिताः परिवार्य पैलवान् खानभिख्यं सेनान्यं निवर्तमाना पुनः अभिषेणयन्ति स्म। रामेश्वरोऽपि सोलीपुरं प्रत्यागत्य सेनया साकं अभ्यागतान् रिपून् उन्मूलितवान्। पैलवान् खानभिख्यः सेनाधिनाथः पराभूतः पलायितश्च। तदनु रामेश्वरः निजराष्ट्रं प्राविक्षत्। प्रजाः जयघोषं चक्रुः।

शास्त्रार्थः - रामेश्वरराजे परिपालयति महीं वीरराघवमहायोगीन्द्रः समागतः तत्र। तं प्रत्युद्गत्य आनीय नगरीं दिव्योद्यानवनीम् अवातीतरत् राजा। गोविन्दवेङ्कोबनायकाभ्यां साकं रामेश्वरः यतिवरं संसेवितुम् अन्येद्युः प्राप। सन्दर्भेऽस्मिन् यतिवरस्य दिव्यस्वरूपवर्णनं कविश्चकार। श्रीवीरराघव-योगीन्द्रस्य समक्षं शास्त्रार्थः आयोजितः। तत्र तर्काध्वन्यमूर्धन्यः सुब्बाशास्त्रिसमाह्वयः सुधीवरेण्यः निपीतपतञ्जलिनयसुधाझरमाचार्य-

In Public domain. Digitization Muthulakshmi Research Academy

वेङ्कटाचार्यः कृतिवर्यः च आगतौ। एतौ अस्मदास्थानोचितौ इति रामेश्वरः वेङ्कोबनायकेन समालपति स्म। दैवसङ्कल्पेन यतिवरेण अभ्यर्थितः आज्ञप्तश्च राजा बहुविधाग्रहारादिजीविकाप्रदानपूर्वकं वनपर्तिपुरे विद्वदग्रगण्यान् शतशः समावेशितवान्। यतीन्द्रे प्रस्थिते निजराष्ट्रे कांश्चित् वासरान् ससुखमुवास राजा।

पैलवान्खानभिख्यं पराजितं विदित्वा नासर्दौलानरेन्द्रः रामेश्वरः मे दक्षिणभुजकल्पः। ईदृशेन योद्धुं साहसं कृतवतः जाल्मान् धिक्। मम विप्रियं व्यदधत इति धिक्कृत्य स्वजनान् रामेश्वरं प्रति पत्रं उपहारांश्च प्रैषयत्। प्रतिभटवशगां नल्लपल्लीं निरुध्य मे प्रातीपिकान् बद्ध्वा निजवशगां कुरु इति भाग्यनगराधीशस्य पत्रस्य सारांशः। तदाज्ञानुसारं रामेश्वरः नल्लपल्लीं रुरोध। रङ्गराजः सैन्यैः साकं तं रोद्धुं सन्नद्धः। तुमुले युद्धे रङ्गराजं जित्वा नल्लपल्लीं स्ववश्याम् अतनुत रामेश्वरः। नासर्दौलेश्वराय विजयसमाचारं प्रेषयित्वा निजनगरं गत्वा रात्रौ सुप्तवान्। प्रभाते अस्माकीना गोपालपेटाभिधाना पुरी या ज्ञातिब्रुवैः कैश्चिदात्मीयत्वेनाक्रान्ता स्ववशीकरणीयेति सङ्कल्पेन तयैव सेनया गत्वा जीवग्राहं गोपालरायाभिधानं राजानं बालं साकं जनन्या केशवाम्बाभिधानया गृहीत्वा तदीयसिंहासनमारुह्य अभिषिक्तः द्विजवरैः रामेश्वरः। वेङ्कोबनायकेन साकं गजमारुह्य निजनगरं प्रविश्य कुत्रचन गोपालरायं तदीयजनन्या साकं निरुध्य राष्ट्रं परिपालयामास।

अष्टमः सैनापत्योल्लासः – 72 श्लोकाः

नासर्दौलानृपः मामकीनं राष्ट्रं रक्षितुं दक्षिणोऽस्ति रामेश्वर इति धिया लोकोत्तरवस्तुजालावर्जनशीलेन सालावर्जङ्गिति सुगृहीतनाम्ना सचिवासनाभिषिक्तेन दिदृक्षया प्राहिणोत् शासनम्। तच्छासनमनुसृत्य रामेश्वरः भाग्यनगरं प्राप्नोत्। भाग्यनगरराज्यास्थानं बहुरमणीयतया कविरवर्णयत्। कानिचिद्वासराणि अस्मद्भवने स्थातव्यमिति सचिवेन्द्रः रामेश्वरं प्रार्थयत्। वत्सरद्वितयमर्धाधिकं कालं निनाय निर्धारिततत्तत्कालोचितक्रमो राजा तत्र।

In Public domain. Digitization Muthulakshmi Research Academy

केषाञ्चन धूर्तानां निग्रहाय सचिवेन्द्रः रामेश्वरमाहूतवान्। निश्शस्त्रं तं समीक्ष्य सचिवः क्व ते शस्त्रमिति पप्रच्छ । शस्त्रग्रहे आज्ञा नास्तीत्यतः मया मुक्तमिति अवोचत् राजा। तद्वचनेन मुदितः सचिवः करवालवरं ददौ। सैनापत्ये अभिषिक्तोऽसि सेनां स्ववश्यां कृत्वा मुदिनपुरीं गत्वा नागनामा नरपतिम् अस्मत्प्रातिकूल्यं द्व्यधिकदशमितान् वत्सरान् व्यवहरन्तं जीवग्राहं ग्रहीष्व अथवा जहि तम् इति सचिवेन्द्रेण आज्ञप्तः रामेश्वरः। सैनापत्यदायित्वं वहति मयि को नु मे राष्ट्रं परिपालयेदिति विचिन्त्य रामेश्वरः वेङ्कोबनायकेन साकं द्रष्टुमागते गोविन्दनायके सालावर्जङ्गभिख्यस्य मन्त्रीन्द्रस्य समक्षं निजराज्यभारं निक्षिप्तवान्।

रामेश्वरः सेनया साकं महबूबनगरजनपदस्थ मक्थलतालुकायाः मुदिनाभिख्यां पुरीमभ्ययात्। चारैः वार्तां विज्ञाय मुदिनपुरनृपः नागराजः निजपुरमभितः योधान् न्ययुङ्क्त। ऋतुत्रयं प्रतीक्ष्य कुत्रचित् विरचितासने रामेश्वरनृपे शत्रुभटाः वर्षधाराहताः निजालयं जग्मुः। तज्ज्ञात्वा मक्थलपुरात् सैन्यैः परिवृतः रामेश्वरः युद्धाय प्रतस्थे। मुदिनपुरीं रुरोध च। खात्वा अगाधाः सुरङ्गाः मुदिनपुरमहासालमूले शतघ्नीः सन्धुक्ष्य मुदिनपुरीम् उद्ध्वस्तरूपां समतनुत रामेश्वरः। नागराजः रामेश्वरं जेतुं ससैन्यं निर्जगाम। भीकरं युद्धं प्रवृत्तम्। वनपर्तिराजस्य सेना पलायिता। सपदि अन्यैः सैन्यैः अयुध्यत रामेश्वरः। सप्तरात्रं शत्रुपक्षौ अश्रान्तौ युद्धम् अकुरुताम्। मुदिनपुरनाथः रणरङ्गात् पलायितः। अल्लूरुनाम्नीं पल्लीं निकषा सप्तशतं किरातान् आश्रित्य अरण्यान्यां निलीनं नागराजं निशम्य राजा रामेश्वरः भिल्लान् स्वपरिचयं प्रास्तुवत्। तत्रापि आगतं रामेश्वरं निरीक्ष्य मुदिनपुरनृपः नागराजः ततः पलायितः। सालावर्जङ्गभिख्यमन्त्रीन्द्राज्ञया राजपुराधिनाथं कञ्चन तत्साहायकप्रवृत्तं भूपालपाशं सचिवेन्द्राय प्रत्यर्प्य पुनरपि तदाज्ञया मुदिनपुरनाथम् अन्विष्य गिरिवरे भटैः अभिरक्षितं तं वीक्ष्य तत्क्षणोद्दीपित-नलकमुखविनिर्गतोत्तप्तकालायसगुडकेन तस्य हृदयं विभिद्य नागराजम् ऊर्ध्वलोकं प्रापितवान् रामेश्वरः। मध्येमार्गं भाग्यनगरेन्द्रप्रतिकूलभूपालाक्रान्तां

In Public domain. Digitization Muthulakshmi Research Academy

लोकायपल्लीति (क्रि.श.1859) प्रथितां पुरीं वशीकृत्य परश्शतानेवं विधान् भूकान्तान् विजित्य भाग्यनगरीं प्रपेदे वनपर्त्तिनाथः।

सालार्जङ्गसचिवेन्द्रं निवेद्य युद्धवृत्तं तद्विरचितसम्माननं प्राप्य यदा स्मरसि तदा समुपेहीति सचिवेन्द्रस्य आज्ञां शिरसा वहन् रामेश्वरः निजनगरं प्राप्तः।

(क्रि.श.1858 तमे वर्षे भाग्यनगरेन्द्रस्याज्ञया सुरपुरसंस्थानराजस्य राजा वेङ्कटप्पनायकस्य निग्रहणमपि रामेश्वरः चकार। एतस्याः घटनायाः वर्णनं सुरवरं प्रतापरेड्डिविरचितलेखे निजांराष्ट्रमुलोनि आन्ध्रसंस्थानमुल-चरित्रनामके उपलभ्यते। संस्कृत अकाडमीप्रकाशनेषु अन्यतमे सुरपुरसङ्क्षिप्त राजकीयेतिहासे घटनायाः अस्याः विपुलं वर्णनमुपलभ्यते।)

नवमः अध्वरोल्लासः – 25 श्लोकाः

वनपर्तिराष्ट्रकृत्यभारं विमृशन् गोविन्दनायकः पुत्रस्य रामचन्द्र-नायकस्य परिणयोत्सवं प्रवर्तयन् राजानमानेतुं सङ्कल्पितवान्। तावता रामेश्वररायः स्वयमेव समुपागत इति निशम्य गोविन्दनायकः अनुजेन साकं तं प्रत्युद्गतः। महता वैभवेन परिणयमहोत्सवः निवृत्तः। तदनु रामसागरोपवन-प्रान्तसज्जीकृते पटमण्डपे विप्रेभ्यो राजा उपायनानि वितीर्य सम्मानितवान्। सुब्बाशास्त्रिमुखात् अद्वैतभाष्यं श्रीमद्भागवतं गीतादिभाष्याणि उपनिषदश्च अधिगतः वेङ्कोबनायकः।

तदनु राज्ञः आह्वानमङ्गीकृत्य समागतं श्रीमत्तोताद्रिविष्णुचित्त-रामानुजयतीन्द्रसम्प्राप्ततुर्याश्रमं श्रीरामानुजयतीन्द्रं निजाचार्यं धर्मपत्न्या शङ्कराम्बया साकं परिपूज्य तं प्रस्थाप्य भाग्यनगरेन्द्रस्य सैनापत्यम् अनुभवन् तदाज्ञया मक्थलाभिधानां सेनानिवेशस्थलीं कतिचन दिनानि अधिवसन् कालं निनाय रामेश्वरः। मण्डलेन्द्रमन्त्रीन्द्रेण लेखापूर्वकं प्रेषितं चन्द्रहासं पारितोषिकाणि च स्वीचकार राजा। श्रीरङ्गनाथराजनगररामकृष्णादिदेव-

In Public domain. Digitization Muthulakshmi Research Academy

दिव्योत्सवान् प्रतिवत्सरं कुर्वन् कवीन्द्रान् सम्मानयन् निजराष्ट्रे कतिचन दिवसान् सुखेन निनाय राजा।

गोविन्दनायकः यापर्लाख्ये पुरे अग्रहारं निर्ममे। श्रीवेङ्कटाद्रिं गत्वा देवस्य मूर्तिम् आनीय यापर्लाख्याग्रहारे देवालयं निर्माय विग्रहप्रतिष्ठापनाय क्रतुद्वयं कारयितुं कृतसङ्कल्पः जातः। वेङ्कोबनायकाय तद्दायित्वं दत्तवान्। रामेश्वररायस्य आनयनाय स्वपुत्रं रामचन्द्रनायकं प्रेषयामास गोविन्दनायकः। तत्र समागताय रामेश्वराय उपकार्यायां वासः कल्पितः। श्रीनिवासदिव्यमूर्तेः प्रतिष्ठापनं कृतम्। तदनु श्रोत्रियेभ्यः अग्रहारभवनावलिः वितीर्णा। महत्या श्रद्धया क्रतुद्वयं प्रवर्त्तितम्। अध्वरवर्णनम् अन्नसत्रस्य च वर्णनं बहु रमणीयमस्ति। राजा वेङ्कोबगोविन्दनायकौ प्रशस्य तदनु निजराधानीं प्राप्तः।

दशमः राज्यभारोल्लासः – 38 श्लोकाः

गोविन्दनायके निक्षिप्तराज्यभारः रामेश्वरः विगतचिन्तः वनपर्त्तिराष्ट्रं परिपालयति स्म। गोविन्दनायकः स्वगृहाङ्गणे दिव्यभवनं निर्माय विठ्ठलदेवं प्रतिष्ठाप्य भजति स्म। राजा उचितकरप्रसरणं मण्डलम् (क्रि.श.1861) अददात्। रामेश्वररायः श्रीरङ्गपुर्यां देवालयं निर्माय नीलां देवीं प्रतिष्ठाप्य रथमपि निर्ममे। प्रतिशरदं रङ्गपतेः दिव्योत्सवान् कारयति स्म। यदा मण्डलेन्द्रामात्येन आह्वायितः तदा रामेश्वररायः भाग्यनगरात् निवृत्य <u>मक्थलाभिधाननगरपरिसरं</u> प्रविश्य राजकृत्यं निर्वर्तयति स्म। तदा गोविन्दनायकस्य अनारोग्यविषयं ज्ञात्वा निजजन्मदिनमङ्गलोत्सवम् उपस्थितमपि उपेक्ष्य वनपर्तिपुरमागत्य निजसचिवं गोविन्दनायकम् अवलोकयामास। पञ्चत्वं प्राप्तं मित्रं विलोक्य दुःखभारेण विदीर्णहृदयः मक्थलाभिधानां राजधानीं पुनः प्रविवेश। केषाञ्चन दिनानाम् अनन्तरं वेङ्कोबनायकमाहूतवान् राजा। अग्रजपुत्रेण रामचन्द्रनायकेन सहागतः वेङ्कोबनायकः। तस्मिन् राज्यभारं निक्षिप्य वनपर्तिराज्यं प्रैषयत् रामेश्वरः। शेषशैलाग्रभागे श्रीभर्तुस्सन्निधौ शङ्करम्बास्वसारं <u>जानक्यम्बाभिधानां</u> रामेश्वरः पाणौकृत्य स्वनगरमभजत। देवालयान् आरामांश्च निर्ममे राजा।

In Public domain. Digitization Muthulakshmi Research Academy

प्रजाः रामेश्वरस्य कथां गायन्ति स्म। भाग्यनगरे पूर्वस्मादप्यधिकतमेन सेनाधिपत्याधिकारेण मण्डेलेन्द्रेण सम्मानितः रामेश्वरः। देव्यै शङ्करम्बायै पेद्दगुडाभिधानं ग्रामं प्रदाय रचितवसतिः रात्रौ शयानः स्वप्ने श्रीरङ्गनाथं ददर्श। तात रामेश्वर ममाज्ञया अवतीर्णः खलनागनिग्रहाय। अन्ये च रिपवः निगृहीताः। निर्वर्त्तितानि निखिलान्यपि अवतरणकारणानि कृत्यानि। अविलम्बेन विसृज्यतां भूमिम्। बन्धुभावेन स्नुषाया सञ्जीवाम्बाभिधानाया गर्भे जनिष्यते पञ्चषैरेव दिनैः बालः तव राज्यपरिपालनार्हः। शङ्करम्बा वनपर्तिराज्यं परिपालयितुमर्हतीति अभिधाय देवः अन्तर्हितः। वनपर्तिपुरात् वृद्धानाहूय भागवतपारायणसप्ताहम् आयोजितवान्। वेङ्कोबनायकमपि आहूतवान्। आमयग्लानशरीरः रामेश्वरः रङ्गनाथानुज्ञया तव भ्रातरं गोविन्दनायकम् अहमपि अनुगच्छामि। प्रजाः भवता संरक्षणीया इति स्वप्नोदन्तं वर्णितवान्। भगवदाज्ञानुसारं सञ्जीवाम्बापुत्रं समानीय मम तातपादस्य रामकृष्मराय इति नामधेयं प्रतिष्ठाप्य प्राप्ततारुण्यं तं सिंहासने अभिषिञ्च इति वेङ्कोबनायकमुपदिष्टवान्। धर्मपत्न्यौ आश्वासयन् कानिचन दिनानि दैवचिन्तने राजा निनाय।

सञ्जीवाम्बायां शुभे समये सुतः जातः। बालस्य जन्मोदन्तं विदित्वा मुदितः रामेश्वरः।

एकादशः परमपदोल्लासः – 11 श्लोकाः

चरमदशामापन्नः रामेश्वररायः पत्नीं शङ्करम्बां कर्त्तव्यं बोधितवान्। स्वानुज-रामकृष्णरायादयो नावमान्याः। वेङ्कोबनायकं झङ्कप्रमुखान् पुरस्कृत्य यावदुपपन्नतारुण्यो भविता रामकृष्णरायः कुमारः सर्वमपि रक्षणीयं भवत्या इति उक्त्वा भगवन्तम् अनुचिन्तयन् रामेश्वररायः परमपदम् (पेद्दिगूडग्रामः हिजरी 1284 क्रि.श. 1866) अगात्। सर्वे दुःखसन्तप्ताः बभूवुः। तस्य परमपदगमनोत्सवं महता वैभवेन निरवर्तयन् वनपर्त्तिराज्याधिकारिणः।

In Public domain. Digitization Muthulakshmi Research Academy

सालावर्जङ्गभिख्यः सचिवः रामेश्वरस्य मरणवार्तां निशम्य दुःखितः। स्वकीयचमूमुखे प्रतिदिनमुखं प्रोद्यद्भेर्यादिवाद्यशुभार्भटीं रामेश्वरपरमपदप्राप्तेः निषिद्य दिनत्रयं शुभबहुमतिं शङ्कराम्बायै प्रजिघाय सचिवेन्द्रः। दुःखतप्ता शङ्कराम्बा तद्ग्रामं त्यक्त्वा **पेब्बेराख्यनगरीं** न्यविक्षत। सालावर्जङ्गभिख्येन सचिवेन प्रेषिताः अधिकृताः शङ्कराम्बायाः सम्माननाय उपायनानि तत्पुरीं निन्युः।

द्वादशः कुमाराभ्युदयोल्लासः – 39श्लोकाः

कुमाराभ्युदये उल्लासे रामेश्वररायपुत्रस्य (दत्तपुत्रस्य) रामकृष्ण-रायस्य बाल्यं भाग्यनगरे सालावर्जङ्गसचिवेन्द्रेण कृतं सम्माननं पट्टाभिषेक-महोत्सवञ्च वर्णयामास कविः।

स्मृत्वा राज्ञः वचनानि शङ्कराम्बा **झङ्कनामा** प्राज्ञं बालम् आनेतुं प्रैषयत्। राज्यभारं वोढुम् अधिकृताः पुरस्कृत्य वेङ्कोबनायकं राज्ञीं शङ्कराम्बां प्रार्थयामासतुः। देवीं कथञ्चन अनुनीय कुमारेण साकं विजयमुहूर्ते सिंहासनम् आरोपितवन्तः। मण्डलेश्वरप्रणिहितं पारितोषिकं प्रदापितवन्तः। ऊर्जे मासि प्रथमे दिने वनपर्त्तिनगरे वासः तस्यै राज्ञ्यै कल्पितः। रामेश्वरेन्द्रेण प्रत्यग्र-निर्मापितं **रामसागराख्यसेनानिवेशस्थलीमध्यमध्यासीनमद्भुतं सौधं** राज्ञी सपरिवारा अवतारयामास।

मन्त्रिराट् (सालावर्जङ्गः) पुत्रेण साकं श्रीशङ्कराम्बां नगरमाहूतवान्। सपुत्रा शङ्कराम्बा नगरं ययौ। **सालावर्जङ्गसचिवेन्द्रः नासर्दौलावनीन्द्र-तनुजन्मने अब्जरद्धौलाभिधानाय भाग्यनगराधिपतये सर्वं निवेद्य तदाज्ञया इन्द्रजिद्बहदुरभिधानभाग्यनगरेन्द्रास्थानलेखकाग्रगण्यनन्दनं शिवराजबहदुरा-भिधानं** श्रीशङ्कराम्बायाः सपरिवारायाः प्रत्युद्गमनाय प्रैषयत्। राज्ञीम् उपकार्यां सबहुमानं प्रावेशितवान्। केषाञ्चन दिनानाम् अनन्तरं प्रतिगमनाय अनुज्ञा प्रार्थिता। मन्त्रीन्द्रस्य आज्ञया वेङ्कोबनायकः रामेश्वरसुतेन रामकृष्णरायेण साकं राजास्थानं गतः। मन्त्रीन्द्रः असम्पूर्णैकवत्सरं बालं लालयित्वा राजत्वबोधक-

In Public domain. Digitization Muthulakshmi Research Academy

मुद्राङ्कितं शासनपत्रमयं वेङ्कोबनायकाय दत्त्वा रामकृष्णरायराज्याभिगुप्त्यै तम् आज्ञाप्य शङ्करम्बायै जानक्यम्बायै च पारितोषिकाभरणानि प्रदाय तान्निजनगरं प्रेषयामास। वनपर्त्तिनगरं प्राप्तवतां राजपरिवारजनानां सादरं स्वागतं चक्रुः प्रजाः। रामेश्वरनिर्मापितं दिव्यप्रासादमासाद्य भद्रासने निषण्णा शङ्करम्बा कुमारेण साकं रात्रिं अत्यवीवहत्।

गच्छता कालेन प्राप्तयौवनं रामकृष्णरायं <u>प्रभवशरदि तस्याम् आश्विने मासि विजयदशम्यां</u> (क्रि.श. 1867-68) भद्रासने उपवेश्य वेदविदः अभिषिषिचुः। रामकृष्णरायः वनपर्तिराज्यं परिपालयन् चिरादेधते। काव्यमत्र समाप्तिमेति। राजवंशरत्नावल्यां कृष्णकविः अकालमृत्युग्रस्तं रामकृष्णरायं वर्णयति[11]।

रामेश्वररायपुत्रः रामकृष्णरायः अश्वविद्याविशारदः। षोडश वर्षीयोऽयं यदा अश्वारूढः तन्त्रीम् उल्लङ्घयति स्म तदा प्रमादवशात् अश्वात् पतित्वा पञ्चत्वं गतः। तदनु दत्तपुत्रत्वेन स्वीकृतः रामेश्वररायः (II) चिरं राज्यं परिपालयमास। तदनु रामेश्वररायः (II) (1866-1922) चिरं राज्यं पालयित्वा पञ्चत्वं गतः। तस्य कृष्णदेवरायः रामदेवरायः जानम्मा चेति त्रीणि अपत्यानि आसन्। कृष्णदेवरायस्य पुत्रः जनुम्पल्लि रामेश्वररायः (III) (1923–1998) रामदेवरायस्य (III) पुत्री नन्दिनीदेवी Orient Blackswan इति प्रकाशनसंस्थायाः निर्वहणदायित्वं वहति। नन्दिनीदेव्याः परोक्षसाहाय्येन संस्थानस्य कर्मकरस्य योगिरेड्डिवर्यस्य प्रत्यक्षसाहाय्येन सम्पादकीयमिदं सज्जीकृतमिति प्रकटयितुं नितरां मोमुदीति मे चेतः।

कृतज्ञतासमर्पणम्

रामेश्वरविजयचम्पूप्रबन्धः तेलुगुलिप्या मुद्रित आसीत्। एका जीर्णा तेलुगुभाषालिपिबद्धा प्रतिः संस्कृत अकाडमीग्रन्थालये आसीत्। उदारमतिना

---

[11] रा.र. 43,45

तेलुगुभाषाविद्वद्वरेण्येन श्रीमता वैद्यं वेङ्कटेश्वराचार्युलु महोदयेन द्वितीया प्रतिः तेलुगुभाषालिपिबद्धा संस्कृत अकाडम्यै प्रदत्तासीत्। वनपर्त्तिसंस्थानराज वंशजेषु अन्तिमस्य राजारामेश्वररायस्य दुहित्रा Orient Blackswan इति प्रकाशनसंस्थायाः निर्वहणदायित्वं वहन्त्या नन्दिनीवर्यया आदिष्टः संस्थानकर्मकरः योगानन्दवर्यश्च वनपर्तिसंस्थानचरित्रम् आन्ध्रभाषा-निलयरजतोत्सवसञ्चिकाम् अन्यानि चित्राणि च प्रदाय काव्यस्यास्य अवगमने सम्पादकीयलेखने च निस्तुलमुपकृतवान्। एतेभ्यः मे सारस्वतबन्धुभ्यः सर्वेभ्यः बद्धाञ्जलिरहं कार्तज्ञ्यं निवेदयामि। सारस्वतकर्मणि सदा मम साहाय्यम् आचरद्भ्यः अकाडमी विद्वद्भ्यः सुब्रह्मण्याय सूर्यप्रकाशाय सन्तोषकुमाराय जोषी भरद्वाजाय च कृतज्ञतां समर्पयामि।

सातत्येन ग्रन्थसम्पादनकर्मणि मां ये प्रचोदयन्ति तेभ्यः अकाडमी निदेशकेभ्यः श्रीमद्भ्यः आचार्य के. नीलकण्ठमहोदयेभ्यः कृतज्ञताम् आविष्करोमि।

इति बुधजनविधेया

डॉ. के. वरलक्ष्मीः

असोसियेट् प्रोफेसर (रिसेर्च)

संस्कृत अकाडमी उस्मानिया विश्वविद्यालयः हैदराबाद

श्रीक्रोधिनामसंवत्सरे दक्षिणायने शरदृतौ आश्विनमासे एकादश्यां कलियुगाब्दः 5125

13 मई क्रि.श. 2024

In Public domain. Digitization Muthulakshmi Research Academy

वनपर्त्तिसंस्थानराजसौधम्

Wanaparthy Samsthan



Logo of Raja Rameshwar Rao of Wanaparthy Samasthan

In Public domain. Digitization Muthulakshmi Research Academy

వనపర్తి సంస్థానాధీశులు, కీ. శే. మహారాజా
(ప్రథమ) రామేశ్వరరావు బహద్దరు.

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

शुभमस्तु

श्रीहयग्रीवाय नमः ।

श्रीमते श्रीनिवासब्रह्मतन्त्रपरकालमहादेशिकाय नमः।

श्रीमते श्रीनिवासदेशिकेन्द्रब्रह्मतन्त्रपरकालमहादेशिकाय नमः।

रामेश्वरविजयाख्यचम्पूप्रबन्धः ॥

अम्भोजव्रजदर्पडम्बरममू त्वत्प्रेयसो लोचने
तन्वा ते विधुतं त्वमम्ब दयया रक्षेति पद्मालयाम् ।
प्राप्तोऽभ्यर्थयितुं किलाम्बुजसुहृच्छेषाद्रिभूषामणे
र्वक्षस्थोऽनुदिनं श्रियं रचयतादुन्मस्तभाः कौस्तुभः ॥१॥

हृदये हि राजभासुरमञ्चमुदारं सदा गिरां प्राप्त्यै ।
कलये हि तं ददानं धामपुराणं तुरङ्गराजाख्यम् ॥२॥

सकलभुवनभारवाहशीर्षं प्रकटयितुं स्वमिवात्तवाहशीर्षम् ।
निगमशिखरदेशिकेन्द्रभाग्यं सुगुणनिधिं हृदि वन्दिषीय तेजः॥३॥

काप्यागच्छति मामकीनभवनं त्रैलोक्यसम्मोहिनी
मेनां द्वारि न मुञ्चतात्र विदितं गोपीविटत्वं हरे ।
श्रुत्वैवं गदितं श्रिया प्रतिर्यन्मोहिनीरूप
भाक्चक्रे तद्गरुडाद्रिशेखरमणेर्लक्ष्मीं कृपीष्टस्मि (स्म) ॥४॥

In Public domain. Digitization Muthulakshmi Research Academy

वर्षासञ्जृम्भमाणानिलवलयभरस्पर्शनात्यर्थदृप्य
त्कावेरीमध्यजाग्रझ्झरमददमनप्रौढिभिर्गूढभावैः ।
मन्दं वागीशमप्यारचयतिनिमिषाद्यः परं वाग्विलासै
श्श्रीनिवासब्रह्मतन्त्रादिमपदकलिजिद्देशिकेन्द्रस्स जीयात् ॥५॥

वादाः कुदृशां शमिता जलदेनेव प्रतीपतद्वाच्याः ।
येन गुरुं कलये यं तमिमं नाम्नार्थतश्च ममता तम् ॥६॥

शेमुष्याचूष्य भाष्यं फणिपतिफणितं युक्त्युदर्कांश्च तर्का
नालोच्य प्राच्यभङ्ग्या परिगत निगमोत्तंसमीमांसकोक्तिः।
तादृग्वाचाटकोटीरति चतुरतरैर्वाग्विहारैरुदारैर्यो
धूनोति स्म सोऽयं जगति विजयतां सञ्ज्ञयाचार्यवर्यः ॥७॥

गिरिं हस्ते धत्तां धरतु धरणिं वापि जलधौ
विधत्तां सेतुं वा हरिरपि विना यत्र कथनम् ।
उदग्रां विख्यातिं जगति न लभेतैव सततं
नमस्तस्त्यै कुर्मस्सुकविकवितायै निरवधि ॥८॥

प्राचीनानलधर्मजार्जुनमुखा व्यासादिभिः कीर्तिता
स्तान् प्रत्येव क एष मादृशगिरां यत्नः प्रशस्त्यै भवेत् ।
तद्युक्तं नवराजवर्णनमिदं दुग्धेन गोष्ठेऽप्यलं
कस्सन्तोषयितुं यतेत पयसा दुग्धाब्धिरोधस्थितान् ॥९॥

श्रीमन्तः परिपूर्णसद्गुणगणास्सन्त्येव भूमौ नृपा
स्तान्यः कोऽपि च वर्णयेद्यदि कविश्श्रेयस्करः केचन ।

In Public domain. Digitization Muthulakshmi Research Academy

निन्दन्त्वेनमसूयया नरमयं स्तौतीति तत्रोत्तरं
ना विष्णुः पृथिवीशितेति वचनं तत्स्यात्कथं नृस्तुतिः ॥१०॥

नृपतिस्तुतिकृत्कृतिकुलनिन्दनचतुरैस्समत्सरैः कस्मात् ।
यद्यद्विभूतिमदिति श्रीभगवद्वाक्यहेलनं न कृतम् ॥११॥

स्पष्टं भगवद्गदितं हन्त नराणां नराधिपोऽहमिति ।
तच्चरितवर्णनमपि प्रविनिन्दन्तः कथं सुधीमन्तः ॥१२॥

अथापि ग्रन्थेऽस्मिन् गरुडगिरिमूर्धन्यमति
स्स नाथो रङ्गेन्द्रोऽनुपदमपि तद्भक्तनृपतेः ।
चरित्रं चाङ्गत्वेति ननु रामायणमुखप्रबन्ध
द्रष्टैवं क्वचिदपि न निन्देत्किमतरैः ॥१३॥

प्राक्तनकृतेर्निशमनादपि दोग्ध्यानन्दमभिनव कृतेश्श्रवणम् ।
मुग्धाया विभ्रम इव न निष्कलाया मुदे विलासो यूनाम् ॥१४॥

सरसकविवचन परिमलमभिजानन्ति हि बुधा न जात्वन्ये ।
प्रतिपर्वतशिखरस्थैर्नह्युपलैर्गृह्यते सूची ॥१५॥

सरसकवितासारास्वादादुदारमतिर्बुधो
भवति विवशो यद्वन्नस्यात्तथा जडधीर्जनः ।
द्रवति हि यथा ज्योत्स्नासारैस्सुधांशुशिलातलं
न हि तथा शैलेशैले स्थितो दृषदां व्रजः ॥१६॥

रसं रसज्ञस्सरसेक्षुखण्ड इवास्मदीये कवने नितान्तम् ।
आस्वाद्य निष्ठीवति नीरसानां त्वचां समूहानिव दोषलेशान् ॥१७॥

In Public domain. Digitization Muthulakshmi Research Academy

गद्यम् ॥

इह खलु निखिलसुरासुरनरावलिधराधरपरागतधराङ्गनामणि
वाराशिनीरान्तरशयानदयानिधिनिजदयितरमापतिसमालिङ्गनमङ्गलार्थ
प्रसारितभुजवल्लिकामतल्लिकायुगसन्देहसन्दोहसन्दोहनदृष्णुतृष्णापहा
कृष्णागोदावरीमध्यसमेधमानभाग्यभाग्यनगरदेशार्णोजकर्णिकायमान
घनकीर्तिवनपर्तिराजधानीदेशरक्षणविचक्षणधौरन्धर्यबन्धुरस्य निखिल।
देवदानवगन्धर्वसिद्धविद्याधरानासाद्य हृद्यानवद्यविद्योतमानसाहसकर्म
निर्माणालङ्कर्मीणमतिवैभवोर्मिलशर्मावहधर्माचरणोदञ्चितक्षीरार्णव
माराहितहीरामृतधारालसदैरावतसीरायुधसौरागमधारालरुचिरा राजित
कीर्तिस्फूर्तिस्निग्धदुग्धाम्बुधिमुग्धान्तरकृतशयनाम्बुजनयनायमान
गगनाभोगस्य प्रत्युप्त प्रत्नरत्न चित्रभित्तिकानिकामविकासिनिकाय्यवर्य
निर्यत्न निर्यत्प्रभा परिरब्धशुद्धशातकुम्भस्तम्भसम्भृत जम्भारि मणितुला-
सम्भाराभ्यर्णसमुत्कीर्णमुकुरनिकुरुम्ब बिम्बितजाम्बूनदा प्रतिमप्रतिमा
सुषमावलोकन समाकलितरमाकृति सन्देहकन्दलित हृदयारविन्दपुरन्दर-
सुन्दरीबृन्दसभक्त्यामुक्तमन्दारदामामन्दसन्देह दाननिदानवितानावलम्ब-
मानस्वच्छमुक्तासरगुच्छविसरपरिशोभित विविधकौतुकास्थानसभास्थान-
कलितास्थ मनीषिकदम्बसम्भृत मोदावहवादाहवकोलाहललीलाकर्णन
समुदीर्णकर्णहर्षस्य प्रतिदिन समुदग्रसौधाग्रसभापर्वन्तनिरन्तराकलित-
चटुलनटनवारसारङ्गीदृगङ्गीकृत सङ्गीतभङ्गीविवशान्तरङ्गीकृतसर्वङ्गण-
तरङ्गिणीरङ्गदुत्तुङ्गतरङ्गमालिकाडोलिका केलिकासक्तमरालिकाबालिका-
पालिकासविलासग्रहणकौतुकसञ्चरच्छम्बायुधपुरनितम्बिनीकदम्बपदाम्बु-

In Public domain. Digitization Muthulakshmi Research Academy

रुहावलम्बिमञ्जुमञ्जुमञ्जीरशिञ्जित व्यञ्जितस्वसजातिरसित भ्रमपरिभ्रमद्-भ्रमरपक्षविक्षेपविकीर्णसौवर्णार्णोजरजोराजिशङ्काकलननिपुणनिज-दर्शनार्थनिबिडितानन्तसामन्तक्षमाकान्तसन्ततिदुरन्तसम्मर्दपरस्परघर्षणो-त्कर्षविकीर्णकाश्मीराङ्गरागपराग परावर्तितधूलीसमुत्क्षेपणकेलीभर मदाकुलमदावलपदाघट्टननिष्पिष्टमङ्गल रङ्गवल्लीमतल्लीमौक्तिकतति-प्रतिहाराग्रजाग्रदुदग्रचत्वरसत्वरविसृत्वरभटपटलावेद्यमानप्रतिक्षणविविध-विषयवृत्तान्तस्य रणधूर्वहगर्वोत्पत दुर्वीधरखर्वेतरगर्वानलनिर्वापण चण्डिमोद्दण्डदोर्दण्डाग्रहिण्डमानाव्यग्र मण्डलाग्रखण्डितनभस्थल्लोट्टङ्कित-कालयवनजालसौवर्णशीर्षण्योत्तुङ्गोत्तमाङ्ग लक्षनिरीक्षणक्षणोन्मीलित-स्वर्भानुशतमुख गर्भनिर्भरग्रस्तानेक मार्ताण्डमण्डलभ्रमाश्चर्यश्लाघा-वचनमन्त्रपठनपूर्वकानन्दसिन्धुकृत मज्जनसज्जनकर्णानन्दकरचरित्रस्य श्रीमदुत्तररङ्गेन्द्रकरुणावरुणालयोत्तरङ्गितवैभवस्य सकृन्निरीक्षणश्रवण-मात्रलब्धविविधलिपिभाषाविलेखन भाषणवैखरीसम्पादिततत्तद्देश-जनाश्चर्यस्य विचित्रवीर्यस्य श्रीमत्सवै राजा बलवन्तबहदुरित्यादिभाग्य-नगरेन्द्रप्रदत्तबिरुदाभिरामस्य दुरासद पराक्रमधरातलविराजितपराग्र-गनराधिपवरावलिनिराकृतिभराद्भुत तराधिकविक्रमक्रमजनस्तोमेश्वरस्य रामेश्वरस्य राजाधिराजस्य धर्मपत्न्या तदनुगुणशीलया निरन्तरविसृमरा-नूनानर्घदानारम्भसमुदित्वरजलधारा साराभिषेकसंवर्धितकौतुकोपघ्ननिघ्न-निस्समाननभः कायमानोद्वेल्लन दुर्ललितधार्मिकतामल्लीमतल्लीलतावितानविशोभितयशोभरस्वच्छतरगुच्छ वतंसितदशदिशानिशाकरमुखी निबिरीसकबरीभरया विविधविचक्षण रक्षणदक्षिणया कदाचिदुदारतेजसं बालसूर्यमिव सन्ध्यया उदयाद्रि मधिरूढया निजनन्दनमतिबालं

 In Public domain. Digitization Muthulakshmi Research Academy

रामकृष्णरायं बलवन्तबहदुरित्यादि बिरुदोल्लसितं पुरस्कृत्य साम्राज्य-सिंहासनमधिरूढया सचिवासननिषण्णाभ्यां निरन्तरहृदयान्तरविहरमण विश्वम्भरभारातिशयेनेव गाम्भीर्य निष्पन्दमनोहरशरीराभ्यां अनुदिनस-माश्रितजनमनोरथाधिक सम्पन्निस्तंद्रदायकाभ्यां वेङ्कोबरामचन्द्रनाय-काभ्यां अनुक्षणनिवेद्यमान साम्राज्यकार्यभारया यथामर्यादं निषण्णैः कुशाग्रमतिभिः कृतिभिः घनैरधिकृतजनैश्च भासमानायामसमानायां सभायां सभायां वीज्यमानया पुत्रीवत्सलेन क्षीराब्धिराजेन राज्यलक्ष्मी परिचरणाय प्रेषिताभ्यामिव निजान्तरङ्गतरङ्गाभ्यां मृणालधवलाभ्यां कलकिङ्किणीरवकङ्कणाञ्चित किङ्करीकरदोधूयमानाभ्यामुड्डामराभ्या-श्चामराभ्यां निजयशोविजित शशाङ्कबिम्बया शङ्कराम्बया समर्यादमाहूय निजनिर्मित परकाल गुरु विजयाख्यचम्पूप्रबन्धनिशमनावसर श्रीमच्छ्री-निवासब्रह्मतन्त्रपरकालगुरुवर करुणाकटाक्षसमासादित कविसार्वभौम-बिरुद अस्मद्राजाधिराजाद्यनन्त क्षितिकान्तनिरन्तर बहुविधबहुमतिवृत्ति-प्रदानसम्मानित श्रीमदात्म कूरपुरेश्वरमुक्करकुलाब्धिसोमसीताराम-भूपालबहुतर सविलास श्रीनिवासविलासाभिधानचम्पूप्रबन्ध स्वीकरण-समयकान्ततरदन्तकुन्त दन्तावलाग्रघटित कनकमण्डपारोपण महोत्सव-पूर्वकवितीर्णसौवर्णराङ्क वसान्द्रचन्द्रहार प्रमुखाभरणवृत्तिकविगण्डभेरुण्ड-बिरुदाङ्क श्रीमदुत्तर रङ्गेन्द्र करुणासमेधितस्यास्मद्राजशेखरमणेश्चरित्र-मतिविचित्रं यथावदादितो ललिततरैः पदैरभिवर्णयन्नानन्दय चम्पूप्रबन्धेन तूर्णमस्मानिति दत्तानुज्ञो विधत्ते प्रत्यग्रदुर्गकृतवसतितातार्यवर्य-द्वैतीयीकनन्दनः कृष्णकविर्वेङ्कटार्यवर्यानुजन्मा सन्माननीयगुणानुबन्धं प्रबन्धम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

सिन्धुमिवास्मद्ग्रथं मन्थानेनेव चेतसा मथ्नन् ।
विषमिव दोषं हित्वा मणिमिव गुणमाददातु विबुधेन्द्रः ॥१८॥

कृष्णागोदावरीसंवलयितवनपर्तीन्द्रदेशान्तरालेऽ
भ्यर्णे श्रीरङ्गपुर्या गरुडगिरिरिति क्ष्मातले ख्यातनामा ।
इन्धे कश्चिन्महीध्रस्स्वशिखरनिलयं रङ्गनाथं दधानो
बिभ्राणोऽसावपर्तावपि जलदमिति भ्रान्तिदोयः प्रकामम् ॥१९॥

लसदरिचक्रां गरुतस्सेनां निर्धूय यो जिगाय दिवम् ।
विनतानन्दनशीलः कथमिव गरुडाभिधां न धत्तेऽयम् ॥२०॥

चतुराननोऽपि यस्मिन्नेकां दृष्टिं वहंस्तपस्तप्त्वा ।
रङ्गाधिपदर्शनतस्तुङ्गामष्टौ दृशो निनाय मुदम् ॥२१॥

तपस्तप्त्वा यस्मिन् सुचिरमथ रङ्गेन्द्रकृपया
बलादुड्डीय द्यां समितिशतमन्युं विरचयन् ।
धृतान्वर्थाभिख्यं विदधदुपहारं भगवते
गरुत्मान्व्यातेने बत नवसुधां प्राप्तवसुधाम् ॥२२॥

नागान्तकगिरिरयमिति भियास्य पादे सदा परिचरन्तु ।
नागाश्चित्रं त्वेतच्चक्री पुष्णात्यमुं शिरस्थो यत् ॥२३॥

सोऽयं सदाशुकविराजितशाखिबृन्द
संसेव्यपाद इति युक्तमिदं यदस्य ।
शृङ्गे मुनीन्द्रमनसामपि यो दवीया
न्रङ्गेश्वरस्स्वपिति सन्ततमात्तमोदः॥२४॥

 In Public domain. Digitization Muthulakshmi Research Academy

युक्तमयङ्गरुडाख्यस्सुशोभनखराजि शिखरधृतनागः ।
आश्चर्यमिदन्तु परं यदपक्षतिपक्ष एष शैल इति ।।२५।।

निर्व्याघातसुधामुखाम्बुलहरीरिङ्गत्तरङ्गच्छटा
वातोद्धूततमालजालललिते तस्मिन्नहार्योत्तमे ।
श्रीभूमीकरपद्ममार्दवरसाभिज्ञाङ्घ्रिपङ्केरुह
श्शेतेतत्कुचसाम्यकौतुकवशाच्छ्रीरङ्गनाथो हरिः।।२६।।

हरिं नीलं रत्नं गिरिशिरसि जातं कलयता
ज्ञनोऽयं मच्चित्तं कलयति हि गारुत्मतमणिं
गरुत्मच्छैलाग्रे यदयमुदितः किन्तु समरे
तृणं शत्रूनेव प्रतिपदमयं खादयति हि ।।२७।।

सिन्धुक्षारजलावसन्नरसनस्ताक्ष्यद्रिमेत्य द्रुतं
तत्रापीयं सुधामुखाम्बुमधुरं पीतोदभाराकुलः ।
उद्गन्तुं धुतशक्तिरम्बुदशिशुस्तत्र स्थितः प्रायशो
नैवं चेदमृतं कथं नु जगते दद्यादयं श्रीपतिः ।।२८।।

कान्तां रमां यस्य समग्रलोकान्यत्यस्ततद्वाच्यमपत्यमाहुः ।
तस्य श्रियं सुन्दरताञ्च को वा रङ्गेशितुर्वर्णयितुं समर्थः ।।२९।।

गद्यम् ।।

तस्य च भगवतो निखिलजगदुत्पत्तिस्थितिविलयकारणस्य दुस्तरभवजलधि विषयमहावर्तपरिवर्तनविविशार्तजनदुरार्तिलताकर्तन प्रहरणस्य प्रणमदमरपरिबृढविकटमकुटतटखचितरुचिरमणिगणघृणि

In Public domain. Digitization Muthulakshmi Research Academy

लहरि विहरमाणनलिनायमानचरणस्य त्यक्तबहुचित्तभववृत्तिपटुभक्ति रससिक्तनिजचित्तभवमुक्तजनमनस्सौधनिराबाधविहरणस्य महार्घमहा स्ततिनिरस्तदुस्तरतमस्ततिनिस्तुलरमास्तनस्तबक वास्तव्यकस्तूरिकामोद प्रशस्तिसौवस्तिककौस्तुभाभरणस्य रमालोचनचकोरहरिणकिरणस्य क्षमाचित्त सरोजषट्चरण्यनीलाविलासविहारशरणस्य शरणागतभरणायत्त करुणस्य विनतात्मजसुभगङ्करणस्य निखिलमुनिजनपरायणस्य श्रीमन्नारायणस्य गरुडभूधरकोटीरकोटीनीलरत्नस्य चिरत्नस्य निखिलरिपु कुलभङ्गदायकस्य रङ्गनायकस्य निरवधिकरुणावरुणालयसमुज्जृम्भित-तुङ्गतरतरङ्गसन्देहसन्दायि मङ्गलकरापाङ्गलहरीप्रसरणैकतानशरणायितो गोप्ता सज्जनानां क्षेप्ताऽसज्जनानां संहर्ता रिपुजनानामुद्धर्ता नतजनानां कर्ता बहुधर्माणां परिष्कर्ता व्यवहाराणां तिरस्कर्ता चाक्रमाणामुपकर्ता मित्राणामपकर्ता तदमित्राणां स्मर्ता धर्मशास्त्राणां धर्ता राजनयनां दाता मनोरथानां नेता महारथानां श्रोता पुराणां ध्याता भगवद्गुणानां ज्ञाता भूतभाविवृत्तान्तानां त्राता नितान्ततान्तानां जेता सर्वदिशानां विनेता चावशानां विधाता महाश्चर्याणां सन्धाता वीरवर्याणां बोद्धा महौचित्यानां रोद्धा शत्रुपुराणां दोग्धा पुरुषबलानां द्रोग्धा शत्रूपजापकानां नन्ता वृद्धानां गन्ता युद्धानां वेत्ता चातुर्याणां भेत्ता पापचर्याणां त्यक्ता दुश्शक्तीनां वक्ता सद्युक्तीनां योक्ता योगानां भोक्ता भोगानां कोऽप्यष्टभाषा गोपालराय वेङ्कटेन्द्रमुखनृपालकुलचूडामणी रामकृष्ण-रायनामा तरणि समानधामा धरणिपतिस्तस्माच्छिलोच्चयादुदीच्यां दिशि योजनद्वये पुरातन धरापतिनिर्मितायां परिकर्मितायां शातकुम्भस्तम्भ-सम्भृतसमुदग्रसौधाग्रैर्वनपर्तिराजधान्यां घनकीर्तिराजमान्यां साम्राज्य-

 In Public domain. Digitization Muthulakshmi Research Academy

श्रियमनुभवन्नभिभवन्निजभुजप्रतापप्रभावेन प्रजानां समस्तसाध्वसानि गोपायति स्म करदीकृत भूपालमण्डलो भूमीमण्डलम् ॥

सच्चक्राणां प्रमोदं कलयति वसुभिर्भास्करः क्लृप्तसङ्घै
र्दत्वोपात्तैरभावात्पुनरपि न कदाप्यम्बरत्यागशीलः।
नैवास्य प्राभवेषु प्रचुरकविबुधप्रष्ठगोष्ठीप्रशस्तिः
क्त्वैतादृश्चण्डभानुः क्व बहुवितरणो रामकृष्णाक्षितीन्द्रः॥३०॥

बहुमुखरिपुबाणकरप्रजलवनविचक्षणात्मविक्रान्तिः।
श्रीरामकृष्णसंज्ञां कथं नु न वहेत नृपतिमणिरेषः ॥३१॥

लेभे देशानलब्धानतिचतुरमतिः पालयामास लब्धान्
शान्तात्मा पालितांस्तान्नृपकुलतिलको वर्धयामास नीत्या ।
वृद्धान्पात्रेषु भक्त्या बहुतरविनयाप्यायितोऽदात्प्रमोदा
ल्लेभे मान्धातृधर्मार्जुननलसगरश्लाघितां कीर्तिपूतिम् ॥३२॥

तटाकान्निर्माय क्षितिपतिरसौ हन्त शतश
स्स्वराष्ट्रं सम्पूर्णं सुचिरदिविषन्मातृकमपि ।
जवेन व्यातेने किल बहुनदीमातृकमिव
प्रभुस्स्वातन्त्र्याढ्यो ननु न किमिवेष्टं रचयति ॥३३॥

शिशिरान्तरङ्गरीतिं बिभ्राणास्ते प्रसन्नगम्भीराः ।
समकरमथ निजदेशं कुर्वाणा अन्वकुर्वत नृपालम् ॥३४॥

प्रत्येकं परिगृह्य तत्तदुदिताभिप्रायजातं रसं
पुष्पौघात्सरघेव मन्त्रिनिवहादालोच्य साध्वात्मना ।

 In Public domain. Digitization Muthulakshmi Research Academy

चक्रे क्षौद्रमिव प्रकाममधुरं कृत्यं प्रजानां हित
प्रेप्सू राजशिखामणिः प्रमुदितास्तेन प्रजाश्चाभवन् ॥३५॥

प्रजानां सन्तन्वन्विभवमधिकं भूपतिमणिः
करं जग्राहायं न खलु निजभूत्यै कृतमतिः ।
उपादाय स्वल्पं जलमथ घनः कोटिगुणितै
र्मनोज्ञैरम्भोभिस्सरिदधिपतिं पूरयति हि ॥३६॥

भूतभविष्यत्कालौ न्यविशेतां वर्तमानमस्यद्यौ ।
दिविषत्तटिनीजलमिव पूरौ यमुनासरस्वत्योः ॥३७॥

सच्चरितदत्तहृदयानाच्चारम्बेत्यमुष्य जायासीत् ।
रामामणिर्द्वितीया रामाम्बानाम रामकृष्णविभोः ॥३८॥

जघन्यां जायां मामभिदधति राज्ञोऽस्य मनुजा
स्सपत्नीं श्रेष्ठां मे कथमिव सहेयेऽति ललना ।
द्वितीया सापत्न्यक्रुधमिव वहन्ती प्रथमतः
प्रपेदे रामाम्बा निजदयितनामादिमदलम् ॥३९॥

गद्यम् ॥

एवं परिपालयतोऽपि धरामण्डलमस्य नराधिपतेर्नन्दनावलोकनानन्दो वसुन्धरयां स्थितस्य मम नोदञ्चत्येवेति योगदृष्ट्या विज्ञायापि राज्ञां तनये नावश्यं भाव्यमिति नितान्तचिन्ताप्रतान्तनिजान्तरङ्गस्य रङ्गाधिराजं रमाकान्तं स्वान्ते सञ्चिन्त्य शयानस्य जातुचिन्निशान्ते निशान्ते राजासावहमिवाहितलक्षणस्सन्तानालाभचिन्तादन्तुरितान्तरङ्ग

In Public domain. Digitization Muthulakshmi Research Academy

इति शङ्कातङ्कमिव कलङ्कं स्फुटतरमुद्वहति कुमुद्वती कामुके पश्चिमामुखे अविलम्बं लम्बमाने महाराज विप्लवसमयमन्दमन्दसमुदञ्चितशीर्षखल-जनानुकारिषु दूरे दूरे शनैश्शनैरङ्कुरदाकारेष्वन्धकारेषु विरलविरलेषु सन्ध्याराग वैश्वानरज्वालाजालसंशोष्यमाणेषु कालगोपालभूपात्र दुग्धेषु चन्द्रमण्डली धेनुक्षीरपूरेष्विव ज्योत्स्नापूरेषु निर्भरनिजतापावलेपावलोपाय कृपयाभ्युपया त इव घनाघनो भगवान् खगवाहनस्स्वप्ने स्थित्वा पुरतः क्षणं कृत्वा च नयनानन्दं पर्जन्यगर्जनतर्जनोर्जस्वलेन स्निग्ध-गम्भीरेण स्वरेण वत्स मा भैषीः कान्दिशीकः किं दिशो विलोकसे भाष्पायमाणाभ्यां लोचनाभ्यां का वा भीतिर्मयि स्थिते पुरतः तव पश्य मां निजकुलदैवतं गरुडगिरिशीर्षण्य नीलरत्नं चिरत्नं पुमांसं न लभ्यते खलु त्वयेहजन्मन्यौरसतनयवदनावलोकनामोदो दुःखायैव केवलं दुर्लभवस्तुप्रेप्सा तदवधार्यतां वार्यतां सन्दोहो मन्देतरो भवदीय-विषयान्तराल एवास्मदभिधानधरे पुरे कुत्रचित्पत्रि राजांशरमणीयो रमणीमणेः रमणाम्बाभिख्या याश्शुभाभिख्याया गर्भे निर्भरं समेधते भवदीयसाम्राज्य परिपालनाय गत्वा तत्र यस्य भवनस्य मूर्धनि परिभ्रमत्यदभ्रवेगाञ्चितो नागान्तकोऽनुदिनं सुकुमारः कुमारस्तत्रोदयते मोदयते च भवदन्वयं नन्वयं चन्द्रमण्डल इव गगन मण्डलं प्रतीक्ष्य सज्ञनैस्तज्ञननसमयं जातमात्रमेकपुत्रमानाय्य दानान्यनूनानि विधाय निधाय निजमन्दिरे बहुसुन्दरे संवर्धय वलक्षपक्ष इव जैवातृकशिशुं जैवातृकशिशुं स एष तव तनयो विनयोदन्वान् भविष्यत्यतिदेवाचार्य मति चातुर्यमतिकुलाहार्यं धैर्यमत्यर्जुनं शौर्यमतिसमुद्रं गाम्भीर्यमति-कल्पवृक्षमौदार्यमतिवसुन्धरं स्थैर्यमतिकालानलं क्रौर्यमतिपुरन्दरं

 In Public domain. Digitization Muthulakshmi Research Academy

धौरन्धर्यमतिकुबेरमैश्वर्यमतिप्रह्लादं हरिकैङ्कर्यमतिभरतं माधुर्यमतिकन्दर्पं सौन्दर्यमतिचन्द्रं सौकुमार्यमभिवर्धिष्यतेऽस्य बालस्य शुभलीलस्य मम कृपयाव्यपयातु ते भयञ्चयं विदन्तेऽभिनन्द्यते जाराजासावोजायमान-भुजार्गलनिरर्गलप्रतापः प्रतापयति प्रत्यर्थिपृथ्वीपतिगणान् फणाधरानिव विहङ्गमेश्वरो रामेश्वर नामा भूमावेष बहिरीबलवान्बहदुरिति बिरुदस्फुर-दात्मयशा दिशासु भविष्यति भविष्यति च भवतो भद्रमुन्निद्रमित्यभिधाय चरणारविन्दशरणागतेन सानन्दमभिष्टूयमानश्शरत्कालान्तर इव नीलाम्बुदो व्यतीयाय क्षितीशानस्य नयनपदवीमदवीयसा लक्ष्मीविलास-मयेन समयेन ।

प्रबुद्धोऽसौ दध्यौ खगशिखरिधामा क्व नु हरिः
क्व चामी दुर्दान्ता वयमपि कृपैषास्य कियती ।
शरच्चन्द्रजोत्स्नाशिखरिणि तटाके वनतरौ
मरौ सौधे वापि प्रसरति निरोद्धास्य क इव ॥४०॥

वयं धन्या नूनं बत बहुदिरात्सम्प्रति मह
त्कुलं चास्माकीनं भजति किल माहाजनिकताम् ।
यदेतर्हि श्रीमांस्त्रिभुवनशरण्योऽस्य दयते
यदस्मिन् स्वांशेनोद्भवति च गरुत्मान्नृपवपुः ॥४१॥

विचित्रं जानीते चरितमिह को वा भगवत
स्तृणं मेरुं मेरुं तृणमपि च कर्तुं प्रभवति ।
मरुं सिन्धुं सिन्धुं मरुमपि निमेषात्पुनरपि
क्षितिं व्योमव्योम क्षितिमपि वदामोऽत्र किमिति ॥४२॥

In Public domain. Digitization Muthulakshmi Research Academy

न जातोऽस्मद्गर्भे शिशुरिति विषादो मम कुतो
गुणश्लाघ्यस्सोऽयं तनय इव हृद्यो ननु मम ।
इहान्य द्वीपे वा प्रचुररुचिरुन्मीलतु महा
नुरस्योऽयं न स्यात्कथमिव नृपाणां मणिरिति ।।४३।।

तावच्चिन्तयते नृपाय भविता पुत्रस्तवैवं जवा
दित्थं सूचयितुं किलेन्द्रककुभो गर्भादुदैद्भानुमान् ।
पुत्राभावदुरन्तचिन्तनमपि क्ष्मापालचूडामणे
स्सत्रासन्तमसैः प्रशान्तिमगमत्फुल्लं हृदब्जैस्समम् ।।४४।।

गद्यम् ।।

तदनु रचिताञ्जलिबन्धोऽरविन्दबान्धवायानन्दबन्धुरान्तःकरणो वसुन्धरारमणो विरचिताह्निककृत्यस्सत्यवतामग्रणीरग्रनीतया सेनयाऽनूनया कवचितामिव विरचयन्वसुधां वसुधासुधाशनान्निधाय पुरतः परितुष्ट हृदयान्सदयान्निर्गत्य वनपर्तिराजधान्या धन्यमात्मानं मन्यमानो जलधि राजन्यकन्यकाकान्तकटाक्षवीक्षणप्रसरणेन दक्षिणानुवर्तनविचक्षणत्व मात्मनस्सूचयितुमिव दक्षिणस्यां दिश्यतिक्रम्य योजनद्वयं प्रविश्य शुभान्तरङ्गनरं रङ्गपुरन्तुङ्गतरशृङ्गं पुङ्गवयुगलं निर्मलाम्भस्सम्भृतं कुम्भयुग्मं सुवासिनीभ्यामानीयमानमन्यानि चैवं विधानि निमित्तान्यत्यादरेण साक्षात्कृत्य भावयन्नन्तरङ्गे रङ्गेन्द्रवचनानि मधुररचनानि स्वप्नोदितानि मुदितामुपनतां ग्रामीणजनतां विधृताभ्यर्हणामर्हयन्नयनाञ्चलेन चञ्चलेन पुरतोऽविरतोदञ्चितखगेन्द्रसञ्चारं किञ्च वनितान्तकान्तं निशान्तं विलोकयन्निदमेव तत्सद्म पद्मनाभेन यदाज्ञप्तमिति विज्ञाय विज्ञानि

In Public domain. Digitization Muthulakshmi Research Academy

चूडामणिः प्रविश्य तत्र तैः कृतसपर्यः किमेतदित्यवार्याश्चर्यनिष्पन्दनेत्रैर-स्पन्दगात्रैरानन्दपात्रैरकृतस्तौत्रैरनभिज्ञतया नागरिकरीतेश्चित्रार्पितैरिव प्रतिमाविशेषैरशेषैस्तैर्नयनाञ्जलिभिरास्वाद्यमाननिजवैभवः अग्रतो व्यग्रतया निजदर्शनलज्ज्ञाजनितया मन्दमन्दमुपसर्पन्तीं मन्दिरान्तरमति प्रयत्नेन सखीजनदत्तहस्तावलम्बामन्तर्गर्भनिर्भरसमेधमानगरुडांशतया अन्तर्विराजमानद्विजराजमण्डलामत्र्वाङ्गथनात्क्षीरोदधेरिव स्फारोर्मिमभ्यन्तर समुज्वलन्महामणिमिव महाखनिं अबहिर्गतसिंहकिशोरसुन्दरामिव विन्ध्याद्रिकन्दरां अनुद्योतितप्रद्योतनबिम्बामिव शम्बायुधदिशं प्रसन्नवदनसितकिरणबिम्बां रमणाम्बां निरीक्ष्य सैषा खल्वस्मत्साम्राज्य-लक्ष्मी शिरोमणिनिधानपेटीवधूटीति निश्चित्य हृदये समुपसृत्य परिमितपरिवारो भाग्यवति भवति भवत्या आविर्भूतो गर्भे प्राज्यमस्मद्राज्यं पालको बालको निखिलजगदानन्दनो विनतानन्दनांशो नन्दनोऽयं मम भवितेत्युत्तरङ्गमुत्तर रङ्गेन्द्रशासनमिदं निशमयनिर्व्यूढमचिराद्भवतु त्वया तनयसान्निध्यव्यतिरेक वैक्लब्येन मावलम्बिष्ट तव हृदयं शिरीषकुसुममिव चण्डाशुतापेन म्लानतां जानतां किमस्त्यावेद्यमिति क्रमात्तां समादिदेश ॥

रमणाम्बापिच भूमीरमणवचश्श्रवणजनितभयकुतुका ।
सजलदशेषसुधाकरमधुराशरदुदयरजनिरिव रेजे ॥४५॥

साञ्जलिबन्धा वचनैर्मञ्जुतरैस्सा नृपालमानर्च ।
नवपद्मिनीव विकसन्नलिनालिरवैर्दिनेशमौषसिकम् ॥४६॥

In Public domain. Digitization Muthulakshmi Research Academy

यथात्थ श्रीमंस्त्वं धरणिपतिमूर्धन्य तदिदं
तथास्तु प्रत्युक्तिं वदति विषमां का तव भुवि ।
श्रुतं क्षीरोदन्वत्यहह जनिमात्रं परमिमं
जगन्नाथो धत्ते स्वहृदि सततं कौस्तुभमणिम् ॥४७॥

नितान्तं ज्योतिष्मानपि जनिगृहेष्वेव सततं
वसेच्चेज्ज्ञानीते क इव तमिमं भूपतिमणे ।
उदीतो दुग्धाब्धेरुदरभुवि शुभ्रांशुरुदयं
गिरिं नारोहिष्यद्यदि समभविष्यन्नविदितः ॥४८॥

सोऽयं सद्मनि मादृशां यदि वसेत् पक्षीश्वरांशः किमु
स्यादेतेन नृपालबालकमिमं जाने तवैवोचितम् ।
तत्तादृङ्निजमन्दिरे यदि निधिर्लब्धोऽतिलुब्धो जनः
किं तेनानुभवेद्वदान्यवशगश्चेदेष भोग्यो नृणाम् ॥४९॥

यद्वस्तु यत्र भव्यं तत्तत्रैव हि विराजते नृपते ।
गगनतल एव भानुः पद्मं पद्माकरेष्वेव ॥५०॥

वयमेव रामकृष्णावनिपाल तव प्रजास्त्वया गुप्ताः ।
मद्गर्भज एष पुनस्सद्गुणभूषण तथाकथं न स्यात् ॥५१॥

श्रुत्वा तद्वचनमथ प्रहर्षिणीं तामुद्वीक्ष्य क्षितिपतिरेष पूर्णगर्भाम् ।
राजन्वान्निजविषयोऽधुनेति चित्ते मन्वानस्सपदि स निर्वृतिं प्रपेदे ॥५२॥

In Public domain. Digitization Muthulakshmi Research Academy

निरवर्तत तुरगगतः पुरमभिगन्तुं तरङ्गितप्रमदः ।
नरपतितिलकस्सरयं निरुपमकरितुरगभटपटलचटुलः ॥५३॥

पुरमथ प्रतिपद्य महामनाश्चिरमयं समचिन्तयदादरात् ।
द्रुतविलम्बितयोरिह कालयोस्सुतमुखं कलयेय कदान्विति ॥५४॥

रामेश्वरविजयेऽस्मिन्नादिममुल्लासमतनुत विलासात् ।
नवदुर्गाभिजनश्श्रीकृष्णः कविगण्डभेरुण्डः ॥

इति श्रीमच्छ्रीशैलकुलतिलकप्रत्यग्रदुर्गतातार्यवर्यद्वैतीयीक नन्दनस्य कृष्णाम्बागर्भसम्भवस्य कृष्णकविसार्वभौमस्य कृतिषु रामेश्वरविजयाख्ये चम्पूप्रबन्धे प्रारम्भोल्लासः प्रथमः ॥

श्रीमते श्रीनिवासाय परब्रह्मणे नमो नमः ।
श्रीरस्तु । मङ्गलानि भवन्तु । श्रियै नमः।
रामेश्वरविजयेत्र-१- प्रारम्भोल्लासः ।
॥ समाप्तः ॥

In Public domain. Digitization Muthulakshmi Research Academy

शुभमस्तु

श्रीहयग्रीवाय नमः ।

रामेश्वरविजये - २ - प्रादुर्भावोल्लासः

द्विरदालसगमनानां सुरदानवसिद्धमर्त्यमहिलानां ।
स्मरदाननिपुणमहिमा शरदागम एकदाविरास तदा ॥१॥

धनुर्धरशिखामणिर्जगति कश्चनोदेत्यऽसौ
मदीयधनुरम्बुदक्षणविभूषणं नोचितम् ।
प्रदर्शयितुमित्यदस्सपदि निर्जराणां पति
र्भृशं किल तिरोदधे प्रबलतोऽबलानां भयम् ॥२॥

मदकलनाकखेलदमृतद्युतितुल्यरुचि
त्रिदशपतिद्विपस्य विलसन्ति वियन्मुकुरे ।
प्रतिकृतयोऽद्य नूनमिति सर्वमहाकवयो
नियतमतर्कयन्त शरदभ्रचयान्विमलान् ॥३॥

रुचिगर्जितरूपैर्निजरिपवस्सम्प्रति घनाघना दिव्याः ।
विमदा इति मत्वा किल समदा जाता घनाघना वन्याः ॥४॥

प्रावृषि जलक्ष्ममुक्ते दिविजपथे जीवनात्ययशुचेव ।
व्यभ्राजिषत नितान्तं शुभ्रास्ते शरदिजा जलदाः ॥५॥

निजांशोऽस्मिन् गेहेऽवतरति नृपाधीशशिशुरि
त्युदग्रां बिभ्राणो मुदमिव गरुत्माननुदिनम् ।

In Public domain. Digitization Muthulakshmi Research Academy

वदन्कृष्णा३ कृष्णा३ इति हि रमणाम्बामणिमहा
गृहस्याग्रे व्यग्रं व्यचरदिदमाबालविदितम् ॥६॥

तदानीम् ॥

त्रेतासिन्धुक्षमाभृत्सितकिरणमिते शालिवाहे शकेऽस्मि
न्नब्दव्यूहे प्रयाते विषुशरदि शरद्याश्विने मासि रम्ये ।
शुक्ले पक्षे तृतीयेऽहनि दिवसकरापत्यवारे विशाखा
तारे मीनाख्यलग्ने विलसति सुषुवे सा सुपर्णांशमुर्व्याम् ॥७॥

जातस्सम्प्रति बालको गुणमहानस्मत्पतीनामयं
मात्राभिः परिकल्पितश्चिरमिदं गोपायति क्ष्मातलम् ।
इत्यानन्दवशात्प्रसन्नवदना जातास्समस्ता दिशोऽ
प्यन्ये तादृशि तस्य जन्मनि नरा न स्युः प्रसन्नाः कथम् ॥८॥

जगति सलिले प्रसन्ने जगतीशशिशोर्महोदयादस्य ।
लोकानामगस्त्योदयमाकाङ्क्षन्ति स्म शरदि बत तत्र ॥९॥

सलिलं प्रसन्नमखिलं भुवि समुदिते नरेन्द्रतनुजाते ।
तदरिकुलानां त्वभजत हृदयं परिभवभयादथाविलताम् ॥१०॥

अमुष्य दोर्दण्डबलेन निर्भयं दधाति दीप्तिं भुवि मित्रमण्डलम्।
इतीममर्थं स्फुटयन्नृणां ध्रुवं दधार दीप्तिं दिवि मित्रमण्डलम् ॥११॥

अदो भुजच्छायसमाश्रयाद्भवेत्सदा प्रसन्नं द्विजराजमण्डलम् ।
इतीदृशार्थं जगतां विभावयत्तदा प्रसन्नं द्विजराजमण्डलम् ॥१२॥

 In Public domain. Digitization Muthulakshmi Research Academy

भ्रमयति हि तेजसारीन् भूमिपतेर्बालकोऽयमेवमिति ।
ज्वलनः प्रदक्षिणशिखाकलनः क्रतुभूषु हविरुपादत्त ॥१३॥

मत्तनुजावनदक्षिणरमाख्यामादितो ह्यसौ धत्ते ।
इति हर्षभारविवशो मन्दं मन्दं ववौ किल समीरः ॥१४॥

आत्ममनोरथलतिकास्सफलास्सर्वेऽपि मेनिरे सुधियः ।
उल्लसति सुपर्णमयप्रसवे सुभगे किमेतदाश्चर्यम् ॥१५॥

कर्णे कर्णे ब्रुवत्यः किमपि सरभसं दूतिका बालिकेयं
जातेत्यादौ क्षणार्थं सजवमथ पुनस्सूतिकासद्मनोन्तात् ।
आगत्याहुस्सहासं धरणिपतिकुलश्रेणिभूषामणीन्द्र
स्सोऽयं जातः कुमारो लिखत सरभसं जन्मलग्नं मुदेति ॥१६॥

तनुजमथ जातमात्रं मात्रा साकं मुदा तदारोप्य ।
आन्दोलिकां नरपतेर्मन्दिरमानिन्युराज्ञया केचित् ॥१७॥

तस्मिन्वनपर्तिपुरे विस्मयविवशा जना नृपालसुतम् ।
आनीतं निशमय्य क्षोणीपतिरेष धन्य इति जहृषुः ॥१८॥

प्राग्जन्मन्येष कस्स्यादिति कृतसुकृतः कोऽप्यसावित्युदार
स्स्याद्वा नो वेतिवीरो भवति दृढमिति प्राभवं प्राप्स्यतीति ।
अस्य स्याज्ञन्मलग्नं किमिति बलवती का दशास्येति का वा
किन्नामैतैर्विचारैरिति ननु विदितास्पष्टमेषा दशेति ॥१९॥

को वायं राज्यमापेत्य हह किमु नवं जल्पथेत्यत्र किं वा
ज्ञेयं सर्वं जवेनेत्यभिनवविभवेकः कथं वाञ्चतीति ।

In Public domain. Digitization Muthulakshmi Research Academy

अग्रे स्पष्टं भविष्यत्यखिलमिति च ते तत्रतत्रोत्कटास्थाः
कर्णेकर्णे स्फुटञ्च क्वचिदथ विविधं सञ्जजल्पुर्जनौघाः ॥२०॥

पूर्वाह्लेतनपङ्कजप्रतिभटप्रस्निग्धमुग्धेक्षणं
दीव्यत्प्रावृषिकाम्बुदप्रतिनिधिस्मेराङ्गराराजितम् ।
व्यूढोरस्कमुदारफालमथ तं बालं नृपालाधिपो
मोदाद्वीक्ष्य खगाद्रिशेखरमणिं सस्मार देवं हरिम् ॥२१॥

उद्धासिधेनुकोटिप्रदानमयमादधाति समितौ नूनम् ।
इति मत्वा नृपतिमणिस्तज्जन्ममहोत्सवे तदेवाधत्त ॥२२॥

नरपतिरभिरामत्वाद्बालस्यागर्भमीश्वरत्वाच्च ।
चक्रे रामेश्वर इति चक्रधरस्य स्मरन् गिरां नाम ॥२३॥

सुतजन्मनि नृपतिमणिर्वित्तं मुदितो धरासुरेभ्योऽदात् ।
इच्छाधिकं सुरेभ्यस्स्वच्छांशोर्जनुषि जलधिरमृतमिव ॥२४॥

बालो नाच्चारम्बारामाम्बाभ्यां सुपोषितो ववृधे ।
गङ्गाझर इव यमुनासरस्वतीभ्यां क्रमेण तदा ॥२५॥

आमोदयति स्म परं भूमीशशिशुस्स मातरौ द्वे ।
कुसुममिवैकं मध्ये जातं ललितं पलाशे द्वे ॥२६॥

समवर्धिष्ट स बालः क्रमशो नृपभवन एव धात्रीणाम् ।
स्तन्यपयसा रसालक आवाले जलदजन्यपयसेव ॥२७॥

 In Public domain. Digitization Muthulakshmi Research Academy

जानुभ्यामथ सञ्चरन्तमवनीपालार्भकं सर्वतो
निश्शङ्कं नृपमन्दिरेषु कथमप्यादाय दुर्निग्रहम् ।
एवं चेदधुनैव रूढवयसं कस्त्वां निरुन्ध्यादये
मैवं साहसिको भवेति मुदिता माताह जातस्मिता ॥२८॥

क्षणाद्विन्दानोऽयं मणिमुकुरमन्यत्र विचलन्
क्षणादम्बाभ्यर्णे नरपति स देशेऽथ निमिषात् ।
क्षणात्सोपानाल्यामिति स किल चेटीशतकम
प्यजस्रं व्यातेने लुलितहृदयं चञ्चलतया ॥२९॥

आदौ पदानि मन्दंमन्दं न्यस्यन् क्रमेण बालोऽयं
सरलपदन्यासं लघु विदधे कवितामिवाभ्यस्यन् ॥३०॥

तदानीम् ॥

सर्वोऽब्दोऽपि च चित्रभानुकिरणैराप्यायितो वर्षती
त्येतत्सोढुमनीश्वरो जनवचः पूर्वे गते वत्सरे ।
नूत्नोऽब्दस्स्वयमेव हन्त जगृहे किञ्चित्रभानुप्रथां
प्रायस्सर्वसमाः कदापि दधते नैवान्यतो न्यूनताम् ॥३१॥

तस्याश्शरदो गर्भे शरदजनिष्टेति नाद्भुतं किमपि ।
गौर्गां तुरगी तुरगीं सूते यदि को नु विस्मयते ॥३२॥

आक्रान्ता राजहंसैर्धरणिरतिजवादागतैरन्यलोका
दित्याराद्रामकृष्णप्रभुरधिकरुषा राजहंसाग्रगण्यः ।
त्यक्त्वा क्ष्मां हंसभेदं विदधदतितरां तत्पदं सम्प्रपेदे
द्वादश्यां चित्रभानौ शरदि शरदृतौ कार्तिके शुक्लपक्षे ॥३३॥

In Public domain. Digitization Muthulakshmi Research Academy

धरापतौ तत्र निवर्तितक्रिये स्वराज्यमुद्धूतभयं वितन्वती ।
अपालयत्तद्दयितं सुतं पुनर्नृपालपीठीमधिरोप्य बालकम् ॥३४॥

पञ्चहायनमियं नृपात्मजं चञ्चलं शिशुविहारकौतुकैः ।
वर्णपङ्क्तिपरिशीलनेऽन्यधात्तूर्णमेष लिपिमग्रहीद्गुरोः ॥३५॥
रूढ्यै लिखितान् वर्णान् सिकतासु पुनःपुनस्समार्ष्टि स्म ।
रिपुभूमिपालफालगवर्णैस्साकं नृपालबालमणिः ॥३६॥

सकृदुदितमेव जगृहे स किल नृपालात्मभूरुपाध्यायैः ।
गृह्णात्यह्नायैव हि दर्पणमभ्यर्णवस्तुनो बिम्बम् ॥३७॥

स पुरैव लब्धवर्णो नृपसूनुर्वर्णपङ्क्तिकाभ्यसनात् ।
संस्तुतवर्णः कस्मात्तादृशविख्यातिमेष नाश्रयते ॥३८॥

न किमपि निष्फलमासीद्गुरूदितं तत्र गुणनिधौ बाले ।
काले कृषीवलोप्तं सारक्षेत्र इव सरसतरबीजम् ॥३९॥

राजसुते गुरुगदितं तेजिष्ठं यद्वदन्यतो न तथा ।
शुक्तावेव पयोधेर्मुक्ताकृतिमेति जलदजलम् ॥४०॥

बाल्येऽप्यस्याचख्यौ विनयश्शुभभाग्यं तां भविष्यन्तीं
बालस्य रसालतरोः कुसुमोद्गम इव हि भाविफलवत्ताम् ॥४१॥

अतिहृद्यः कृतविद्यो द्विगुणिततेजा रराज राजसुतः ।
आकरजातं रत्नं शाणोल्लिखितं विशेषतेजिष्ठम् ॥४२॥

विनयपदार्थस्तस्मिन् पदमभजत धर्मभूत एव तदा ।
न कदापि धर्मिभूतो हृद्यां विद्यां क्रमादुपात्तवति ॥४३॥

In Public domain. Digitization Muthulakshmi Research Academy

तेजस्वी कृतविद्यो विनयेनैवाधिकं बभौ बालः ।
सुगुणानुबन्धविधुरा मुक्तामणयोऽपि नैव हृद्यास्स्युः ॥४४॥

गुणास्तस्मिन् सर्वेऽप्यहमहमिकाभिर्निवसन्ति
क्षितीशानाङ्कूरे द्रुतमदधतेन्दावि न कलाः ।
परं नैतच्चित्रं त्रिभुवनशरण्यो गुणनिधि
र्यदेतस्य स्वान्ते गरुडगिरिधामा विहरते ॥४५॥

गद्यम् ॥

एवं यथाक्रममवक्रमतिश्चक्रवर्तिनन्दनोऽसावधिगतान्ध्रवर्णः परिशीलितमहाराष्ट्राक्षरः स्वायत्तीकृतकर्णाटवर्णः वशीकृतद्राविडलिपि रथ्यस्य यवनानीं नैकविधामधिगत्य हूणाक्षराणि त्तत्तद्भाषाभिस्सम मधीत्य काव्यानि संश्रुत्य पुराणानि विशोध्य दण्डनीतिं विचार्य तुरग शिक्षामासाद्य गजशास्त्रं सम्प्रेक्ष्य सामुद्रिकमालोक्य रत्नाशास्त्रमालोच्य महेन्द्रजालं विज्ञाय शिल्पविचारं विबुध्य जौतिषं सम्प्राप्यायुर्वेदं विभाव्य भरतमभिनन्द्य सङ्गीतं गृहीत्वा खड्गचालनचातुरीं क्वचिदारूढाश्वः क्वचिदाढौकितमदावलः कदाचिदासादितरथस्सञ्चरन् कदाचन मृगयां पर्यटन्नभिवर्धमानो दिने दिने जातुचिन्निजमेधाविशेषबोधाय समागत्य क्षमाकान्तकिशोर कथयन्ति कुशाग्रीयामग्रीयां विशारदास्तव प्रतिभां प्रतिभावयामि किञ्चिदहमपि निशमय संशमय मम संशयं केनचि द्वसुन्धरा धुरन्धरेण बन्धुरतरान्धतमसव्यूहो भूमीगेहे कतिचन दिनान्यसूर्यम्पश्यतां प्रापितः कश्चन जनो दुश्चरापराधरचनः कलितविमोचनोऽनन्तरमेव कति दिनानि भूमीगृहे वसतस्तव व्यतीयुरितीरितस्तत्र सभास्तारै-

In Public domain. Digitization Muthulakshmi Research Academy

रियन्ति व्यतीतानीत्यन्यूनाधिकं दिनसङ्ख्यां वदति स्म विस्मयं सर्वेऽपि खर्वेतरमविन्दन्त कारणं किमस्य एतावन्तं समयं गाढान्धकार एव रूढावसतेरतीतदिनपरिज्ञानायात्र हृद्यं सद्य एवोत्तरं प्रवर्तयितव्यं त्वयेति हूणविद्योपाध्यायेन कृतानुयोगो नितान्तवेगत एव द्व्याहिकज्वरकम्पस्तदानीमुत्पन्नस्स्यात्तस्येति कारणं सन्देहवारणमभिहितवानन्यांश्चैवंविधान् प्रतिभाविशेषपरीक्षकान् परस्सहस्रानुयोगान्वेगादेव प्रत्युत्तरयन्ननुपदमेव तत्तद्युक्तिनिशमनजनितामन्दानन्दान्तरङ्गेण तेनाग्रगण्योऽसि प्रतिभावतां स्वभावत एव विभावसोरिव प्रभातवाभिवर्धिष्यत इति श्लाघितो जगज्जेगीयमान शौर्यौदार्यधैर्यचातुर्यः कदाचन मुदा घनैर्मन्त्रि जनैर्विरचितपट्टाभिषेकश्शिष्टावलिरक्षणदक्षिणो निजनगराभ्यर्ण एव निर्मितस्य रामसागराभिधानस्य विहारस्थानस्याभितस्सेनामनूनां सज्जीकृत्य हूणानीकचङ्क्रमणवैखरीं शिक्षयन्ननुक्षणं पक्षिराजगिरिरमण चरणनलिनार्पितनिखिलसाम्राज्यभारोत्कर्षो द्वादशवर्षो बालोऽपि शुभली लोऽपलितशीर्षामकम्पितकरचरणां कामपि वृद्धतां दधानोऽत्युद्धत दुर्धुदरविरुद्धयवनविशेषनिरुद्धां ताटिकोण्डपुरीं बुद्ध्वा बद्धाञ्जलितद्धाम जनाभ्यर्थितस्सार्धं निजध्वजिन्या समासाद्य तां पुरीं निर्धूय क्रुद्धो युद्धेन बद्धस्पर्धांस्तान् लब्धलक्षो धनुर्धरमूर्धन्यो विधाय निराबाधन्त तत्रत्यजनयूथमवाप्य वनपर्तिपुरीं तत्र तत्र सोऽयं कालोदितजलदनीलो बालो धीरशीलो लीलोद्धूतविरोधियूथो योधोत्तमैर्दत्तजयजयशब्दस्तूर्णमभ्यागत स्सभ्यानभ्यर्हयन्निजनगरीं न खल्वमुष्य वदनारविन्दं श्मश्रूण्यपि शुश्रूषन्ति कति पुनरेतस्य जातस्य वत्सरास्स्तनन्धय एवायं हन्त धूलीकेलिरमुष्य सङ्गररङ्ग एव समजनिष्टाभिवर्धिषीष्ट चिरतरमस्म-

In Public domain. Digitization Muthulakshmi Research Academy

द्राजाधिराजोऽयमितिसौधाग्राधिरूढानां पौरललनामणीनामुदासीन एव वचनानि निजभुज विक्रमस्तावकानि निशमयन् प्रविश्य निजमन्दिरमभिवन्द्य मातरमभिनन्दितस्तया पुत्रवत्सलया वत्स नेदृशमुचितं साहसं तव क्क पुनर्महावीरैरपि दुर्ग्रहो विग्रहः क्क पुनस्स्तनन्धयो बालो लीलोचितस्त्वं दिष्ट्या दृष्टोऽसि विजतारिरित्याश्वाशितोऽम्ब नृपालकुलोदितानां विक्रम इवनान्यः। क्रमो भूषणायते तोषणाय तेऽस्तु विजयो मम विरचय कृपामपारामकुतोभयं विजानीहि रङ्गेन्द्रकरुणासान्द्रं तनयं तवेति विनयोदारगम्भीरैर्वचोभिराश्वास्यतामनन्तरमेवमेव निरुद्धकन्दूरुपुरानपरान् यवनभटानुभयथापि विरचय्य विमुखवर्णांस्तूर्णमेव लब्धविजयः प्रविश्य निजराजधानीं दिनानि कानिचित्तत्र समनीनयत् ।

अत्रान्तरे ॥

श्रेष्ठास्संयति रामकृष्णनृपती प्रष्ठागरिष्ठागुणै
भूपालाश्शतशश्शिरस्सु नितरामापादितोपायनाः ।
तत्तादृग्यदपाङ्गवीक्षणलवैर्दत्तातिमात्रादरा
राजास्थानसभान्तरे निजनिजान् धन्यान् परं मन्वते ॥४६॥

सोऽयं वैभवभोग्यभाग्यनगराधीशोऽतिथीशोभितै
रारात्संसदि गीयमानमनिशं श्रीरामकृष्णप्रभोः ।
पुत्रस्याद्भुतशौर्यधैर्यधिषणाचातुर्यचर्यादिकं
शुश्राव प्रमदोत्तरङ्गितमना अश्रान्तमुज्जृम्भितम् ॥४७॥

In Public domain. Digitization Muthulakshmi Research Academy

कीदृक्षं नृपबालशौर्यमिति तद्दृष्टुं कनत्कौतुक
स्सम्राट् सोऽपि नितान्तदीप्रविनयानम्रं प्रवीणाग्रगम् ।
स्वप्रातीपिकयत्तसंज्ञनगरी सम्प्राप्तवासावनी
नाथस्य प्रविनिग्रहाय रभसादाज्ञापयामासत ।।४८।।

तच्छासनेन सैन्यैराच्छाद्य वसुन्धरान्धराधीशः।
यत्तपुरीमुत्तरतोयत्ततरैस्सह भटैर्निरुन्धे स्म ।।४९।।

निर्धूय तत्र भूपं यत्तं प्रजिगाय राजसूनुरयम् ।
युक्तोऽसौ वीराणां यत्तस्त्यैव हि जयो लोके ।।५०।।

रामेश्वरधरणीपतीरथमारुह्यात्मनगरमभिपेदे ।
कीर्तिस्तु तस्य दिक्पतिनगरीमध्ये विहारमायिष्ट ।।५१।।

विनिशम्य भाग्यनगरावनिनाथस्सोऽयं राजसूनुजयम् ।
मुदितमना एनं दृक्पदवीमानेतुमलमचीकमत ।।५२।।

गद्यम् ।

अथ कदाचिदुदारतरनिजविक्रमक्रमकरदीकृतनरदेवशतसहस्र विकटमकुटशिखरखचितरुचिरमणिगणसहविलासयोग्यभाग्यनगर मण्डलेश्वरप्रणिहिताज्ञापरतन्त्ररामेश्वरभूमीश्वर वितीर्णतन्नगरप्रस्थानार्थ दुर्लङ्घशासनजाङ्घिकचित्ततया मुच्यमानसैन्धवानां बद्ध्यमानपल्याणानां न्यस्यमानकविकानां परिष्क्रियमाणदन्तावलानाम् उत्कम्प्यमान कुन्तावलीनामुद्ध्रियमाणनलकानामुक्षिप्यमाणकौक्षेयकाणां प्रविश्यमान वारवाणानां प्रतिमुच्यमानग्रैवेयकाणामामुच्यमानसारसनानां गृह्यमाण-

In Public domain. Digitization Muthulakshmi Research Academy

च्छुरिकाणां नह्यमानशीर्षण्यानाम् आरुह्यमाणशथाङ्गानामुह्यमान खेटकानां नर्त्यमानघोटकानां सज्यमानक्रमेलकानां विभज्यमान पङ्क्तीतीनां नुद्यमानस्यन्दनानां छाद्यमानधरणीनामुद्धूयमानोत्कम्प शाटिकानां कार्यमाणगजेन्द्रगर्जितानां क्रियमाण क्ष्वेलारवाणां चाल्यमानवशानां वेल्ल्यमानकशानां आस्फाल्यमानकुम्भीन्द्र कुम्भानां निरुध्यमानाजानेयानां वल्यमानवनायुजानाम् आस्फोट्यमानारट्टजानाम् आघट्ट्यमानविजयभेरिकाणाम् आच्छोट्यमानपाणितलानाम् अट्यमानकाम्भोजानां विचेष्ट्यमानप्रभिन्नानाम् आवेष्ट्यमान शीर्षण्यचेलानाम् उन्नट्यमानोष्ट्राणामेहि याहि देहि धेहि निधेहि विधेहि पाहि ब्रूहि हरस्व विहरस्व प्रहरस्व परिहरस्व विजयस्व मोदस्व कदा निर्गमिष्यति राजचूडामणिर्बहिः किं विचारयति कुत्र विजयते कस्समयो निर्गत एवेदानीं न किञ्चिदप्यवकाशस्सावधाना भवाम इति जल्पतां प्रतीक्षमाणानाम्। तदर्शनम् उज्जृम्भितप्रतापच्छटानां धिक्कृत प्रतिभटकरटिघटानां बहुधैर्यस्फुटानां रणरङ्गोन्नटानां कीर्तिनिर्मलित-दिक्तटानां निर्भरहर्षोत्कर्षोत्कटानां मदारुणाञ्चलदृक्पुटानामत्युद्भटानां भटानां पटलैश्चटुलैर्निरन्तरमभवत्समन्ततो वनपर्तिपुरं निजसम्पद्धि-धूतामरपुरम् ॥२॥

पद्यम् ॥

पूर्वं रामेण धूतोऽभवमवनिपते राम एवेश्वरोऽस्य
प्रायः क्षन्ता मदागस्ततिमिति समुपागत्य रामेश्वरस्य ।
भृत्यैराहन्यते स्म ध्रुवमतिरभसा दुन्दुभिस्स्वामिधूतां
स्तद्भक्ताः प्राप्तकालं परमजिनधरान् किं नु नो शिक्षयन्ति ॥५३॥

 In Public domain. Digitization Muthulakshmi Research Academy

कृत्वाप्येतेऽतनुश्रीहरणमिह सदादानधाराभृतां नः
प्राप्ता नित्यं घनत्वं मुहुरपि विषदाः प्रौढवत्सत्पथेषु ।
उच्चैर्गर्जन्त्यलज्जं सपदि जलधरा निर्दयं मर्दनीया
इत्युदण्डात्म शुण्डा इव विदधुरिभा रंहसा बृंहितानि ।।५४।।

सौवीराधिपतेः पुरास्मदभिधाख्या तस्य शीर्षच्छिदा
लीलायां रचिताश्रमस्य कृतवान् पार्थस्य साह्यं रविः ।
छन्नः कृष्णसुदर्शनेन तमिमं द्राक्पातयामः खुरै
रित्युत्क्षिप्य ववल्गुरग्रचरणान्नूनं तदा सैन्धवाः ।।५५।।

निजकान्तिजवहरं रविरथमिव जेतुं पताकिकाहस्तान् ।
गगने प्रसारयन्त्योऽजृम्भन्त प्रत्यनीकमपि रथ्याः ।।५६।।

गद्यम् ।।

तावदेव देवादिदेवसेवाहेवाकभावानवरतसंसक्तचित्तवृत्तिरुत्तरङ्गित कुतूहलो मण्डलेश्वरदर्शने रामेश्वरभूमीश्वरोऽयं समुत्थाय सिंहसंहन-नस्सिंहासनादुच्चण्डप्रतापप्रभावखण्डितनिजप्रकाशाडम्बरतयाम्बरतला दालम्ब्य विलोकितुममुं निकामसान्निध्यप्रबुद्धसाध्वसस्यन्दमानतेजोधारा सारेणेव सारसमित्रेण सौवर्णच्छत्रेण कनकदण्डमण्डितेन विभूषित मकुटीतटः शुभतरमानसविलासो राजहंसोऽसाववनीतले विहारते बह्वीश्शरद इति सेवनायागताभ्यामिव वलक्षपक्षपक्षिभ्यां चामराभ्या-मभिवीज्यमानः यथोचितं तत्तत्कालेषु भवितव्यं गृहीतकरैर्नृपवरैरिति सूचयन्निव मन्त्रिजनेन पुरः प्रसारितं मृदुतरवसनधरं करमवलम्ब्य द्विरदकिशोर इव शरदम्बुजं करेण शुभतरेण दूरादभिवर्षता मया

In Public domain. Digitization Muthulakshmi Research Academy

एतेभ्यो जनेभ्यो जीवनमश्रान्तं साधुविश्राणितं वा न वेति वत्सलतयावतीर्य धरातले नरानखिलान् सम्भावयन्निवाम्भोधरः कश्चन प्रावृषेण्यो महा नीलमण्यग्रगण्य इव सिंहलद्वीपादुपागतो जम्बूद्वीपविलोकनकौतुकादतिकान्तचङ्क्रमविलासस्समुपसृत्य किञ्चिदन्तरं महाराजात्र निम्नभाग इहोन्नत प्रदेश इह सोपानमार्ग इतः कञ्चुकिनः प्रणमन्तीतोऽभिवर्तन्ते महामात्राः इतो रमणीनाञ्जयनीराजनाविधिरितः प्रत्यग्रसमुपागतानामधिकृतानामर्हणा इतश्चाज्ञा प्रतीक्षा अवरोधरक्षा इतश्च कृताभ्यवहारा राजकुमारा इतश्चायुधागारादानीतान्यायुधानीतश्च प्रस्थानमङ्गलं निर्वर्तयन्ति द्विजा इतश्च सुमुहूर्तमावेदयन्ति सैद्धान्तिका इतश्च निमित्तानि सूचयन्ति शाकुनिकाः इतश्च प्रयुञ्जते जयाशिषो विद्वन्निवहा इति परिजनैरवनम्र पूर्वकायैर्निवेद्यमानमार्गस्सम्भावयमानशिरसा करकञ्जकिञ्जल्क पुञ्जानिवाक्षतजयानक्षतचयान् विप्रनिचयानुगृहीतान्निर्गत्य राजास्थानादग्रतो बहुतररभसवल्गुवल्गददभ्रशुभ्रवाहव्यूहमध्यसमुद्भासमानश्चकचकितरजत परिस्तोमघटितहीरभारमरीचिनिचयनिचोलिता पाण्डरशरीरं मथनसमय समुच्चलद्दुग्धाब्धितुङ्गतरतरङ्गततिसङ्गतिराराजितमिवैरावतम् अनुदिन प्रसारित पुष्करं घनाघनमपि मां महाप्रतिमानावग्रहकरं निरन्तरं महान्तोऽपि वदन्तीति तदपयशः प्रमार्जनाय स्फुटतरं वर्षन्तमिव प्रचुरतरजलशीकर निकरधारासारान् आहोस्वित्पृथुतरकुम्भगोपितबहुरत्नोऽयं मत्त इति दत्तरोषेण निषादिना निपीडितोऽस्म्यनुदिनं किं निसर्गमलिनस्य ममैते राज्ञे समर्पयामीति किरन्तमिव कराग्रेण प्रसारितेन मुक्ताफलनि करान् जलशीकरान्निरर्गलं निष्ठीवन्तं मुदावलमानं मदावलमेनमासाद्य क्षणं श्रीमदुत्तररङ्गेन्द्रचरणा-

In Public domain. Digitization Muthulakshmi Research Academy

म्बुजध्यानदत्तावधानस्समारुह्य तं तदग्रजाग्रदव्यग्र मणिगणमसृणितकनकमण्डपमध्यमध्यासीनो निरन्तरदेदीप्यमानसाम्राज्यलक्ष्मीकटाक्षवीक्षणरुचिनिचयेनेव निजोपरि पुञ्जायमानेन पिञ्छातपत्रविशेषेण सञ्छादितमौलिपार्श्वभागः रचिताभ्युदयोऽसौ राजा विराजत इति साध्वसेन सङ्कुचितानां तुङ्गरङ्गत्तुरङ्गतरङ्गसङ्गत वाहिनीसमुन्मीलदम्बुजकुट्मलानामिवाविरलानां वरूथिनीपति श्रेणीमकुटाग्रभागोदञ्चितानामञ्जलिपुञ्जानां कटाक्षकौमुदीप्रसारणेन चिरस्यापि मूकमुद्रामेवोन्निद्रयन्नग्रतो विजयी भव महाराजाधिराज मूर्धन्यमणे रामकृष्णनृपानन्दवर्धनचिरेणेति स्तूयमानो वन्दिबृन्दैः समन्तादुज्जृम्भितैः कुम्भीन्द्रबृंहितैरुद्दीपितैः काम्भोजहेषाघोषैरुल्लसद्भिर्भटपटलसिंहनादैः उच्छृङ्खलै राजन्यहयाभरणखलङ्खलरवैरुन्मस्तकैः करटिघटाघण्टाघणघणात्कारैरुच्चण्डैर्नलकचटचटात्कारैरुच्चलद्भिः पटहपटलपटपटात्कारैरुद्दण्डैश्शतघ्नीढाङ्कारैः प्रसरद्भिर्भेरीभाङ्कारैरुन्मिषद्भिः काहलक्रेङ्कारैरुदञ्चद्भिर्धनुष्टङ्कारैरुद्वल्गद्भिर्हूणवाद्यझाङ्कारैरुत्पतद्भिरारट्टजघीङ्कारैश्च शब्दब्रह्ममय इव जगति समुल्लसति निर्गत्य निजप्रासादप्राकारतोरणादग्रतोऽव्यग्रतरया समुच्चचाल बद्धविजयनिध्वानया सेनया ॥

पद्यम् ॥

अत्यर्थोदग्ररामेश्वरबलविलसद्वैजयन्तीदुकूलो
न्मीलद्वातूलघातादुपशममयते भानुदीपोऽद्य नूनम् ।
विज्ञायेताथ लोकेन किमपि मनुजैरित्यवन्यात्तभीत्या
तद्गुप्त्यै विस्तृता किं निजवसनदशाधूलिपाली चकाशे ॥५७॥

 In Public domain. Digitization Muthulakshmi Research Academy

गद्यम् ॥

तदनु तत्र तत्र पुरतो निरन्तरकान्तामणिकान्ताकृतिकरसरसिजोत्क्षिप्तकनककलशविलसदनवधिकशस्तकस्तूरिकाघनसारघनसारपूरपूरितसुरभिलजलधारासारभारशीतलितराजपथविकीर्णकुरवकमरुवकदरदलितवकुलमुकुलविकचविचिकिलमल्लीमतल्लीकुसुमसमुदयविसृमरपरिमलपरिमिलदलिकुलझङ्कारव्याजेन प्रकम्पितपताकाभुजलताग्रं न सहे महाराजबहुचिरं तव विरहमविलम्बितमेव पुनर्दर्शय वदनचन्द्रबिम्बमिति प्रार्थयमानामिव निजराजधानीं विलोकमानस्तत्र तत्र निजदर्शनार्थमुदग्र सौधाग्रमिलिताभिः पौरकन्यामणिभिरानन्दबाष्पस्वातीवर्षबिन्दुपतनकुट्मलितशरीरलावण्यसन्धिमध्यनिमग्नकौतुकपुरुषसमुद्धृतपुलकशलाकाविदलिताञ्जलिशुक्तिसम्पुटयथेष्टसमुत्कीर्णैर्मौक्तिकनिकुरुम्बैरिव मल्लीमतल्लीकोरकतारकितैराचारलाजैरहमहमिकयाभिषिच्यमानः क्वचित्परितो विलिखितविचित्रचित्ररेखाविन्यस्तमुक्तामणितारकपरिगतसुमेरुकिशोरायमाणदीपशिखा कलिकाकलितान्तरकनकनीराजनाभाजनाभिरामकरकिसलयकन्या जनजेगीयमानानघतानाञ्चितपद्यविद्योतमाननिजापदाननिशमनसमयहृदयकमलारोपितगरुडगिरिभूषणमणिनिरवग्रहानुग्रहस्समतिक्रम्य निजस्थानीयरथ्यामन्वीयमानो घनगुणमणिसागरैर्नागरैस्सुदूरं निवर्त्य यथोचितं तांस्तानतिपत्य त्रिचतुरैरेव दिनैस्तत्र तत्र निजविक्रमक्रमनिशमनक्षुभितहृदयतया प्रस्थानप्रभृति कृत प्रतीक्षणैर्महीक्षिदग्रगण्यैरूपानीतान्यपाराण्युपायनानि सम्मानयन्नयनाञ्चलप्रसारणेन तावन्निशमितनिजागमनवृत्तान्तेन महाराजाधिराजचूडामणिना बहुदुर्दममदुर्दिनरिपुकर्दममर्दनोद्दण्डचण्डांशुकुर्दनाक-

 In Public domain. Digitization Muthulakshmi Research Academy

लितप्रतापेन नासर्दौलाभिधानेन भाग्यनगराधिनाथेन बहुमिमानयिषया निजपुराद्योजने राजमानस्य सौधयूथशिखरनिकराक्रान्तगगनपरिषदो गगनपहडिति प्रथितस्य पुरस्य निकटभुवमभिप्रेषिताभ्यां भूषिताभ्यां समग्रगुणैर्बहदुरुबिरुदाङ्किताभ्यामिन्द्रजित्प्रतापाभिदानाभ्यां विरचित-योधयूथोचितप्रणामाभ्यां विनयावनताभ्यां लेखकाग्रणीभ्यां न सैन्याभ्यां कौतुकातिरेकप्रत्युद्गतयवनाधिराजप्रतापकीर्तिशाबाभ्यामिव सौवर्णराङ्कव मुक्ताहाराभ्यां तत्प्रेषिताभ्यां बहुमानितस्सन्ति शतशो धराकान्ताः प्रतिवत्सरं दीयमानोपायना न केनापि लब्धचर ईदृक्षो बहुमानो मानवाधीश्वरचूडामणेरास्माकीनादिदमपरमवधार्यतां भवदीयवंश्योऽपि न कश्चिदेवं मानितः किम्बहुना पीताम्बरकतरुणाविहरणशरणा-यितोऽसि विक्रान्तचूडामणे राजसिंहेति ताभ्यामभिनन्द्यमानो वन्द्यमानो भटपटलैस्तत्क्षणमुत्तरङ्गितशताङ्ग मातङ्गतुरङ्गनिबिडित प्रान्तो निरन्तर-समुज्जृम्भितगन्धर्वहेषाघोषमिषेण प्रसार्य पुरतो वैजयन्तीभुजलता-माह्वयन्तीमिव सोपचारवचनं फलभरावनम्रकदलीक्रमुकनालिकेल-पालिकेरितमन्दपवनकन्दलवलन तरलितबहुलवकुलकुन्दकुटजमन्दार-कोविदारकदम्बमुखतरुकदम्ब निबिडिततटतटाकान्तरालतरलमृदुल-तरतरङ्गजालतालवृन्तसन्तत शमीतरतिरभसपरिश्रमपरिसरनिकुञ्जपुञ्ज-मञ्जुलभवनविहरमाणरसिक तरुणसमाराधितकुसुमायुधदेवतां नितान्तनिजनगराधिकवैभवावलोक नाभिलाषसमागत पुरन्दरपुरसुन्दरी-बृन्दरीतिभरणनिपुणरमणीजन शरणीकृतरमणीयसुमणीमयविमान-समानलसमाननूत्नरत्नसौधयूथ निबिडितहृद्यानवद्यनिषद्यातलप्रसारित-शस्तकस्तूरिकादिनिस्तुलवस्तु परिमिलत्परिमलनिष्पन्दपुष्पन्धयधुरन्धर-

In Public domain. Digitization Muthulakshmi Research Academy

बृन्दपुरन्धरमणीभ्रमातिशय समारचितोञ्छनानन्तररसरभससझङ्कार-तदुत्पतनसमयभयचकित बालामणीसमाश्वासनचतुररसिकतरतरुण-जनमनोहरान्तरां निरन्तर लक्ष्मीविहारयोग्यां भाग्यनगरीं प्रविश्य कुत्रचित्तत्र चित्रतरभोग्य वसुधुर्यामुपकार्यां प्रवेशितस्ताभ्यां योधयूथोचितं सम्मान्य तौ विसृज्य तामनीनयद्विनीतमतिः कुमुदिनीविटकामिनीं यामिनीम् ॥४॥

श्री रामेश्वरविजये द्वितीयमुल्लासमतनुत विलासात् ।
शठमर्षण कुलतिलकः कृष्णः कविगण्डभेरुण्डः ॥

इति श्रीमच्छ्रीशैलकुलतिलकनवदुर्गतातार्यवर्यनन्दनस्य कृष्णकविसार्वभौमस्य कृतिषु रामेश्वरविजये प्रादुर्भावोल्लासो द्वितीयः ॥

श्रीमते श्रीनिवासाय परब्रह्मणे नमो नमः ।
श्रीरस्तु - मङ्गलानि भवन्तु श्रियै नमः ।
रामेश्वरविजये - २- प्रादुर्भावोल्लासः ।
॥ समाप्तः ॥

In Public domain. Digitization Muthulakshmi Research Academy

शुभमस्तु

श्रीहयग्रीवाय नमः ।

रामेश्वरविजये ३ - विजयोल्लासः

अन्येद्युः ॥

प्रादादस्मत्सनाम्ने मणिवरमनघं कौस्तुभाख्यं भवानि
त्युद्दण्डक्रोधरक्ताननं इव विलसत्सान्ध्यतेजस्यनन्ते ।
भूषार्थं तस्य भीत्या सरिदधिपतिना नुन्नमन्यन्महार्घं
रत्नं किं भानुबिम्बं सपदि समुदयत्पूर्वशैले दिदीपे ॥१॥

आदौ प्रकाशयतु नाम मुखे विकारं
पश्चात्सदा वहति साधु सुवर्णमेव ।
सोऽयं विभावसुरियं खलु चण्ड( ) ति
दोंषाय नेति मुमुदेऽभ्युदिते जनोऽस्मिन् ॥२॥

तेजस्वी दुष्टोऽपि प्रायेण श्लाघनीय एव भवेत् ।
यद्ध्वंसित कुवलयमप्यपूजयन् लोकबन्धुरिति तपनम् ॥३॥

गद्यम् ॥

तावद्विरचिततत्कालोचितकृत्योऽसावत्यादरेण रामबक्षिनाम्ना सुगृहीतधाम्ना नासदौंलावनीश्वरेन्द्रसचिवेन दिदृक्षया समाहूायितः कुरुविन्दमयकनकवतंसकमनीयमकुटीतटः निरन्तरहृदयान्तर देदीप्यमान खगनाथनगनाथनिरङ्कुशसमङ्कुरत्करुणाझरीसमुद्बुद्धबुद्बुद रेखानुकारित-त्तादृशमुक्तामणिहारमनोहारिविपुलवक्षस्थलः धरणितलावतीर्णघनाघन-

In Public domain. Digitization Muthulakshmi Research Academy

किशोरसंशयसमासक्ततनुतरतटिल्लताकुमारी भ्रमावहनिस्समाननिटिलान्तरोदीर्णश्रीचूर्णरेखाभिरामः निजनामोचितमिदं रामेश्वरबाहुसमाश्रयणमिति संसक्ताभ्यामिवाङ्गदाभ्यां विराजितदोर्दण्डः जन्मान्तराभ्यमित्रीणसुत्रामकरतलहठात्कृताहृत वज्रायुधसन्देहसन्दोहनचतुरखड्गलतादुर्निरीक्षदक्षिणकरतलः निर्गत्य निजोपकार्यायास्तदारुह्य मदावलं निबिडित प्रान्तो निजवरूथिन्या परसैन्यप्रमाथिन्या प्रेरयिद्धिर्बृन्दं बृन्दं स्यन्दनान् वल्गयद्भिर्घोटीकोटीर्वारयद्भिर्महासम्बाधं क्रोशद्भिर्मुञ्चत मार्गं मुञ्चत मार्गमिति विचिन्वद्भिस्स्वस्वयूथ परिभ्रष्टान् जनान् द्रवद्भिर्हततरं पृच्छद्भिः किं किमिति तिष्ठद्भिराश्चर्य परवशतया पश्यद्भिः किमपि कमपि क्वचिदिमे भ्राष्ट्रा इमानि शूल्यान्येता न्युख्यान्यत्र दाधिकान्येतान्यौदश्वित्कानीतः क्षैरेयाणीमानि कौलुत्थानीमे चूर्णिनोऽपूपा एते लवणा अमी मौद्गा इति ब्रुवाणैरुच्चैः कान्दविकैः दीयतामिति वदद्भिः कैश्चित्कुत्रचिदिमानि दिव्यानि नवसनानि माञ्जिष्ठान्येतानि लाक्षिकाण्यमूनि रैचनिकान्यत्र शाकलान्यत्र कार्दमिकानि पश्यत नीलानि वीक्षध्वं पीतकान्याददत हारिद्राणि विलोकयध्वं माहा रजनानीत्युत्क्षिप्योत्क्षिप्य प्रदर्शयद्भिराम्बरिकैर्नानाविधचेलानि क्रयविक्रयार्थमेहि गच्छ दीयते न दीयते अभिधीयते निधीयते विधीयते विक्रीयते श्रूयते अभ्युपगम्यते नाभ्युपगम्यते किं बहुना ददासि चेद्देहि न चेन्मास्तु गृह्णासि चेद्गृहाण न चेद्गच्छ त्वादृशाः कति वा समेष्यन्ति कति वा समायाता मामकनिषद्यां को देशस्तव विपरीतं पृच्छसि यो वा को वास्तु देशः क इदानीं तस्य विचारः ददासि वास्मत्प्रश्नसदृशं

In Public domain. Digitization Muthulakshmi Research Academy

न वा भवतु भवतु मूल्यतुल्यमेव ददामि लाभो न चेन्मास्तु गृहाण प्रयच्छेति बहुविधं जल्पद्भिः प्रविशद्भिः प्रविष्टैर्विक्रेतुकामैः कृतविक्रयैः क्रियमाण विक्रयैः निवृत्तेर्निवर्तमानैर्निवर्तिष्यमाणैः पौरस्त्यैरौत्तराहै-र्दाक्षिणात्यैः पाश्चात्यैश्च जनैरतिनिरन्तरास्समतिक्रम्य वीथीरासाद्य हृद्यतमञ्चत्वरसत्वरविसृत्वर भटपटल सम्बाधमग्रगण्योऽसौ महीभृता-मित्युपायनान्यर्पयितुं समेत्य समयं प्रतीक्षमाणैरिव महावसुन्धरा-धरैर्महाहवधुरन्धरैस्सिन्धुरैर्बन्धुरितमास्थानप्रतिहाराग्रभागमवतीर्य दूरादेव गजराजाद्राजा रामेश्वरः वामकरतलाघट्टनपूर्वकं दक्षिणकरोत्क्षिप्तनलकैः प्रतीहारिभिः प्रत्यर्पितं योधयूथोचितं निटिलतटकरतलघटनरूप-मभिनन्दन् प्रणामं कथञ्चन भृत्यैः प्रदापितप्रवेशावकाशः क्वचिदादीय-मानाधमर्णिकवाङ्मूलैः क्वचिल्लिख्यमानोत्तमर्णोत्तरैः क्वचिद्विचार्यमाणा-स्वामिविक्रयक्रमैः क्वचित्परिष्क्रियमाणसीमाविवादैः क्वचिच्छास्यमान-साहसिकैः क्वचिदारब्धसाक्षिप्रश्नविधानैः क्वचित्तिरस्क्रियमाणकूटसाक्षिभिः क्वचिन्निगृह्यमाणनिक्षेपहारकैः कर्णावतंसीकृतलेखनीकैर्जागरूकैर्निज निजकृत्येषु निष्पन्दशरीरैर्मन्दमन्दप्रपञ्चितान्योन्यलेखैकवाक्यताविचारैः मितभाषणैर्धृतभूषणैरधिकृतजनै रत्नैरिव रत्नाकरं स्तिमितगम्भीरं प्रविश्य तदास्थानं सचिवेन्द्राय विरचिततदुचितकरतलनिटिलस्पर्शनरूप प्रणामस्समागत्य यवनाधीश्वरसिंहासनमनुक्षणवेत्रधारिजननिवेद्यमान विविध विषयनरपालप्रणामाय तस्मै विरचय्य दूरादेवैकहस्तफालस्पर्शन-नमस्कृतीः तदाज्ञया किङ्करजनसरभसोपनीते सौवर्णभद्रासने तद् भ्रूवल्लिचलनसूचिते निषसाद ॥

In Public domain. Digitization Muthulakshmi Research Academy

पद्यम् ।।

वीररससारमिव तं विलोक्य रामेश्वरक्षितीशानं ।
नासदौंलाधीशो नासाग्रन्यस्ततर्जनीकोऽभूत् ।।४।।

अहो धैर्यं शौर्यं निखिलधरणीनायकमणे
रहो स्थैर्यौदार्यं किमिव कलयेऽमुष्य यदमुम् ।
इदानीं सन्द्रष्टुश्चकितमिव चित्तं विलुलितं
ममापि श्रीमन्तं तमिममिह का वा प्रसुषुवे ।।५।।

जगन्नाथोऽमुष्मिन् सततमपि सम्पूर्णकरुणो
ध्रुवं नो चेदेवं क्व भवति पुमानीदृशगुणः ।
न चेद्भानुर्दत्ते निरतिशयतेजस्ससततम
प्यलं तेजस्वित्वं क्व नु भवति चन्द्रस्य जगति ।।६।।

इति चिन्तयन् हृदन्ते क्षितिपालशिरोमणिश्चिरान्मौनम् ।
धृतवानतिगाम्भीर्यव्यपदेशादथ जगाद धरणीशम् ।।७।।

हे भूपाल मृगेन्द्रशाब सुचिरं पृथ्वीश्वरैर्मानिताः
प्राचीनैर्निजवंशजैरिति वयं मान्यास्त्वया केवलम् ।
त्वां द्रष्टुर्मम मादृशानपि धराकान्तान् सहस्राणि
वागोपायैर्निजविक्रमैरिति मतिस्त्वेवं समङ्कुरति ।।८।।

रूढ्या पार्थिवशब्दमेत्य कतिवा राजन्यवंश्या नरा
नो सन्त्यत्र परन्तु भूपविदितः पृथ्व्या त्वमेवानिशम् ।
कीटाः केऽपि न सन्ति किन्नु धरणौ खद्योतनाम्नाञ्चिता
ध्वान्ते जातरुचो जगद्विदितभाः प्रद्योतनः केवलम् ।।९।।

In Public domain. Digitization Muthulakshmi Research Academy

यत्तेन्द्रमुख्य नृपतींस्त्वमयत्त एव
बालोऽपि पूर्वमवनीशजवादजैषीः ।
तेजस्विनां न खलु चित्रमिदं विवस्वा
न्मथ्नात्यहो तम इहोदयमान एव ॥१०॥

अस्मन्मण्डलमध्ये विस्मयनीयात्मविक्रमो यत्त्वम् ।
जाने तत्त्वां श्रीमन् जयदं मम दक्षिणं महाबाहुम् ॥११॥

ध्वजिनीनस्सन्ततमपि रजनी रजनीप्रियंवदेनेव ।
भवतु सनाथा भवतातवतु जगत्यस्तु विश्रुतं तेजः ॥१२॥

इति वदति तत्र नृपतौ प्रतिभावानेष नतशिराः किञ्चित् ।
क्षितिनाथमण्डलेन्द्रं प्रतिवचनं प्राह विनयगम्भीरम् ॥१३॥

अश्रान्तोद्भटतावकीनसुमहादोर्दण्डयुग्मोज्वल
त्तेजो बाडबवह्निदुस्सहशिखाकीर्णस्फुलिङ्गोपमम् ।
तेजोमादृशभूभुजां किमिति मां लज्जाब्दिमध्ये चिरा
देनं मज्जयितुं सवैः प्रयतसे भूपालचूडामणे ॥१४॥

यद्भवता वर्णितमिह रिपुजेतासीति तदपि तव दयया ।
न यदि द्युमणिपुरस्कृतिररुणो मथ्नातु कथमिव तमांसि ॥१५॥

इत्थं सम्भाषमाणं सविनयमधुरं प्राह रामेश्वरेन्द्रं
नासर्दौलावनीन्द्रः प्रमुदितहृदयो विस्मितस्सस्मितं तम् ।
युक्तं सम्भाषसेऽहो विधुरिव शरदा राजसे त्वं विनीत्या
प्रायो नोत्सिक्तचित्ताः परमपि महता कर्मणा स्वेन धीराः॥१६॥

In Public domain. Digitization Muthulakshmi Research Academy

राजाबहादुरिति ते हि भवत्कुलीनाः
प्राञ्चो महार्घबिरुदं दधते स्म सर्वे ।
त्वं त्वस्मदर्पितमिदं बहिरीति नाम
गृह्णीष्व यद्रिपुखगान् शतशोव्यजेष्ठाः ॥१७॥

अस्मन्मण्डलवर्तिनं नरपतिं शेषाभिदं कञ्चन
प्रोद्वृत्तः(?) किल कन्दुकूरु नृपती रुन्धे स्वकीये पुरे
वेगाद्वेङ्कटराघवादिमपदं तं रङ्गरायं रणे
निर्धूय ध्वजिनीभिराहर जयं भूपालकोपादिति ॥१८॥

वदत्येवैतस्मिन्नथ सपदि रामेश्वर नृपो
जिगाय स्वान्तेन प्रथममतिवीरो रिपुनृपम् ।
अथैनं ब्रूते स्म क्षितिपतिगणोत्तंसनिमिषा
त्त्वदीयोऽयं बाहुर्जयमिह न विन्देत्कथमिव ॥१९॥

उद्भटखड्गनिकृत्तैः प्रतिभटशीर्षैस्त्वदीयबाहुरयम् ।
कन्दुकनगरीनिकटे कन्दुकलीलां तनोति नियतमिति ॥२०॥

साधु क्ष्मापालसिंहेत्यनघमणिसरैरुज्वलद्राङ्कवाद्यै
र्दन्तीन्द्रैरश्वबृन्दैरपि मुदितहृदा तेन सम्मान्यमानः ।
सर्वानापृच्छ्य राजाबहदरुबहिरीशब्दभागेष जेता
वेगाद्रूक्षान्विपक्षानिति निखिलजनैश्श्लाघ्यमानः प्रतस्थे ॥२१॥

मदबन्धुरमथ सिन्धुरमतिसुन्दरमिन्दुरुदयमिवमन्दम् ।
स वसुन्धराधुरन्धरमणिरुपमितमन्दरं समारुक्षत् ॥२२॥

 In Public domain. Digitization Muthulakshmi Research Academy

यद्वीक्षां प्रार्थयन्ते क्षितिपतिमणयः क्लृप्तवासाश्चिराय
श्रीमान् सोऽयं महात्मा यवनपतिरपि प्राप्तकौतूहलोऽमुम् ।
अहूयान्यैर्दुरापां बहुमतिमददाल्लीलयासावुपैति
द्रागेनं पश्यतेति ब्रुवति जनचये सोऽविशत्स्वोपकार्याम् ॥२३॥

नीत्वा तत्र दिनानि कानिचदथो गत्वा स्वकीयां पुरीं
स्थित्वा तत्र च पञ्चषान् स दिवसान् स्मृत्वा नृपाज्ञां मुहुः ।
श्रीरामेश्वरराजशेखरमणिस्स्फारानघश्रीरसौ
निर्यातः प्रति कन्दुकूरुनगरं पर्याप्तसैन्यो जवात् ॥२४॥

केचित्तुङ्गांस्तुरङ्गान् कतिचन चतुरा उन्नताङ्गान्मताङ्गान्
केचिन्नागांश्चागात्कतिचन शकटीरुत्तमा दत्तमानाः ।
आरूढा व्यूढदर्पा अहमहमिकया प्रोन्नदन्तो द्रवन्त
स्तद्योधाः प्रौढमेधा दिशि दिशि रभसात्कन्दुकूरुं न्यरुन्धन् ॥२५॥

घोटकखुरपाटितभूधूलीपालीभरे निजे सलिले ।
पतति समुद्रस्त्यक्त्वा मुदं सर इवाभवत्क्षणेन तदा ॥२६॥

चञ्चत्सौवर्णकोणाहत पटुपटहव्यूहरोहन्निनादै
श्श्रीमद्रामेश्वरेन्द्रप्रभुवरविजयं घोषयन्तस्समन्तात् ।
वाता जाता उदग्रध्वजपटपटलादुच्चलद्धूलिपाली
पत्रं विस्तार्य जैत्रं दिशि दिशि वसतां दर्शयन्ति स्म भूयः ॥२७॥

रुद्धं संश्रुत्य नैजं पुरमतिरभसात्क्रुद्धचित्तोऽप्रमत्तो
योद्धुं प्राध्वं कृतास्थः पुरवरचलितः कन्दुकूरुक्षितीन्द्रः ।

In Public domain. Digitization Muthulakshmi Research Academy

बद्धस्पर्धान्विरुद्धान् दिशिदिशि रभसात्तूर्णमुद्गीर्णघोषा
न्त्रोषादुद्वीक्ष्य तेषामथ धुरि विदधे रंहसा सिंहनादम् ।।२८।।

चटुलतटिल्लता प्रतिभटोद्भटखड्गलता
झटिति विपाटितातिपटुघोटकदन्तिघटम् ।
अविरतमद्भुतं पृतनयोरुभयोरभवत्
समरमुदीर्णतूर्णपरिपूर्णरणन्नलकम् ।।२९।।

घनाघनघटोद्भटस्तनितगर्वनिर्वापण
प्रतिक्षणसमुन्मिषत्प्रचुरसिंहनादोर्मिलम् ।
बलोदधिमलोडयन्निमिषतोऽथ रामेश्वर
क्षितीश्वर पुरस्थितस्सपदि कन्दुकूरेश्वरः ।।३०।।

अथाग्रतो वीक्ष्य स रङ्गराजं क्रुधा समारूढतुरङ्गराजं
रामेश्वरोऽयं युधि कन्दुकूरुभूमीश्वरं प्राह महागभीरम् ।।३१।।

मण्डलाधीशितुर्मानयन् शासनं खण्डनाय द्विषां प्रस्थितोऽहं शृणु।
अर्पणीयो जवाच्छेषभूमीपतिर्दर्पमुन्मोचये नो यदीत्थं क्षणात् ।।३२।।

शेषायुषि रचितादरमायातं विद्धि वीरमेनं माम् ।
शेषायुषिरचितादरमथ यदि तव चित्तमर्पयैनं द्राक् ।।३३।।

अथ यद्यमुं न मुञ्चसि शेषं भूपालमिह मृदुवचोभिः ।
त्वामपि नाम्ना शेषं कलयति वीरो यमन्यथा नैतत् ।।३४।।

Public domain. Digitization Muthulakshmi Research Academy

निश्शङ्कं शरणङ्गतमेष नृपालो न बाधते शत्रुम्
द्वेधापि सत्यमेतद्यदिष्टमत्राशु तत्कुरु जवेन ।
अह ह कुवर्णं वहसे मुखेऽद्य मां वीक्ष्य रङ्गराज त्वम्
अथ योत्स्यसे कथं वामयातिवीरेण पुरुषसिंहेन ॥३५॥

इति वचनं वदन् प्रचुररोषकषायितदृ
ग्वलन विशोषिताहितनृपालमुखाम्बुजभाः ।
नृपतिमणिश्च वार्षिकघनाघनमध्यकन
त्तटिदुपमां मुहुर्भ्रमयति स्म स खड्गलताम् ॥३६॥

स्फूर्जत्पर्जन्यमध्यस्फुरदमलतटिद्वीक्षणाद्धूतदर्प
स्सर्पाधीशो यथायं नृपतिरपि तथा तस्य रामेश्वरस्य ।
हस्तोदस्तोग्रखड्गभ्रमणरभसतोऽदभ्रविभ्रान्तचित्तो
भ्रश्यन् पश्चान्नपश्यन्नविदितशरणो हाऽपलायिष्ट कष्टम् ॥३७॥

जृम्भयन्तो मुहुः काहलीनां ध्वनीं स्तम्भयन्तो रिपुव्यूहबाहार्भटीं।
हेषयन्तो हयान्राजमौलेर्भटाघोषयन्तो जयन्तं तदान्वद्रवन् ॥३८॥

स द्राग्विद्राव्य सेनां बहदरु बहिरी राजराजेति शश्व
द्विश्वैस्संस्तूयमानः प्रतिभटनगरं प्राप्य तं सन्निगृह्य ।
उन्मोच्याग्रे नृपालं तमपि करुणया शेषरायं स्वराष्ट्रं
प्रस्थाप्याथ व्यधत्त स्ववशगमसुहृत्पत्तनं राजवीरः ॥३९॥

In Public domain. Digitization Muthulakshmi Research Academy

गद्यम् ॥

तदनु कदनधरापराभूतपराग्रगरङ्गराजतुङ्गतेजस्फूर्तिः कीर्तिमानेष रामकृष्णावनीन्द्रपुत्रः पत्रमुखेन निवेद्य यवनेश्वराय निजभुजविजयोदन्तं निवर्तमानो विदारितामित्रेणाक्षतगात्रेणानाकुलेन निजबलेन सह समतीत्य न चिरादेवाति दीर्घमपि मार्गं सम्प्राप्य वनपर्तिनगरनिकटं तावद्विदित निजविजयवृत्तांतैरुद्वेलप्रमोदसागरैरशेषनागरैः करविधृतो-पायनैः प्रतीक्षितभूपायनैस्सह प्रत्युद्गच्छन्तौ अनुदञ्चितमित्रमण्डलताप एव काञ्चनवृष्टिं सरीसृष्टी जनानामेष घनराज इति साश्चर्यचित्ततया द्रष्टुमभ्यागच्छन्ताविव महाघनभास्वन्तौ नीलमणितप्तस्वर्णसच्छा-त्रधामानौ गोविन्दवङ्कोबनायकनामानौ आश्चर्यकरभूमानौ कलित-बहुसन्मानौ सहजन्मानौ मित्रमानसहंसौ द्विजकुलावतंसौ अन्योन्यानुरूप रूपगाम्भीर्यौ दार्यादिसुगुणगुणौ आबाल्यसखौ पूर्णेन्दुमुखै विलोक्यावतीर्य सबहुमानमौपवाह्यादङ्गीकृतदुपाहृतोपायनस्साकं ताभ्यामारुह्य यथापुरं दन्तावलं यथायवनेन्द्राज्ञा यथाकन्दुकूरुपुरनिरोधो यथा वेङ्कटराघवरङ्गराज विजयो यथा शेषावनीशविमोचनं यथाक्रमन्तयोरभिदधानो निखिल वृत्तान्तं तमपि सस्मितवदनाभ्यां विस्मितहृदयाभ्यां परिपूर्णविनयाभ्यां राधाम्बावेङ्कोबनायकतनयाभ्यां ताभ्यामभिनन्द्यमानस्सम्मानयन् कटाक्षवीक्षणेनैव तान्यथार्हं जनान् अग्रतो निजप्रतिभटश्रियां तटिल्लतानां मनोव्यथनाय हठात्कृत्य गृहीतैस्तत्तनुरुहाङ्कुरैरिव पवनवलन तरलतरैर्दी-पाङ्कुरै रमणीयानि मणीमयानि नीराजनाभाजनानि प्रसारिताभ्यां करतलाभ्यां धृतवतीभीर्धन्याभिः पौरकन्याभिरारचितविजयनीराजनो

 In Public domain. Digitization Muthulakshmi Research Academy

विलोकयन् प्रतोलीं प्रविश्य निजभवनं विसृज्य यथोचितं जनान् दिनानि कतिचिदत्यवीवहत्कृत्यवतामग्रगण्यो वसुन्धराधुरन्धरमूर्धन्यः।।

रामेश्वरेन्द्रविजये तृतीयसमुल्लासमतनुत विलासात् वनपर्तिपुरीवसतिः कृष्णः कविगण्डभेरुण्डः ।

इति श्रीमच्छठमर्षणकुलतिलकस्य कृष्णकवेः कृतिषु रामेश्वर विजयाख्ये चम्पूप्रबन्धे विजयोल्लासस्तृतीयः श्रियै नमः ।।

श्रीमते श्रीनिवासाय परब्रह्मणे नमः ।

श्रीरस्तु - मङ्गलानि भवन्तु श्रियै नमः।

रामेश्वरविजये - ३- विजयोल्लासः।

समाप्तः।

In Public domain. Digitization Muthulakshmi Research Academy

शुभमस्तु

श्रीहयग्रीवाय नमः ।

रामेश्वरविजये ४ - यात्रोल्लासः

कदाचिदत्यर्थमुदारमञ्जुषट्पदारवैस्सप्रमदान् प्रमोदयन् ।
विदारयन् हन्त विदारहृत्तलं मुदा वसन्तस्स तदाविरास ह ॥१॥

अपहसितानीव वने किसलयविसरेण जीर्णपत्राणि ।
पेतुरनारतमवनौ पल्लववृद्धौ क्व शुचिपुरस्कारः ॥२॥

निर्नामं विधुरेक एव हते सर्वान्न एताः पुनर्जा ता
श्चन्द्रकलाः कतीह यदि वा स्फीता भवेयुर्भवेत् ।
भूमौ नूनमनर्थकं तदधुनैवैताह नामेति किं
ध्वान्तौ घामिलिताः पलाशकलिकाप्रान्ते बभुष्षट्पदाः ॥३॥

कर्षन् कामान्धचेतो दिशिदिशि किरन् कीरवारानुदारान्
कुर्वन् कूपेषु शीतं जलमथ दलयन् केवलं कैरवाणि ।
कोदण्डं कौसुमेषोर्मुहुरतिरभसं कम्पयन् कः किलास्मिन्
जीवेत्कान्तावियोगादिति पिकनिनदैराह कान्तो वसन्तः ॥४॥

पुष्पवती तव मल्लीकान्तेति लतासखीजनैः कीर्णम् ।
मधुकान्ते पाटलतरहारिद्राम्भ इव पल्लवं रेजे ॥५॥
परितः प्रबभौ वनभुवि परभृतनिकरो रसालसालेषु ।
बहुशो वियोगिबाधादयशो महदिव वसन्तस्य ॥६॥

In Public domain. Digitization Muthulakshmi Research Academy

तदानीम् ॥

मेषारूढोऽपि रविस्सर्वोच्चस्थ इति गीयते स्म जनैः ।
तेजस्वी क्व वसतु वा प्रवदन्त्युच्चस्थमेव तं मनुजाः ॥७॥

किं शुकविकासकृद्दिनमित्यनुयुक्ताविलासिभिस्तरुणैः ।
कामिन्यः प्रौढाः पुनरुत्तरमाहुस्तदेव चित्रं तत् ॥८॥

केसरचया अभीष्टाः कबरीभूषार्थमिति मुदा ललना ।
पृष्टा काचिद्यूना हृष्टा चतुरोत्तरं तदेवाह ॥९॥

किं बहुना ॥

केचित्सम्पतयालुजीर्णविरला पाण्डुच्छदाश्शाखिनः
केचित्तत्क्षणरूढपल्लवचयाः केचित्पलाशैर्घनाः ।
केचित्कोरकितास्तथा कुसुमिताः केचिच्छलाटूद्भटाः
केचित्सान्द्रफलास्तदा प्रतिवनञ्चक्रुश्श्रियं निर्भराम् ॥१०॥

गद्यम् ॥

समये तस्मिन् विस्मापितनिखिलजगतिधूताद्भुतो पवनजातातिसौरभ्यचूतावली सरोजातादिघनकुसुमभूतातिशुभरजस्फीताग्रषट्चरणगीताढ्यमलयगिरिजातातिमृदुवातपोतासद्दशवलनपरिशमितनिखिलमनुजसन्तापे कान्ते वसन्ते निखिलसुरासुरकोटीरकोटीमणिघृणिमदनुपमकिरणसमुल्लसितचरणनलिनस्य यादवशैलशिरोमणेर्यतिराजसम्पत्कुमारस्य दिव्या निरुद्धवज्रमकुटीधारणमहोत्सवसमयोऽयं समुपागतो धन्यतामापादयामि जन्मनस्तत्सेवनेनेति निश्चित्य विपश्चिदपश्चिमाभि

In Public domain. Digitization Muthulakshmi Research Academy

नन्द्यैर्नन्द्यालशेषार्यमुखैस्सूरिवर्यैस्साकं प्रस्थानोचिततया पृतनया परिवृतो निर्गत्य निजनगरादतिक्रम्य कतिपयैर्दिनैर्विविधविलासिनीजनविहरणाभिरामानारामान् विपुलवनलक्ष्मीवज्रमुकुरशङ्काकरानपि पङ्कजाकरान् तत्र तत्र चित्तहारिमत्तकाशिनी नृत्तसमयसमुदितमङ्गलमृदङ्गधिमिधिमिध्वानबन्धुराणि सिन्धुराजनन्दनारमणमन्दिराणि चाग्रतः निखिल-भुवनजनहृदयसुखदबहुलतरवलभिदुपलमरकतकल सदरुणकिरणकनद-रुणमणिसितकरमिहिरदृषदनगशिखरनिकर विकचविचिकिलकुरवक-मरुवककनकवकुलकुसुमविसरविसरदसदृश परिमलघुमुघुमितकटक-तटकनदनसपनसतिलकतिलकमुखविविध धरणिरुहविहरदतिचटुल-चटकशुकपिकमुखविहगकुलकलित कलकलरवमुखरितं नारायण-मिवोल्लसच्छ्रीकन्दराभिरामं श्रोत्रियकुटुम्बि निलयमिव समुल्लसन्महोपत्य-कान्तम् । महाराजनिकाय्यमिव बहुश्री मल्लीलाञ्चितं तरुणकुटुम्बिनमिव उल्लसितमध्यवनिकामं दारासक्तं महावीरमिव समर्यादजन्यकोविदाराति-निर्धूननाशुगा कलितं नृत्तमण्डपमिव उन्मदकलकण्ठीरवमनोहरं आकरमणीकलितमपि नाक रमणीकलितमालुलोके यादवाचलम् ॥१॥

आकस्मिकस्वागमनविचारपरिज्ञानसानुग्रहहृदयस्य श्रीमन्नाराय-णस्य दिव्याज्ञया प्रेषितान् सौवर्णशेषापटमाल्ययुगलाभयहस्तमुखान् दिव्यप्रसादाननितरलभ्यानवनतेन शिरसा साञ्जलिबन्धं सम्भाव्य उत्तमाङ्गां सयुग्माञ्जलिशीर्षविन्यस्तं यथामर्यादं श्रीशठकोपमर्चकजनैः प्रणम्य सम्मान्य समारुह्य तं गिरीन्द्रं नरेन्द्रोऽयं निजसनाम्नो माधवस्य महोत्सवः प्रवृत्त इति तन्मुदे वसन्तेनोपहारीकृतैर्मल्लिकामतल्लिकापुञ्जैरिव

In Public domain. Digitization Muthulakshmi Research Academy

आहोस्वित्कालेऽस्मिन् सन्निहितग्रीष्मतया चण्डतरकिरणस्य विवस्वतः करनिकरव्यतिकरेण परस्परसम्मर्देन चोत्सवार्थमागतानां जनानामतितरां तापो माभूदिति प्रेम्णा शीतोपचारायाहृत्य नागरैस्स्थापितैरिवानेक हिमाचलकूटैश्शरच्चन्द्रचन्द्रिकाधवलैरविरलैस्सौधयूथैस्सम्बाधां क्वचिदन्त-रान्तरा रचितमनश्शिलापङ्कपट्टैसुधापट्टैरलङ्कृततया सद्यः प्रवृत्तोत्सवानु-गुणवैष्णवधर्मावलम्बनाय धृतश्रीचूर्णपट्टाञ्चितसितोर्ध्वपुण्ड्रपट्टैरिव भवनैरभिरामां न्यवक्षित विजृम्भितश्रोत्रियवेदपारायणझरीं नारायणपुरीम् ॥२॥

पद्यम् ॥

स्नात्वा कल्याणतीर्थे नृपतिमणिरयं दत्तकल्याणसार्थे
दत्वा वित्तं यथेष्टं प्रमुदितहृदयस्तत्र लक्ष्मीवराहम् ।
नत्वा शेषार्यमुख्यैस्सह निजपृतना मध्ययातः प्रणन्तुं
श्रीमन्नारायणं तं कटिघटितपटस्सन्निधिं तस्य भेजे ॥११॥

गद्यम् ॥

तत्र च प्रणम्याग्रतस्समुत्थाय दिव्यविमानमध्ये सहस्रपत्रमध्य इव भृङ्गराजं विरोचमानं सकललोकलोचनभागधेयमिव मूर्तीभूतं विनताखलजनताधिकघनतापहघनतादृशमोदावहपादाम्बुजयुगलगद गणितसिततततमुक्तामणियुक्ताद्भुतहंसकसमहंसकयुगमतिकृति पतिमति-ततिभृतिजङ्घालसुजङ्घायुगममलाननकमलाञ्चितकरिवरकर निभशुभ-विभवोरूल्लसदूरूज्ज्वलहेमाम्बरधामाधिकघृणिमणिगण झणझणरण-दञ्चितघनकाञ्चनमयकाञ्चिकमतिराहूपमबाहूल्लसदरिवरद रमरिदरकर-

 In Public domain. Digitization Muthulakshmi Research Academy

मुरसाञ्चितसरसीरुहनिलयं धृतवलयं सुरनुतमङ्गदोल्लसितमधिकं गदोल्लसितमरुणकरकिरणकनदरुणमणिसरणिसरसुन्दरतरं हृदय मन्दिर-तलोल्लसितशस्ततमरुचिकलितकौस्तुभमणिं सततमिन्दुसुन्दर मुखं दयानिधिममन्दकन्दलितसरससरसिरुहरुचिररुचिनिचयगरिम भरहरण-नयनमतिचटुलविकटमकुटतटखचितरुचिरतरललितवलमथनमणिघृणिगुणित-निजदिव्यविग्रहकान्तिकान्तं भगवन्तं श्रीमन्नारायणमाचरणमकुटाग्रं संसेव्य सानन्दबाष्पस्साञ्जलिबन्धः पुनः पुनः प्रणम्योत्थायेत्थमस्तौषीत् ।।३।।

पद्यम् ।।

भगवन्निगमान्तयुगीरमणीमकुटावतंसपदकमलम् ।
ननु कस्तोतुं प्रभवति भवन्तमम्भोधिकन्यकाकान्तम् ।।१२।।

चिरान्नस्सौभाग्यं फलितमिह नारायणहरे
मुनीनामप्राप्यो यदिह भजसे लोचनपथम् ।
विधूतस्सन्तापोऽभवदनघवक्त्रेन्दुकलना
त्किमन्य द्विज्ञाप्यं त्वयि सततमप्यस्तु हृदयम् ।।१३।।

किं सादयसि नृशंसानस्मान् संसारभारहिंसायाम् ।
शंसानघकंसान्तकपुंसामवतंसकारिरंसाते ।।१४।।

गुणानास्माकीनान्यदि हृदि विचार्याथ दयसे
तदा किं वात्सल्यं तव निखिलसाधारणमिदम् ।
इहासीर्दीनानां शरणद इति प्राप्तबिरुदो
यदि त्वं संरक्ष प्रकृतमुदितं गौरवभरम् ।।१५।।

 In Public domain. Digitization Muthulakshmi Research Academy

साञ्जलिबन्धम् ॥

वेदान्ताभरणे श्रयामि चरणे ऊरू तथोरूश्रिया
बाहूंश्चापि बहूज्वलान् हृदि भजे वक्षश्च लक्ष्मीगृहम् ॥
वन्दे चन्दिरसुन्दरञ्च वदनं फालञ्च कस्तूरिका
नीलङ्कुन्तलजालचुम्बितकनन्मूलञ्च मौलिं भजे ॥१६॥

गद्यम् ॥

इत्यभिष्टुत्य हृष्टमना भगवन्तं श्रीमन्नारायणं तं समर्प्य तस्मै विस्मापितनिखिलजगदन्तः करणायारुणकिरणस्फुरणानि कनकाभरणानि विरचितविद्युदपहसनानि चामीकरवसनानि सनिष्काञ्जलीनि मञ्जुलान्यवनतेन शिरसा तरसा परिसङ्गृह्णानः पञ्चशठकोपमुखान् भगवत्प्रसादान् कलितप्रमोदानर्चकजनैरर्पितान् धन्योऽस्मीति साञ्जलि बन्धं पश्चात्पश्चादेकैकं पदं न्यस्य न्यस्यापसरन् तत्र प्रणम्य लावण्य विजितमारं कुसुदुसुकुमारं यतिराजसम्पत्कुमारं भगवन्तं रमाकान्तं परिक्रम्य दिव्यभवनमभिवन्द्य जगन्मातरमखिलशरण्याञ्जलधिराजन्य कन्यां संसेव्य विशिष्टाद्वैतसिद्धान्तनिर्धारणधुर्यं श्रीमद्रामानुजाचार्यवर्यं नमस्कृत्य रम्यजामातृयोगिवर्यमभिवन्द्य श्रीमल्लोकाचार्यवर्यंञ्च विनिर्गत्य तस्माद्दिव्यभवनान्नमिकर्मीकृत्य श्रीमन्निगमान्तदेशिकमणिमतिक्रम्य किञ्चिदन्तरमारुह्य नरसिंहगिरिं तदुदग्रशिखराग्रसंसक्तशारदनीरदशङ्का सुभगङ्करणे दिव्यशरणे कालोन्मीलितपुण्डरीकहरिणे देदीप्यमानं सिंहस्थितिर्मम निरतिशयदीप्तिकारणमिति हर्षादुपागत्यानवरतं प्रकाशमानेनेव पुटकिनीविटेन मणिमकुटेन परिमण्डितं अनर्गलविनिर्गल-

In Public domain. Digitization Muthulakshmi Research Academy

त्प्रतापसरस्वतीप्रवाहमध्यमूर्ततरावर्ताभ्यामिव सतरङ्गाभ्या अरक्त-कुटिलतरभ्रूलतावृताभ्यां वर्तुलापाटलाभ्यां नयनाभ्यां कलिकलुषाप नयनाभ्यां रिपुजनहृदयक्षेत्रेष्वङ्कुरयतं प्राध्वंसाध्वसबजानिद्विजराजतामात्म नस्स्फुटीकर्तुं वदनभागे द्वेधा जायमानेन बालचन्द्रेणेव दंष्ट्राद्वन्द्वेन कोरकितकरालवदनं मर्त्यसिंहमप्यमर्त्यसिंहं संसेव्य भगवन्तमुदञ्चिताञ्जली राजचूडामणिरित्थमभितुष्टाव ।।४।।

पद्यम् ।।

जय दितिसुतपति विचकितजगदभयद निटलचटुलकुटिलसट।
जय हरसख शतमखिमुखसुरकृतमुखविनुत सुगुण जय नृहरे।।१७।।

स्फूर्जत्पर्जन्यगर्जाप्रसरणरभसोत्तरञ्जात्यूर्जितैस्स्वै
रुत्कृष्टैरट्टहासैर्दिशि दिशि चलितैस्साध्वसं साध्वखण्डम् ।
चक्रे शक्रेशमुख्यादितिसुतनिवहस्यापि सोऽयं कथं वा
शश्वद्विश्वप्रपञ्चाभयद इति भवान् गीयते गेयतेजः ।।१८।।

त्त्वं स्तम्भभेदपूर्वकमुदितो भजतां समस्तमनुजानाम् ।
प्रह्लादजीवनौषध विरचयसि स्तम्भभेदनं युक्तम् ।।१९।।

इह यदि वसेत् प्रह्लादस्यापरस्सदृशस्सुतो
भवति हि तदा निष्पेषेऽस्य प्रमादभरो महान् ।
इति मृगयितुं नूनं शत्रोर्बिभेद भवान् हरे
जठरमचिरान्नो चेद्रोषानलस्य कियान् सते ।।२०।।

तादृशरोषेऽपि हरे लक्ष्मीदर्शनलवात्प्रसन्नोऽसि ।
अतिचण्डोऽपि धरित्र्यां जायानिकटे प्रसन्न एव भवेत् ।।२१।।

In Public domain. Digitization Muthulakshmi Research Academy

रिपुखण्डनसमयादप्यधिकं वह रोषमेष न बिभेमि ।
बिभ्यति न जातु शिशवः पुत्राः कुपितेऽपि वत्सले ताते ।।२२।।

किम्बहुना ।।

न गुणा मम तादृक्षा जात्वपि रचयामि तदपि निर्बन्धम् ।
प्रह्लादमिव चिरान्मामाह्लादय देव देव कृपया त्वम् ।।२३।।

धूर्तोऽयं किमिति वदत्यलमिति कोपाङ्कुरोऽपि मास्तु तव ।
सत्यान्तपकरुणायां किमिव वचो नस्समञ्जसं न स्यात् ।।२४।।

स्तुत्त्वैवं नृपतिमणिः प्रत्यर्प्य मणीसरादिकं तस्मै ।
समवातरन्महीध्रान्मनस्तु देवान्नतस्य चिरकालम् ।।२५।।

उद्यद्वसन्ततिलकोत्कलिकाभिरामान्
हृद्यान् सपर्वततटान् प्रसमीक्षमाणः ।
क्षोणीपतिर्गृहमवाप महार्घरत्न
श्रेणी मनोज्ञमथ किञ्चन तत्र पुर्याम् ।।२६।।

तदानीम् ।।

स्वदीप्तिहारीणि वसन्ति रत्नान्यत्रेति तान्युद्ग्रथितुं किलार्कः ।
पाश्चात्यपाथोधिजलान्तराले प्रपात्य रश्मीन्निममज्ज मन्दम् ।।२७।।

गद्यम् ।।

तत्क्षणमक्षीणतरैर्निजकरैर्निरन्तरभगवद्विहारकृते श्वेतद्वीपमिवा-
चरत्यखण्डभूमण्डलं भगवति कुमुद्वतीबान्धवे विनतानन्दनं विनतानन्दन-
मधिरुह्य वीथीमुखे विहरतं मामकीनान्वयभूषणमणेः श्रीरामचन्द्रस्यापि

 In Public domain. Digitization Muthulakshmi Research Academy

प्रियोऽसौ भगवानिति साश्चर्यमुपागत्य मूर्धानमाजिघ्रता दिनमणिनेव थलथलद्वज्रशालिना अनिरुद्धमौलिना कामपि कान्ति मुद्वहन्तं वदनलावण्यपयोनिधिमध्यसद्योनिमग्नमदनमहाराजराज्यलक्ष्मी गजशाबक समुद्धृतसुकुमारतरशुण्डादण्डेनेव मृगनाभिविशेषकेण निखिलजनहृदय-तोषकेण कलङ्केनेव शशाङ्कमलङ्कृतं ललाटतटं दधानं निधानं लावण्य-रत्नानां पराभूतोऽस्मि नितान्तं तव कान्ततरदन्तपङ्क्तिकया रक्ष मां विपन्नमिति कर्णयोर्वर्णयतेव मकरकुण्डलाग्रप्रत्युप्तमौक्तिकपुञ्जेन जलशीकरनिकरेणेव विकचकमलं विभूषितं दिव्यवदनमाबिभ्राणं शुभ्राभिस्सहोदरीवत्सलतया जलधितनयाकुशलानुयोगाय कलानिधिना प्रेरिताभिरिव तारकाभिर्देवच्छन्दार्धहारैकावल्याद्यपरिमित दिव्यमौक्तिक-मालिकाभिर्डिण्डीरमण्डलीभिरिव यमुनाह्रदमुपस्कृतमुर स्थलमुद्वहन्तं निजवाहनविहगाधिपवेगातिशयोद्वेगाकुलां वक्षस्थलकृतमन्दिरामिन्दिरां समाश्वासयितुमिव साभिनयमभयहस्तं प्रदर्शयन्तं भवदीयकीर्तिप्रताप-तिरस्कृताववां किमित्येवं विरचयसीति कर्णयोरावेदयद्भ्यामिव चन्द्रसूर्याभ्यां शङ्खचक्राभ्यामुदञ्चिताभ्यां विराजितदोर्दण्डम् अजस्रवक्षो-देशावस्थितलक्ष्मीदिव्यविग्रहलावण्यतटाक परीवाहमिव पीताम्बरं वसानं लोकबन्धुमपि मां तुलैकांशसमाश्रयेऽपि परमनीचं वदन्ती मे जना भगवच्चरणाश्रयादेतदपयशः प्रमार्जयामीत्यागत्य तुलाकोटयग्र-तोऽत्युच्चतरदेदीप्यमानेन दिवाकरेणेव नूत्नरत्नकटकेन जनितया रुचा पुनरुक्तपाटलिमातिशयं पदसरसिजयुगं प्रसारितयोर्वैनतेयकरसरसिज-योर्न्यस्तवन्तं ध्वस्तदन्तावलदुरन्तचिन्तासन्तानं सन्तानमाश्रिततते: चिरन्तनं पुरुषमपि नित्ययुवानं कुसुमाभिवर्षण समयपरिभ्रष्टेन सर्वतः

 In Public domain. Digitization Muthulakshmi Research Academy

प्रतिविहितपद्मरागकिङ्किणी केन निजप्रभापिहितान्तरालेन वज्रमयेन केनचित्सुराङ्गनाकरतलैकवलयेनेव अरुणतर कौशेयसूत्रविरचितप्रान्त-जालकेन श्वेतच्छत्रेण परिष्कृतोत्तमाङ्गं गगन महाह्रदमध्यविकसितकमल-कुवलयकह्लारपुण्डरीकमण्डलीसन्देह दायिभिर्निजदर्शनार्थं विहायसाग्र-मिलितानामनिमिषाणां प्रकोपपात्रैरपरैश्छत्रैस्सञ्छादितोपरिभागं वीज्यमानं मृणालधवलाभ्यां चामराभ्या मभिवन्द्यमानं कोटिशो मिलितैस्साञ्जलिबन्धैरानन्दबाष्पसगन्धैर्भक्तजनबृन्दैस्संसेव्यातसी-कुसुमासितसुकुमारं यतिराजं सम्पत्कुमारमानन्दतुन्दिलस्वान्तः क्षमापाल-कान्तस्तत्र कानिचिद्दिवसान्यवसादयामास ॥५॥

पद्यम् ॥

प्रतिपाद्य भूरिवित्तं क्षितिनाथस्सोऽयमखिलविप्रेभ्यः ।
अगणितविभवस्तस्मान्नगरात्प्रस्थानमतनुत बलेन ॥२८॥

गद्यम् ॥

अतिक्रम्य च साकं पृतनया भृतनय स्तनयो रामकृष्णभूमिपाल-स्याश्रितमनोरथपूरणदक्षिणो दक्षिणस्यां दिशि योजनद्वयमात्रं पन्थानमतिपत्य च निशमितचरीं कावेरीं महानदीं तत्र प्रवर्तिताप्लाव-नियमः प्रविश्य च पार्श्वद्वयदुरन्तनिरन्तरशशिकान्तमणिकान्तनिशान्त बहिरुपान्तनितान्तसंवर्धितनालिकेरपालिकीरकलकलरव मुखरान्तरा-मन्तरातरामङ्गलतरकवेरकन्याभङ्गभङ्गमधुरतरजलपानकृतान्य सलिलनै-रस्यबृन्दारकबृन्दखण्डितमन्दाकिनीशकलैरिव तादृशीमात्मदुर्दशां तस्यै निवेदयितुमवतीर्णैरुपर्युपर्यट्टालकान् विमलतरपताकावितानैः कृतालङ्कारं

In Public domain. Digitization Muthulakshmi Research Academy

मुक्ताहारमिवोभयभागे विसृत्वरं कावेरीझरं दधानं तुङ्गतरगोपुरशिखरलिखितसारङ्गभृत्तनुश्रीरङ्गपत्तनमभिवन्द्य च तत्र निरन्तरानेकब्रह्माण्डमण्डलोद्धरणजनितपरिश्रमविधूननायेव सह्यातनुजान्तरालदलितसरसिजपरिमलभरितमन्दानिलवलनसुभगं भावुकनिस्समानदिव्यविमानमध्यभासमाने पवमानमयतूलपिचण्डिल कुण्डलीन्द्रमण्डलीतल्पे पुण्डरीककल्पे शयानं दयानिधिमाहोस्वित् कावेरी झरयुगलभुजलताभ्यामुत्कण्ठितया वसुन्धरया निर्भरमालिङ्ग्य सुधामय प्राकारस्फारमुक्ताहारमनोहरे तन्मध्यरङ्गस्थलवक्षस्थल इव प्रस्वापितं श्रीरङ्गपतिमुत्तरङ्गमतिर्हर्षोत्कर्षेणाङ्गीकृततत्प्रसादो निर्गत्य तस्मात्पुराच्छ्रीमत्परकालगुरुवरसेवाहेवाकभावादुदित्वरत्वरो व्यतीत्य दक्षिणस्यां दिशि योजनदूरं पुरतोऽनवरतोदञ्चितचञ्चत्सुवर्णकोणाहन्यमानदुन्दुभिभाङ्कारमुखरितदशदिशावकाशां प्रवर्तमाननित्यमहोत्सवां श्रीकृष्णराज कण्ठीरवभुजार्गलनिरर्गलाभिगुप्तामविक्षन्महीशूरो महीशूराभिधानां राजधानीम् ॥६॥

पद्यम् ॥

यत्र स्त्रीणां मध्यमं मध्यमत्वं त्यक्तुं तप्त्वाधश्शिरस्स्वेष्टलाभम्।
अप्राप्यालं खेदतः कार्श्यमाप प्रायो न स्याद्गौरवं मध्यमानाम् ॥२९॥

बहुभावग्रहकलितस्सुशुभोदन्तप्रकाशमानोलम् ।
स्ववशानुगललितपदः करिनिवह इवास्ति यत्र कविनिवहः॥३०॥

यत्कान्ताघनगीतसंश्रवणतः कान्तोऽपि तान्तः पिकोऽ
धश्शीर्षं यदि वा तपस्यतु वनेतत्साम्यलाभेच्छया ।

 Public domain. Digitization Muthulakshmi Research Academy

एवं वापि कपिर्भवेन्न किमपि स्यादस्य पूज्यैस्समं
न्यूनानां घटते न साम्यमथ तत्काङ्क्षास्वरूपापहा ॥३१॥

गद्यम् ॥

अन्येद्युर्धन्येन मनसा राजमूर्धन्योऽसौ निर्वर्तितनियमाप्लावकृत्यो निर्गत्य समुज्जृम्भितकुम्भीन्द्रगम्भीरनिध्वानया सेनया साकं पुरस्कृत्य तोषावहचर्यं शेषाचार्यमाचार्यवर्यसन्दर्शनमन्देतरसम्भ्रमस्ससम्भ्रमं तत्र तत्र मिलितैर्जनैः कुतूहलघनैरेष किल विक्रान्तचक्राग्रणीर्भाग्यनगर-देशघनस्फूर्तिवनपर्तिराजधान्यध्यक्षोऽध्यक्षमागतश्चिरात् स रामेश्वर-धराकान्त यं किलाशृणवाम रिपुकुलभीष्मं भीष्ममिव समाश्रितेष्टार्थ-कल्पकं कल्पकमिव कुशाग्रीयधिषणं धिषणमिवेत्यादिजल्पद्भिरनल्प-मभिवर्ण्यमानं निजदोर्दण्डशौण्डीर्यापदानमारचयन्नपि कर्णपदवीजङ्गाल मप्रकाशितकुतूहलस्साश्चर्यं सौधाग्राधिरूढेन श्रीकृष्णराजपरिवृढेनापि नास्य सधर्माणं विक्रमैकपरिकर्माणं विपुलतमांसं पुमासं कञ्चिदप्य-पश्याम य एष तुरगानीकमध्ये समुल्लसतीन्द्रनीलशिखर इव कश्चन सञ्चरिष्णुर्धृष्णुरेनं विलोकमानस्य ममाप्यङ्कुरति शङ्केति परिजनै-र्भाषमाणेन निरीक्ष्यमाणश्चिराय तावन्निशमितनिजागमनवृत्तान्तेन श्रीमत्परकालगुरुवर्येणाज्ञप्तैः परिजनैर्यथामर्यादं प्रत्युद्गत्यानीयमानोऽ-वतीर्य यानाद्दूरादेव प्रविश्य श्रीमठं प्रणम्य प्रथमं सुधाकर मण्डलान्तर-परिकल्पितसदनं श्रीहयवदनं भगवन्तमनन्तरं तत्र चित्रीयमाणमानसै-र्निबद्धस्वस्तिकपुटैः कटिघटितपटैः कुतूहलोत्कटैर्जनैर्विलोक्यमानो निष्पन्दं प्रविश्याचार्यवर्यसन्निधिं परिष्कुर्वाणं शिष्यमण्डलीं परमहंसमिव

In Public domain. Digitization Muthulakshmi Research Academy

पद्ममण्डलीं परमहंस परिव्राजकाचार्यं शुचितामात्मनः प्रकाशयितुमिव समुल्लसच्छिखाभिरामं प्रस्तारयाम्यदोवृत्तं जगतीति जातकुतूहलेन वाणीपतिना अदौ गुरुरेष इति सूचयितुं सत्वगुणघुटिकाखण्डेन लिखितयेव गुरुत्वबोधिकया रेखिकया सितमृदूर्ध्वपुण्ड्रवल्ल्या निरन्तर-भुजङ्गानुषङ्गदोषजिहासया सेवमानया केतकीकुसुमरेखयेव श्रीचूर्णरेखया च विराजमानललाटफलकं श्रुतियुगल नित्यसक्तदृष्टित्वमात्मनो व्यञ्जयितुमिव आकर्णान्तविश्रान्तदिव्य विलोचनयुगलं रसनाभिधपद्मराग-सिंहासनाग्रदेदीप्यमान हयवदनपुरतो निबद्धमौक्तिकतोरणावल्येव विमलतरदशनावल्या मनोहरम्। तन्त्रचतुष्टयीकूलङ्कषमतिरयमिति प्रख्यातिरेखाभिरिव चतसृभिरुपवीत सूत्रिकाभिः पद्माक्षोऽत्र विहरतेऽज-स्रमिति प्रकटनायेव पद्माक्षमालिकाभिश्च परिष्कृतहृदयफलकम्। भगवद्दिव्यगुणकनकगुणसमाकर्षणसन्दंशिकायन्त्रिकयेव व्याख्यामुद्रिकया बोधयन्तं शिष्येभ्यस्तत्वार्थान् शरणागतवंश पावनोऽसौ देशि-केन्द्रोऽस्मानपि पावयेदित्यभिलाषेण सेवमानेनेव सोपदण्डेन वंशदण्डत्रितयेन परिष्कृतबाहुमूलं अक्षरमुक्ताफलनिधानसम्पुटकेनेव पुस्तुकेन विभूषितेतरहस्तम् उदयमानतरणिकिरणभिन्नारुणाम्बुज विडम्बनप्रभाडम्बरेण काषायाम्बरेण परिवीततया निजतनुजात् कर्णाद-प्यधिकोऽयं वदान्य इति प्रमोदवता भानुमता निजकिरणैरिव परिरब्धं वर्णव्यत्यययावसरेऽपि न जहाति निजशीलमयमिति बहुमानेनेव विमलतरतीर्थ पूर्णाङ्कुरकं समीपे निहितवन्तमात्मनो दुर्वर्णविकारतादोष-मार्जन कौतुकात्सेवमान इव राजतसिंहासने देदीप्यमानमायतनं सर्वविद्या नामावासं विरक्तेरास्थानं शान्तेरगारं विजयस्याम्भोनिधिं सुगुणरत्ना-

 In Public domain. Digitization Muthulakshmi Research Academy

नामम्भोधरं भवदवतप्तानामाश्रयं प्रतिभालतायाः जगदभिनन्द्यचर्यं श्रनिवास ब्रह्मतन्त्रपरकालयतीन्द्राचार्यवर्यं विलोक्य विलोक्याहो महीवलये कीदृशं सृष्टं भगवता पद्मजन्मना तेजोबृन्दमहो धन्यतास्य देशस्येति मनसि चिन्तयन्नेव मुहुः प्रणम्य साञ्जलिबन्धमित्थमभितुष्टाव ।।७।।

पद्यम् ।।

चिराय फलितं मनोरथमहार्घवल्ल्या मम
प्रसन्न इह तार्क्ष्यभूधरशिरोमणिश्श्रीपतिः।
यदद्य शरणागतव्रजविपत्तमोभास्करा
भवन्त इह दृक्पथे श्रितजनौघसम्पत्कराः।।३२।।

विचारणसुचारुभिर्गगननिर्गलज्जाह्नवी
कचाकचिविचक्षणै रचितशास्त्रसंरक्षणैः।
मदान्वितवदावदप्रकरगर्वसर्वङ्कषै
र्भवत्प्रचुरवाग्भरैः किमपि मोद उन्मीलति ।।३३।।

निर्वीर्या बौद्धचर्याः प्रतिपदमभजन् यादवाः खेदवादान्
सर्वा गर्वातिरेकं सृतिरपि विजहौ सौगती द्रागतीव ।
क्षीणाः काणादवादा धृतिमपि सरणिर्द्रौहिणी प्रौहिणो
त्स्वां जैना दूनास्समन्ताज्जगति न ददृशे कापिलं चापलञ्च ।।३४।।

आभा प्राभाकराणां क्वचिदपि वदनेन प्रकाशश्चकाशे
कौमारा निष्प्रचाराः क्षपणकनिपुणाः क्वापि मग्ना विविग्नाः।

In Public domain. Digitization Muthulakshmi Research Academy

श्रीवास ब्रह्मतन्त्रादिमपदकलिजिद्देशिकेन्द्रावितन्द्रास्ता-
द्दग्भावत्कवाचामरसरिति जगत्युल्लसन्त्यां नितान्तम् ॥३५॥

पार्श्वतो वीक्ष्य विबुधानामन्त्र्य ॥

दाक्षिण्यं करुणा शुचित्वमनघाचारस्समस्तौचिती
ज्ञातृत्वं समता तथाखिलकलावेत्तृत्वमन्यादृशम् ।
औदार्यं प्रभुता गुरुत्वममितख्यात्यप्रमादादिमा
श्श्रेष्ठा दिव्यगुणाः प्रजाग्रतु कथं नो चेदुरुश्श्रीहरिः ॥३६॥

सन्तु सगुणास्सहस्राण्यस्य गुरोस्स्वविभवे नवधिकेऽपि ।
परदुःखासहनत्वं तदेव विस्मापयत्यस्मान् ॥३७॥

सुरतरुसूर्यसूनुशशिनोऽमितकामितदान्
सुरभिमणी शिबिं बलिनृपञ्च वदन्तु जनाः ।
कथमिदमस्ति वा ननु न वेति न निश्चिनुमः
कलिरिपुयोगिराडिव वदान्यमणिः क्व वसेत् ॥३८॥

इति संस्तुवन्तमवनीन्द्रमणिं यतिराज एष करुणाभरितः।
प्रमिताक्षरां गिरमुदारतमाममितप्रमोदकलितोऽभिदधे ॥३९॥

निर्विष्कम्भमहो वहस्व कविषु प्रीतिं त्वयायुष्मता
सौभाग्यं बहुशोभनं च दधतास्थेयं रिपुणान्तु ते ।
नित्यं स्यादति गण्ड एव भवतु श्रीमन् सुकर्मा भवां
स्तत्ताद्दग्धृतिमांश्च साधुसुहृदां हृच्छूलमुन्मूलय॥४०॥

In Public domain. Digitization Muthulakshmi Research Academy

सौभाग्यैकनिधीं सुशीलजलधिं सुस्मेरगण्डाननां
मेधावृद्धिमतीं ध्रुवं भज जवाज्ञायां जगच्छङ्करीम् ।
निर्व्याघातबुधालिहर्षणविभो वज्राढ्यभूषादिभि
स्संसिद्धिं व्यतिपातलेशरहितां सर्वत्र सम्पादय ॥४१॥

वरीयांस्त्वं नित्यं परिघनिभबाहुश्शिवतमः
प्रसिद्धस्साध्यन्ते किमिह शुभमन्यद्विजयते
जगत्यां स्याच्छुक्लं तव यश इह ब्रह्म निरत
स्त्वमैन्द्रं श्रीभारं भज हररिपोर्वैधृतिमपि ॥४२॥

दूरस्थस्यापि जनैर्गदितास्सुगुणास्तव व्रतायन्ते ।
वाताहृताः परिमलाश्श्रीमन् पद्माकरस्येव ॥४३॥

दृष्टोऽस्यधुना राजंस्तुष्टस्ते वरद एष हयवदनः ।
विजयी भव चिरकालं सुजनानामाशिषाम्भरैरनघैः ॥४४॥

गद्यम् ॥

इति तत्र तस्य भगवतश्श्रीमत्परकालदेशिकमणेश्श्रीमन्नारायण-स्मरणपूर्वकेण परमानुग्रहेण संवर्मितनिर्मलतरात्मा समर्प्य भक्तिपरवश स्तस्मै निजराष्ट्रसमेधमानं कृष्णातरङ्गसङ्गशिशिर समीरकिशोर विहरणोचितपर्यन्तभूमनोहरमग्रहारमग्रहारैस्साकमनर्घरत्नघटितैः किञ्चा-नुग्रहः। प्रसारयितव्योऽस्मदीयविषयान्तर्विराजमानकृष्णपुराग्रहार-कृतविहारगोपालकृष्णसन्निधौ अग्रतीर्थप्रसादस्वीकरणायेति विरचिताया-मात्मना सम्प्रार्थनायां तदनुग्रहसुधालहर्या फलितायां तदनुगृहीता-

In Public domain. Digitization Muthulakshmi Research Academy

नखिलश्रेयोबीजाक्षर सन्देहदानक्षतान् सफलानवनम्रेणशिरसा सङ्गृह्णानः प्रणम्य मुहुर्दत्तानुज्ञस्तेन कतिचनोषित्वा दिनानि तत्र निवृत्य तस्मान्नगरादतिक्रम्य च तटनिबिडितैर्विविधविटपिपटलै श्शिखरनिकरात्पचेलिमया परिपतद्भिः कुसुमैर्निजाभिवर्धनोपकार प्रतीकाराचरणदत्ताङ्गरङ्गैरिव क्रियमाणोपहारां निस्सन्देहविसृमरमन्देतरदिन करकर निकरव्यतिकरदलितारविन्दबृन्दस्यन्दमानमकरन्दबिन्दुसन्दोह लोलुपलोलम्बजालान्धकारितोर्ध्वभागतया सिन्धुराजावरोधताया उचितमारचयितुं प्रच्छदपटेनेव नीलेनावगुण्ठितां सरभसगमनविरचितपणबन्धानामिवाहमहमिकया पतन्तीनामुत्पन्तीनाञ्च वीचीनामनीचीनां घलङ्घलरवैर्दत्तहस्तावलम्बेन परिफुल्लहल्लकतल्लजपरिमललुब्धमुग्धभृङ्गराज पक्षपुटविक्षेपजनितझङ्कारपक्ष्मलितेन निरर्गलतरङ्गकुल परस्परास्फालनचलाचलदलितकोमलकमलडोलानिषण्णमरालमिथुन परिणयोत्सवप्रकान्तमङ्गलगीतायमानसारसाङ्गनानिनादमसृणिते उल्लिख्यमानकांस्यक्रेङ्कारानुकारिणा चक्रवाककुलरसितेन मुखरिततया प्रकाशयितुमात्मनः कवेरात्मजत्वं सन्निहितश्रीरङ्गनगरीकृत सन्निधिं स्तुवन्तीमिव चित्रतरहृद्यगद्यपद्येन वाङ्मयेन श्रीरङ्गराजं कावेरीं नामतरङ्गिणीं मुहुर्मुहुरुत्क्षिप्यमाणाग्रपादतया निराबाधविजृम्भित घीङ्कारतया च सर्वोत्तराशावननिपुणे राजराजेऽस्मदीये जाग्रति बिभर्षि किमित्यदसीयनामेत्यह्वयमानैरिव सङ्गराय यक्षाधिराज तुरङ्गैस्तरङ्गितवेगैरनुगम्यमानोऽतिपत्योत्तरस्यां दिशि सुदूरं तीर्त्वा च राजसभामिव सुधीवराञ्चितप्रान्तभूमिं कालिदासादिकवितमिवातितराम्भोजसदोघनां सुकविकवितामिव सुशोभकैरवगतरसलोलुपैस्सदालि

In Public domain. Digitization Muthulakshmi Research Academy

निवहैस्सेवितां नारायणतनुमिव विलोचनीकृतमहारविन्दराराजितां राज्यश्रियमिव स्वच्छस्वभावरसैकताननतानघराजहंसमाननीयां समुदञ्चितोत्तरङ्गभद्रां तुङ्गभद्राम् अतीत्य च घनच्छविनासैरिभराजैः परिवृतेन निजसैन्येनेव वननिवहेन दन्तुरितं किञ्चिदन्तरमुत्तीर्य च जाता किलाहं कृष्णचरणनलिनाग्रात्तन्नखमयूखनिर्विशेषः कान्तिरित्यतिभूमिमभिमानं त्रिपथगाया एकपदे तिरस्कर्तुमिव कृष्णाभिख्यामुभयधाप्यवलम्बमानां अतिनीलतया इन्दीवराणीव निष्पीड्य प्रवर्तिताम् अतसीकुसुमरसैरिव प्रापितावतारां महानीलमणीनिव विद्राव्योन्मोषितां जम्बूफल रसैरिवाभिवर्धितां तमालपल्लवरसैरिव प्राप्तसंविभागां द्राक्षाफलरसैरिव परिपोषितां परिफुल्लकमलनिचयमरन्दपिपासासमायतमधुकर निरन्तरसहवासव्यसनेनेव समासादितताद्रूप्यां शैवलिनीं अवाप्य च निजजनपदान् प्रविश्य श्रीरङ्गपुरं संसेव्य च तत्र गरुडगिरि शिरोभूषामणिं श्रीमदुत्तररङ्गेन्द्रं यथा यदुगिरिशिरोमणेश्श्रीमन्नारायणस्य सन्निधौ नित्योत्सवादिवैभवस्तथा प्रवर्तनीयं सर्वमप्यत्रेति व्यवस्थाप्य तत्कैङ्कर्य निर्वाहविचक्षणमधिगततत्तत्कालोचितमर्यादाविचारं निरन्तर भागवताराधनाविषण्णहृदयमभिनवागतं मञ्जुलचर्यं भाष्यराघवाचार्यं कृतिवर्यमार्याभिनन्दनीयोऽसि दर्शनमात्रेणैव अनतिचिरदृष्टेऽपि त्वयि काप्युपजायते प्रीतिरग्रजन्मानमिव पश्यामि त्वां यथा मयात्र भगवतः कैङ्कर्ये तथा त्वयापि जागरूकेण भवितव्यं किंबहुनेत्यनुज्ञाप्य निजराष्ट्रललामभूतां पेब्बेराभिधानामविक्षद्राजधानीम् ।।८।।

In Public domain. Digitization Muthulakshmi Research Academy

पद्यम् ॥

स्मारं स्मारं यदुगिरिशिरोभूषणं देवदेवं
ध्यायं ध्यायं कलिरिपुगुरोः पादपद्मं नितान्तम् ।
श्रीमान्नामेश्वरनरपतिर्मित्रगोष्ठीविनोदैः
पुर्यां तस्यां कतिचन दिनान्यात्तहर्षो निनाय ॥४५॥

गद्यम् ॥

तावत्तस्य रामेश्वरराजस्य प्रेमातिशयैकतानो नन्दनन्दनपदारविन्दयुगलनिष्पन्दतरेन्दिन्दिरायमाणमानसवृत्तिर्बहुतरगोबृन्ददायको गोविन्दनायकः सर्वधरणीमण्डलयात्रोत्कण्ठितहृदयः पुरस्कृत्य वितरणपरितोषितविद्वद्यूथां राधाम्बां निजाम्बा शैशवेऽपि सरस्वतीनिरवग्रहानुग्रहपरिमिलिततया निष्प्रयत्नविदितनिखिलवैदिकतान्त्रिकविचारभारमनुजत्वेन व्यवह्रियमाणं रामेश्वरेन्द्रेण निजानुजातं निखिलमेधाविकुलनायकं वेङ्कोबनायकञ्च यात्रोचितपरिजनपरिवृतस्समापृच्छ्य राजानं प्रस्थायानुगम्यमानोऽनेकशतैः कुटुम्बिभिरनुदिनप्रवर्तितसुमृष्टसरसतरान्नवितरणविचारः क्रमेण विरचितनियमाप्लावः अगण्यपुण्याविष्करणीषु पुष्करिणीषु कृतमज्जनश्च पारावाराभिमुखं द्रवन्तीषु स्रवन्तीषु वितीर्य च तत्र तत्राम्बरमणिरुचिविडम्बनाडम्बराणि कनकाम्बराणि प्रदाय रत्नाभरणानि बहुतरस्फुरणानि प्रतिपाद्य सतर्णकं धेनुशतकं विरचित धन्यानेककन्यादानः कल्पितासङ्ख्यधरणिवितरणः उन्मीलित भूरिरूप्यप्रतिपादनः श्लाघ्यमानस्तत्र तत्र विपश्चिदपश्चिमैरभिवन्द्य नीलाद्रौ पुरुषोत्तमं संसेव्य काश्यां विश्वेश्वरं परिक्रम्य गयामभिगम्य

In Public domain. Digitization Muthulakshmi Research Academy

प्रयागं प्रणम्य श्रीकूर्मे सनातनकूर्मं प्रपद्य बृन्दावनमन्यानि चैवंविधानि क्षेत्राणि शतशो दर्शं दर्शं क्रमेण परिचक्राम निखिलपृथ्वीमण्डलम् ॥९॥

यश्च महात्मकुलशशाङ्को वेङ्कोबनायकाभिधानस्य द्विजन्मकुलमणेरखिलगुणाकरस्य धर्मपत्न्यां स्मारयन्त्यां सौशील्येनारुन्धतीं निरन्तरनिरङ्कुशप्रवर्तितसनातनदेवताराधनविधानायां राधाम्बाभिधानायां कदाचिदुदार सुशीलताविलोकनदयार्द्रहृदयेन करतलामलकीकृतातीतानागतवर्तमानवृत्तान्तेन शान्ताग्रगण्येनागण्यपुण्येनालोचनादविष्ठविचित्रचर्येण केनचिदवधूतवर्येण सानुग्रहमाहूयान्तिकभुवमम्ब वत्से त्वमास्थानभूतासि पातिव्रत्यलक्ष्म्या अभिवन्दनीयं हि तव भागधेयं न खल्वन्या धन्या भवादृशी काचिदपि रिपुतारिण्यपि हृदये बहिः प्रकाशयसि न कमप्यभिप्रायं परिमलमिव कोरकितामलील्लताविज्ञातमथाप्यान्तरं भवत्याः मया मधुकरेणेव निकुञ्जपुञ्जगर्भनिर्भरप्रतिच्छन्नमालतीसौरभ्यं माभूदभ्यर्थना परिपेलवं तव हृदयमथापि प्रसन्नेन मयोच्यमानमिदं शृणु गृहाणेममाराधय निरन्तरं भगवन्त गोविन्दं नन्दनन्दनं भविता तवोदरेऽयमेव गोविन्दो नाम्ना दुग्धाम्बुधाविव कौस्तुभमणिरनुजन्माप्यस्य सरूप एवावतरिष्यति चिन्तामणिरिव भूयाश्चिराय सौभाग्यवतीति श्रीकृष्ण दिव्यविग्रहं स्वाराधनं सकुसुमफलोपहारं प्रदाय कल्पितमङ्गलाशासनायां समुद्भूतश्शान्तो दान्तो विजितक्रोधो दूरीकृतलोभ उत्सारितमोहस्तिरस्कृतकामः अस्पृष्टमदः अनङ्कुरितमात्सर्योऽभिवर्धमाननिखिल सुजनवात्सल्यः किं बहुना गुणानां शेवधिः। नैतच्चित्रं

In Public domain. Digitization Muthulakshmi Research Academy

तस्मिन्महापुरुषनिरवग्रहानुग्रहावलम्बितजन्मनि सुगुणानामहमहमिकया पुञ्जीभवनम् ।।

रामेश्वरेन्द्रविजये तुरीयमुल्लासमतनुत विलासात् । प्रत्यग्र दुर्गकृष्णस्समस्तकविगण्डभेरुण्डः ।

इति श्रीमच्छ्रीशैलकुलकृष्णकविसार्वभौमस्य कृतिषु श्रीरामेश्वरविजयाख्ये चम्पूप्रबन्धे यात्रोल्लासश्चतुर्थः।।

श्रीमते श्रीनिवासाय परब्रह्मणे नमः ।

श्रीरस्तु - मङ्गलानि भवन्तु श्रियै नमः।

रामेश्वरविजये - ४ - यात्रोल्लासः ।

।। समाप्तः।।

In Public domain. Digitization Muthulakshmi Research Academy

शुभमस्तु

श्रीहयग्रीवाय नमः ।

रामेश्वरविजये ५ - सुरङ्गानिर्गमोल्लासः

गद्यम् ॥

तावदेव प्रातिकूलिकालम्पूरभिख्यनगराधिपत्यसुभगम्भविष्णु-कृष्णाभिधनरपालाग्र्यनिग्रहाय भाग्यनगरेन्द्रेण वितीर्णाज्ञो राज्ञामीश्वरो रामेश्वरोऽसावुद्वेल्लद्दर्पदौर्ललित्यसमुल्लोडितप्रत्यर्थिशतचेतसा स्रोतसेव प्रावृषेण्ययाऽगण्यया परिवृतः पृतनया महानिव महीधरस्सञ्चरिष्णुर्जिष्णु-र्निर्गत्य नगरादुपेत्य तत्पुरं प्रवर्तितायोधनः क्रोधनः प्रतिभटदर्पानुद्धरन् युद्धरङ्गान्तरालेन्तरालानि ककुभां पटुतरविजयभेरीभाङ्कारैरलम्पूरयन्नल-म्पूरुपुराधिनाथं तं निगृह्य जीवग्राहं गृहीत्वार्पयितुं नासर्दौलाभिध-मण्डलेन्द्राय यावद्भाग्यनगरीमुपागच्छति तावदेव दुस्सहदुर्निग्रहनिरर्गल रामेश्वरेन्द्रभुजार्गलप्रतापसंवर्तविकर्तनप्रभापरिप्लोषितवदनारविन्दा-मन्दायमानदीप्तयः प्राप्तयादृच्छिकसन्तापास्सन्ततमसहमानास्तदभिवृद्धिं लोकबन्धुबन्धुरतेजोभिवृद्धिमिव दिवान्धा मदान्धा उपेत्य सामन्तक्षमा-कान्ता अलम्पूरुराजसुहृदः केचन भाग्यनगरेन्द्रनिखिलराज्यतन्त्रधुर्यस्य मन्त्रिवर्यस्य रामबक्षिनाम्नस्सन्निकर्षं पुरस्कृत्य तदीयसेनाजनान् अये महाराजमन्त्रीन्द्र किमिदमराजकमिव राष्ट्रं निपीड्यते रामेश्वराख्येन राजधूर्तेन दुर्जयः खल्वयमर्जुन इव केनाप्यस्मन्मण्डलवर्तिना रक्षणीया ननु वयं युष्माकं निरुध्यते यदि कतिचिदहान्यत्र महासर्प इव

In Public domain. Digitization Muthulakshmi Research Academy

दर्पमुन्मुञ्चति मञ्जूषिकान्तरनिरुद्धो नूनं न यद्येवं स्थातव्यं तेनैव तत्र भवतो मण्डलेनास्माभिश्शक्यमवस्थातुं किं बहुनेति प्रोद्बलयन्ति स्मादावेव प्ररूढं तस्य मात्सर्यमनिवार्यम् ॥१॥

पद्यम् ॥

या कृष्णता नाम्नि पुरा बभूव तामेव वक्त्रेऽपि निजप्रतापैः ।
तन्वन्नलम्पूरुपुराधिपस्य रामेश्वरो भाग्यपुरं प्रपेदे ॥१॥

रामेश्वरधरणिपते राजेन्द्रं द्रष्टुमागतस्य तदा ।
औत्सुक्यं तत्सचिवो मात्सर्यान्नाक्षमिष्ट विषमात्मा ॥२॥

आत्मीयेष्वपि विषमाः प्रायो वैषम्यमेव दधतेऽन्तः ।
उद्युङ्क्ते कबलयितुं निजशाबानेव शार्दूलः ॥३॥

किमपकृतं रामेश्वरधरणीनाथेन मन्त्रिवर्याय ।
यदकारणवैषम्यं दधार तत्किमिति नो विद्मः ॥४॥

प्रायः प्रचुराः पुरुषाश्श्रेयस्स्विषु जातमत्सरा लोके ।
नह्युपसंहरति रविर्नैजं तेजः कदापि तिमिरभिया ॥५॥

ध्यायं ध्यायं हृदये रामेश्वरभूपतेर्महत्तेजः ।
यवनेन्द्रसचिव एवं यवनैराप्तैरमन्त्रयत रहसि ॥६॥

गद्यम् ॥

भो भो कालयवनकुलीना बलीनास्तेना समवेता योधाग्रगण्याः शृणुतेदं प्राप्तकालं प्रवर्धते हि प्रतिपदं प्रतापो रामेश्वरभूमीश्वरस्य न खल्वेष न विनिर्जित्य सपत्नान्विनिवर्तते संवर्तसमयसब्रह्मचारिण्यपि

In Public domain. Digitization Muthulakshmi Research Academy

रणरङ्गे तथाहि श्रूयते दुराधर्षताप्यमुष्य यदेकेनापि परप्रहारक्षतेनानुपलक्षितया सेनया स्वयमक्षतोरश्छद एव सङ्ग्रामाङ्गणान्निवर्तते खल्वनारतमपि न निशम्यते किलैतेन न विमुखीकृत एकोऽप्यभियाती शङ्के च स्मरणेनाप्यमुष्य विरोधिवरूथिनीनां गर्भा अपि गलन्तीति मन्ये चास्मद्राजाधिराजस्य निर्व्याघातमुज्जृम्भतेऽमुष्मिन् दयाविशेषो यदेनं सैनापत्ये समारोपयितुं कृतमतिरधुना च यद्येनं नयति विलोचनपथं तदास्य मनोरथेन नावकेशीभूयते क्रमेणैष रामेश्वर आदौ सेनाधिपत्यं तदनु सचिवपदं ततः परं साम्राज्यं च नूनं करिष्यति करगतमेव यद्यनवहितहृदयैर्भूयतेऽस्माभिः प्रायेण मेधाविनः प्रदर्शितेऽप्यङ्गुल्यग्रे निगिलन्ति बाहुमेवामूलं नासत्यमेतत्तिष्ठतु राजाधिराजहृदयमदसीय विक्रमक्रमनिशमनानुग्रहजडं प्रायेण भूपतिमात्राणामेवं चित्तवृत्तयः किं पुनः करदीकृतराजसहस्रस्य मण्डलेश्वरस्य कथमिवास्माभिर्वा अतिप्रवृत्तममुष्य सोढव्यं तेजस्तावन्नास्मिन्नुपयुज्यते सामविदितराजनीतिसारतया निरवग्रह भुजार्गलाग्रघनीभूतप्रतापसारतया च नैव दानं फलाय कल्पते निजदोर्दण्ड शौण्डीर्यदूरीकृतदर्पसामन्तक्षमाकान्तसन्ततिसन्ततसमर्प्यमाणासङ्ख्येयानर्घकनकमणिमुक्ताप्रवालगजतुरगोपहारतया नैव दण्डस्य कथाप्यति बाल्य एव निश्शङ्कसमुट्टङ्कितदुरद्धरविरुद्धभटपटलोत्तमाङ्गकोटितया परन्तु साध्योऽयं कथञ्चिद्भेदेनैव तदवधार्यतां यावदेष महाराजेन्द्रविलोचनपदवीं नाक्रामति तावदेव यथोपयोगं द्विलोचनैरप्यापादमस्तक दृष्टिभिरिव भवद्भिर्भवद्भिर्विनिग्राह्य एष विक्रान्तचूडामणिर्यद्येवं फलेग्रहिरस्मन्मनोरथः यदिच दत्तानादरा विचारेऽस्मिन्नुछ्वसन्तोऽपि

In Public domain. Digitization Muthulakshmi Research Academy

चर्मभस्त्रिकाप्राया यूयं वयं च केवलमात्मम्भरयः तदेवं विधेयं त्वरयैवेत्याज्ञाप्य साधुमन्त्रीन्द्र साध्विति श्लाघितस्तैर्विसृज्य तान्निजनिजगृहेभ्यः प्राविक्षद्रामबक्षिनामा मन्त्रीश्वरस्साम्राज्यास्थानीम् ॥२॥

अन्तरे च तस्मिन् पुरैव अप्रतिद्वन्द्वरामेश्वररायप्रतापसमुन्मीलितमात्सर्याः परिपोषितक्रोधाश्च तदीयसपत्नैर्यत्नेन दत्तावलम्बाश्च रामबक्षिमन्त्रिवरेण संयन्त्रितधैर्या अवार्यक्रौर्याः कालयवन कुलीना बलीनास्सेनाभटा ग्रहीतुं तं यावत्तदुपकार्यां निरुन्धतेऽहमहमिकया तावद्दैवात्सोऽपि हूणेन्द्रसन्दर्शनाय समारुह्य रथं तदास्थानं गत एतेषां वश्यतामभजन् सम्मानितश्च तव विदिततदुदन्तोऽन्यत्र तत्रैव कल्पितावासः किमिदमत्यूर्जितं दौर्जन्यं सैन्यानामनुचितमिदं निरीक्षितराजनीतौ जाग्रति त्वयि विचारणीयमेतेषां साहसं यन्मामपि निरोद्धं बद्धास्थास्समागता इति श्रूयते किम्बहुनेति दूतमुखेन निवेद्य मन्त्रीन्द्राय विचार्यतेऽस्माभिरायातव्यं तत्र भवतात्र राजस्थानं प्रतिक्षणमिति दत्तोत्तरः निगूढगरलेन हिस्सरलेन गुप्तमहाशीविषेणेव पटीरतरुणापटीयसीं चिन्तामुपेत्य निर्निद्र एव निशामनैषीत् ॥३॥

अन्येद्युः ॥ पद्यम् ॥

तावत्सन्नद्धकक्षैर्द्रुततरगमनैरापतद्भिर्भटौघै
रत्युत्तुङ्गैस्तुरङ्गैः करिवरनिवहैरुन्नताङ्गैश्शताङ्गैः ।
नानादेशक्षितीन्द्रैरपि निबिडमहाप्राङ्गणं तस्य भेजे
गम्भीरास्थानभागं प्रमितपरिजनो वीररामेश्वरेन्द्रः ॥७॥

In Public domain. Digitization Muthulakshmi Research Academy

याष्टीकैरेकदेशे कवचितमधिकं खाड्गिकैरेक देशे
शाक्तीकैरेकदेशे पटुपटुनटनैर्झाझरैरेकदेशे ।
एकत्रावेद्यमानक्षितिपतिनतिभिः किङ्करैश्चाङ्कितं त
त्तस्यास्थानं गभीरं जलधिमिव नृपस्स व्यलोकिष्ट धृष्टः ॥८॥

क्षमापतिस्समानीतः क्रमादुपेत्य मन्त्रिण
स्सनीड एव नीतिमान् विनीतधीः कृतानतिः ।
निषण्ण ऊर्जितासनेऽविषण्णधीर्मुदा तदा
प्रचक्रमेऽथ भाषितुं वचः प्रचण्डविक्रमः ॥९॥

त्वया मन्त्रीन्द्रेणोर्जितनिखिलभूरक्षणविधि
र्महान्नासदौंलानृपतिमणिरत्यन्तमुदितः ।
त्वदीयाज्ञास्माभिश्शिरसि सुममालेव विधृता
गृहीतोऽयं श्रीमन् सुललितमलम्पूरुनृपतिः ॥१०॥

इत्युक्त्वा सन्त्रासक्षुभितविलोचनमथार्पयित्वा तम् ।
पुनरपि घनगर्जितनिभघनां गिरं स विनयं मुदाचष्ट ॥११॥

क्षितिनाथमौलिमणिना पृतनाया अधिपतिर्भवेति पुरा ।
कृतशासनोऽस्मि यदि ते कुतुकं कारय तथा त्वमेव विभो ॥१२॥

यदि राजराजपृतना हृदि वर्तेयैतदीयबाहुरहम् ।
किं भविता वा पुरतः किं मन्त्रिमणे विकत्थनेनाद्य ॥१३॥
शौर्यावष्टम्भगम्भीरं धैर्योद्वेलं क्षितीशितुः ।
तद्वचो मन्त्रिणः कर्णन्तप्तनाराचतां दधौ ॥१४॥

In Public domain. Digitization Muthulakshmi Research Academy

आदावेव तदीयबाहुयुगलप्रोच्चण्डतेजोभरै
स्सन्तप्तं सचिवेश्वरस्य हृदयं तादात्विकीनां गिराम् ।
श्रीरामेश्वरराजशेखरमणेराकर्णनात्तत्क्षणं
प्राज्याज्याहुतिदीप्तपावकदशामालम्बते स्मेर्ष्यया ॥१५॥

अथापि चित्ते विनियम्य मन्त्री कौटिल्यमुच्छृङ्खलमेधमानम् ।
बहिः प्रसन्नो भजतेऽस्म गूढनक्रस्य लक्ष्मीं द्युनदीह्रदस्य ॥१६॥

अपि प्रसन्नस्य बहिर्हृदन्तश्शाठ्यं स रामेश्वरराजमौलिः ।
जज्ञौ जवान्मन्त्रिवरस्य धीमानिन्दोरिवाङ्कं जठरेऽप्रयत्नात् ॥१७॥

स्मारं स्मारं राजमणेस्तस्य महार्घं मन्त्रीन्द्रोऽसौ दोर्युगलीविक्रमभारम्।
वाचां जालैश्शाकुनिको मत्तमयूरं यद्वत्तद्वद्वन्धुममुं द्रागयतिष्ट ॥१८॥

सत्यं राजेन्द्रमणे रामेश्वर भूतलेऽसि विक्रान्तः ।
न चिरादत्रैव पुरा भवतस्सैन्यानुरोधोऽस्तु ॥१९॥

रामेश्वर महावीर राजसेनाधिपत्यभाक् ।
कदा त्वमित्यर्थयेऽहं सततं मुदितान्तरः ॥२०॥

गद्यम् ॥

इति तस्य सचिवेन्द्रस्य वचनमर्थद्वयमेदुरं मन्वानोऽपि निर्भरप्रतापोष्म गर्भदोर्दण्डोऽपि न समयोऽयं प्रदातुं प्रत्युत्तरं यदेष विषनिचोलितामृतान्नकबल इवातिचिरनिगूहितकुटिलाकारोऽपि बहिर्मधुमयः किमपि मां यतते विवशीकर्तुं तथाचेतस्ततोऽप्यग्रे प्रतिहारस्य महोद्भटास्सेनाभटाः क्रूरक्रूरमुखास्समापतन्त्येते च पुरैव कृतवैरा मया

 In Public domain. Digitization Muthulakshmi Research Academy

तत्र तत्र समराङ्गणेषु शूरमानिनः परशौर्यघर्षणाव्युत्पन्नाः हन्त विषममापतितं यत्सैनापत्यजिघृक्षया समागतस्य मम विषमहृदयेनामुना निर्बन्धो भविष्यति मन्ये च कीदृशामपि दैवादिष्टावाप्त्यवसरेष्वनिष्टमतर्कितमेवापततीति भवतु नैष विषादावसरो रक्षिष्यति नूनं भगवान् पक्षीन्द्रभूधरचूडामणिर्निरुपाधिककरुणाशिशिरान्तरङ्गो रङ्गेन्द्रः अपसरामि तावद्यावदेते समापतन्तीति क्षणं विचिन्तयमान एव विरचिततात्कालिकसम्मानः यदभिरुचितं मन्त्रीन्द्रायेति वदन् दत्तानुज्ञस्तेनावतीर्य सभास्थानाग्रात् प्रतिहारभाग एव सज्ञीभूतैर्मन्त्रीश्वराज्ञापितैः प्रातरुच्छृङ्खलमैरेयपानमत्तहृदयैरदयैर्दूरीकृताचारैरुत्सारितविनयैरनाघ्रातनीतिभिरनालोचितमर्यादैरनङ्कुरित सत्वगुणैरसम्भावितशान्तिभिरनादृतविप्रकुलैरनाराधित परदैवतैर्निशाचरैरिव द्वीपान्तरनिर्वर्णनव्यसनादुपागतैस्सिंहलद्वीपातिराजशब्दं बिभर्त्येष रामेश्वरेन्द्र इति जातमात्सर्यैर्जिगीषयावतीर्णैरिव सङ्घीभूय गाढान्धतमसकिशोरैरतिशूरैर्निरुध्यते स्म बद्धवैरैर्घोरैर्महापातकैरिवाकस्मिकैस्सुकृतराशिर्मदबन्धुरैरिव सिन्धुरैर्मृगेन्द्रशावः मन्देहैरिव तेजोनिधिर्वृकैरिव महाव्याघ्रो घनाघनैरिव महागिरिस्तूलराशिभिरिव समीरणो निशाचर किङ्करैरिव हनूमानञ्जनेनेव निर्मितैस्सारांशैरिव तमोगुणस्य तनुजैरिव कलिकालस्य किङ्करैरिव शनैश्चरस्य विधृतखड्गैरुद्धृतखेटैरन्योन्याहतचपेटैरारक्तोष्णीषैरुज्जृम्भितवीरघोषैराप्रपदीननीलकञ्चुकैर्जगद्वञ्चकैर्दृढनिबद्धकच्छपुटैः कालयवनस्य कौलेयकैः कौलेयकैरिव महागजेन्द्रो रामेश्वरेन्द्रः ।।४।।

In Public domain. Digitization Muthulakshmi Research Academy

पद्यम् ॥

विदधुर्निरोधमात्रं जेतुं नाशक्नुवन्नमुं सैन्याः ।
अपि मसृणैः प्रालेयैस्सहस्रभानुर्न याति परिभूतिम् ॥२१॥

प्रचुरप्रतिघोऽपि नृपो नैतान् हन्तुं कुतूहलमधत्त ।
क्षुभितोऽपि नैव जलनिधिरनवसरेऽत्येति मर्यादाम् ॥२२॥

एनमधिगत्य रुद्धं मानवनाथं तदा स मन्त्रीन्द्रः ।
अन्तर्जहर्ष नितरां किं तच्चित्रं जनेषु विषमेषु ॥२३॥

प्रायो निर्गुण एव ज्यायांसं सुखभरं बिभर्ति नरः ।
गुणवत्स्विव तेषु पुनर्दधते केवापि यन्न वैषम्यम् ॥२४॥

कस्यायं कुत्र याति क्व वसति किमु वा कृत्यमस्याद्य केऽमुं
निर्बध्नन्त्यत्र किं वा विरचितममुना प्रागवस्थास्य का वा ।
इत्येनं वीररामेश्वरधरणिपतिं तत्र रुद्धं निशम्या
प्यन्तः कौटिल्यपूर्णस्स तु सचिववरो नैव चक्रे विचारम् ॥२५॥

राजानं नाद्राक्षीत् सचिवमुखं वापि न व्यलोकिष्ट ।
रामेश्वरधरणिपती रुद्धो विषमैरिदं व्यचिन्तयत ॥२६॥

धिगस्मान् दुर्दान्ताननधिगतसारानतिचिरा
दमी के राजानः कथमिव च भृत्या वयमपि ।
जगन्नाथे जाग्रत्यनवधिककारुण्यजलधौ
यदेतान् जानीमस्सपदि बत नाथा इति वयम् ॥२७॥

 In Public domain. Digitization Muthulakshmi Research Academy

अनासाद्यं किं वा भगवति रमायाः प्रियतमे
प्रसन्ने देवेशे भवति वयमेवातिचपलाः ।
धिगेतान्निर्लज्ञान् बत समुदिते सङ्कटभरे
स्मराम श्श्रीकान्तं शममुपगतेऽस्मिन् गतधियः ॥२८॥

कियद्राज्यं के वा वयमिह किमर्थं च जनिताः
कियन्तं जीवामोऽवधिमिति कदा वापि हृदये ।
न जातं वैराग्यं सपदि निखिलं चाप्यवगतं
जगत्सर्वं तुच्छं परमिह विरक्तिस्सुखकरी ॥२९॥

अथाप्येतद्राज्ञां बत हृदयशल्यं यदरिभि
र्लघिष्ठैस्संरोधस्सति महति शौर्येऽपि भुजयोः ।
तथाप्यालोच्यैव प्रचिकटयिषां विक्रमतते
र्विजानेऽहं युक्तामिह भवतु सोढव्यमधुना ॥३०॥

इति चन्तियन् स बहुतरमशनायोदन्ययोर्वशमगच्छन् ।
दिवसं तदत्यवीवहदवसादं नाप्यगाद्वपुस्तस्य ॥३१॥

आरक्तान्तविलोचनं सकुटिलभ्रूभङ्गिदष्टाधरं
स्विन्नस्विन्नललाटमुद्भटनटन्निश्वासवीचीभरम् ।
श्रीरामेश्वरराजशेखरमणेस्तादात्विकं तन्मुखं
दृष्ट्वा सन्यवनाः परिप्लवहृदोऽप्यादत्त धैर्याबलात् ॥३२॥

In Public domain. Digitization Muthulakshmi Research Academy

गद्यम् ॥

उषित्वा तत्र दिनं तदवार्य धैर्यसान्द्रो रामेश्वरेन्द्रो निगलबद्ध इव प्रत्यग्रमदावलो विश्वसन्नविश्वसन् कुटिलान्तरङ्गं मण्डलेन्द्रसचिवं तदाज्ञप्तैस्सैनिकैस्तैरेव नीयमानो राजेश्वरोऽयं राजेश्वराभिधानाभिराम-मारामं तत्र क्वचन बहुविशङ्कटे वेङ्कटेशदेवदिव्यभवने भुवनेड्यमान निजविक्रमक्रमोऽपि समयवशात्परिपेलवतेजः प्रसरणस्तरणिरिव जलधरनिकरनिरुद्धोऽवगम्यमानो जनैर्निरुध्यमानस्तैरजानन्नितिकर्तव्य तामतीते च मासषट्केऽवगत्य च सचिवेन्द्रप्रेरितेन तालपद्दौलाभिधानेन यवनयोधाग्रगण्येन भाग्यनगरारक्षेण केनचिदाक्रान्तमात्मीयं वनपर्तिराष्ट्रं नितान्तचिन्तासन्तानदन्तुरितान्तरङ्गो रङ्गाधिनाथमन्तरङ्गे ध्यायं ध्यायं निश्वस्य निश्वस्य स्थूलस्थूलं तावदेवाशैशवादुपारूढगाढसौहार्द बलक्रमागतश्रीमन्निगमान्तदेशिक मणिप्रपञ्चितायुर्वेदकूलङ्कषपरिशीलन-निर्भरगम्भीरहृदयम् अविषण्णं महत्स्वपि विषादावसरेषु राजाधिराज-च्छन्दानुवर्तनव्यवसितमतिं विदित निखिलराजनीतिलक्षणं विचक्षणं लक्ष्मणार्यं नाम लक्ष्मणार्यमतानुवर्तनदक्षिणं निरीक्ष्य निरन्तरप्रत्यासन्नं सखायं गृहित्वा करेण करं निर्मर्यादविजृम्भमाणरिपुनिरोधक्रोध-व्याधूयमानोत्तमाङ्गो दीर्घोष्णनिश्वासवेगाहतिपरिम्लानरदनवसनप्रमार्जन-पररसनाग्रः आरक्तान्ततरलतरतारकः अक्रामन्निवैकपदे निखिलधरणी-मण्डलं निरीक्षणमाणः पुनःपुनः प्रतिभटपटलप्रलयधूमकेतूयमानौ निजदोर्दण्डौ वेदण्डशुण्डादण्डोद्दण्डौ प्रपातयन्विलोचनाञ्चलमुत्फुल्लहल्ल-कतल्लज प्रतिमल्लरुचिं चन्द्रहासे क्रोधसान्द्रहासेषद्विमलितवदनो बभाषे निर्भरप्रतापगर्भगम्भीररचनं वचनम् ॥५॥

 In Public domain. Digitization Muthulakshmi Research Academy

गद्यम् ।।

आर्यविदितनिखिलराजनीतिरसि चिरतरावलम्बितनिरुपाधिकसौहार्दोऽसीति विज्ञापयामि किञ्चिदवधाननिष्पन्देन भवितव्यं हृदयेन भवतो निमिषं विषमोऽयमुज्जृम्भते दशाविशेषः कथयितुमपि न पारयामि वचनानि हृदयान्तरनिरतिशयविजृम्भमाणरोषावेगनिरुद्धगद्गदस्वरतया यत्नादेवोच्चारयाम्येकैकं वर्णमीदृशेऽपि समये न कम्पते हृदयं न म्लायति वदनं न चलति धैर्यं न कुण्ठीभवति शौर्यं नापसरति भुजदण्डो रङ्गेन्द्रानुग्रहेण यदि च भवेयमीषन्निश्शङ्करीष विवशस्तर्हि नखाग्रेणैवैतानुत्क्षिप्य पातयामि मध्येपयोनिधिपरे लोकालोकाचलं वेत्युत्सहे मुहुर्मुहुरनेन निगूढकपटेन सचिवेनापि प्रतारितमहो मदीयहृदयं न गणितं मम शौर्यं नावलोकितं धैर्यं न चिन्तितो विनयो न निरीक्षितोऽभिजनो नालोचितं यशो नावगतं चातुर्यं न गृहीतं स्थैर्यं किमिव कथयामि वृथैव मामबन्धयदसहायं निजनिकटमुपागतमथापि न विषीदामि यदि क्षणं पराक्रमिष्यते मया तदा क्व सेनाभटाः क्व च घोटाः क्व च करटिघटाः क्व महारथाः क्व च सेनाधिनाथाः क्व च मन्त्री क्वच महाराजोऽपि नादुष्करं मन्ये सर्वमेतदथाप्युपजीव्योपजीवकभावो मामायासयति धर्मभीरुं कदाचिदेवमपि सर्वथा प्रकटयितव्य एव पराक्रम इत्युद्वल्गति कुतूहलं हृदयान्महाह्रादादिव मीनशाबः किमिव सुकरमिदानीं प्राप्तकालं च यदविरोधि यत्सदृशं वयः कर्माभिजनानां यदाश्चर्यावहं च तदविलम्बेन कथय माकार्षीरतिक्रान्तचिन्तनं लोके ह्यायत्यां गुणदोषपरिज्ञाता अतीते च कृत्यशेष निर्वोढा तदात्वे चाविलम्बितनिश्चयो राजा विपक्षैर्न जात्वभिभूयते खल्विति ।।६।।

In Public domain. Digitization Muthulakshmi Research Academy

पद्यम् ।।

निशम्य तन्निर्भरशौर्यगर्भितं वचस्तदीयं विपुलार्थदुर्भरम् ।
सलक्षणं तत्र विचक्षणाग्रणीस्सलक्ष्मणार्योऽपि जगाद भूपतिम् ।।३३।।

युक्तं राजन् भाषसे वीरलक्ष्मीशालिन्येषा दोर्द्वयी ते महर्घा।
नैतं कालं साधुमन्ये प्रयोक्तुं नैजं तेजः किन्तु सोढव्यमद्य ।।३४।।

मूक इव शत्रुपक्षे प्रबले तिष्ठेद्यदीह किमपि वदेत् ।
कोकिल इव काककुलैः कुट्टितशीर्षो भवेत्सतैर्मनुजः ।।३५।।

यावत्कालविपर्ययममित्रनिवहं शिरस्तले दध्यात् ।
उपनमति तत्र समये घटमिव भिन्द्यांच्छिलातले तं तु ।।३६।।

परदुस्सहतेजा अपि जातु जडेभ्योऽपि वह्निरिव बिभियात् ।
समये नरः पयोनिधिजलानि बाडब इव ग्रसेद्द्विषतः ।।३७।।

रक्षति भगवानस्मान्न क्षतिरस्माकमिति नरो लोके ।
पश्यन् पश्यन् पाणिं वल्मीके को नु विन्यसेत्प्राज्ञः ।।३८।।

यद्यपि स भवान् वीरो न हि नियतौ समितिविजयतदभावौ ।
एकस्त्वं बहवस्ते सङ्घे शक्तिः कलौ युगे प्रायः ।।३९।।

आद्योपायत्रितयं मिलितममिलितं च विद्विषद्विजये ।
कथयन्ति मनुमुखा अपि राजनये ह्यन्तिमं निषेधन्ति ।।४०।।

भूप यथामति चातुरिकदनमविरचय्य तूर्णमेवेतः ।
निर्गन्तुं युक्तमिति प्रतिभाति ममाथ वेत्सि सर्वं त्वम् ।।४१।।

In Public domain. Digitization Muthulakshmi Research Academy

मा शङ्किष्ठा विचारेऽस्मिन् मानवेन्द्र कथञ्चिति ।
प्रतीकारः कपटिनां कपटेनैव युज्यते ॥४२॥

इत्युदीरितमिदं महार्थवल्लक्ष्मणार्यकृतिना नरेश्वरः ।
चित्तसीम्नि विनिधाय तं पुनश्श्लाघते स्म स महारथोद्धतः ॥४३॥

साधु साधु गदितं भवतेदं स्वागता त्वदुदिता किल युक्तिः ।
औषधैश्च घननीतिविचारैर्व्याधिमाधिमपि साधु धुनोषि ॥४४॥

यत्सञ्जीवयसे महौषधभरैश्श्रीमन् जनानातुरां
स्तत्त्वां वैद्य इति ब्रुवन्तु मनुजा ब्रूमो वयं त्वन्यथा ।
वाक्सञ्जीवनदानतस्सुसमयेष्वार्तावलेः पाटवं
दत्से सम्प्रति लक्ष्मणार्य तदिदं भैषज्यमन्यादृशम् ॥४५॥

इति प्रति प्रशस्तैनं चिन्तादन्तुरितान्तरः ।
क्षमाकान्तो रमाकान्तं रङ्गेन्दुं स्मरति स्म सः ॥४६॥

परिम्लानं दूनं परिचरणसक्तं जनमिमं
न वेत्सि त्वं कस्माद्यदि च विदितं ते कुत इव ।
न रक्षस्यद्यापि प्रबलरिपुरोधार्तमथवा
नितान्तं निद्रालुः किमिव ननु रङ्गेन्द्र मनुते ॥४७॥

दुर्निग्रहनिद्रोऽसि श्रीमन्त्रिपुरोधतान्तहृदयस्य ।
निद्रा गता मम हरे सापि त्वामाश्रिताथवा नूनम् ॥४८॥

वाल्मीकिः किमिति पुरा प्राशंसत कुम्भकर्णनिद्रां ताम् ।
नूनं तद्दृष्टिपथं कर्णपथं वापि नागास्त्वम् ॥४९॥

In Public domain. Digitization Muthulakshmi Research Academy

कः कुत्र वा प्रयातु श्रीमंश्चिन्तापि का तव जनानाम् ।
निद्रैः का जगृहे त्वां किमन्यदुच्छृङ्खला पिशाचीव ॥५०॥

आजन्मनः पवनतूलमृदौ फणीन्द्र
मञ्चे श्रिया परिचिताङ्घ्रितलः कराभ्याम् ।
निद्रासि माद्दशदशाच्युत चेत्तवापि
कां वा गतिं भुवि भजेरिह किं वचोभिः ॥५१॥

आदावेव हि विश्वरक्षणविधौ कस्मात्कृतं साहसं
स्वं नालोच्य बलाबलां प्रयतनं लोकेऽतिहासास्पदम् ।
निद्रा सम्प्रति सूचयत्यतितरां शक्तेरभावं जग
द्रक्षायामथ शक्तिरस्ति यदि ते जाग्रज्जवादुदर ॥५२॥

सदयमपि विगतकरुणं सपदि विषधरद्विजिह्वसंसर्गात् ।
मन्ये त्वां महतामपि भवति हि दोषाय कुटिलगतिसङ्गः ॥५३॥

सानुस्मरणरोमाञ्चम् ॥

स्वामिन् रङ्गेश मया क्षमस्व रिपुजननिरोधलुलितहृदा ।
समुपन्यस्तं वचनं भवतः करुणानिधेः क्व वैषम्यम् ॥५४॥

उद्धर भगवन्नस्मान् दुर्धरविषमारिरोधपरितान्तान् ।
इति सकलशरण्यं हरिमालम्बिष्टावनीपतिश्शरणम् ॥५५॥

अथ स्वप्ने श्रीमत्खगगिशिखरिनाथेन नृपते
जवाज्जेतासि त्वं प्रतिभटभटौघान् सुललितम् ।
विषादं मा कार्षीरिति सपदि दत्ताभयभरः
प्रबुद्धो रङ्गेन्द्रः किमपि मुमुदे निर्भर इव ॥५६॥

In Public domain. Digitization Muthulakshmi Research Academy

गद्यम् ॥

चिरमालोच्य विविच्य कर्तव्यं निखिलमपि प्रसन्नवदनः सन्नगाराति-नगाधिराजं चिन्तयन्नन्तरङ्गे रङ्गेश्वरं रामेश्वरभूमीश्वरः प्राज्यभैषज्यलक्षण दक्षिणं लक्ष्मणार्यं विलोक्य विलोलेन विलोचनेन निशमयार्य किञ्चि-दुदञ्चयामि वचनमाश्चर्यावहमखिलजगतामिदं पुरा जातु जातुषनिशान्ते नितान्तकान्ते ह्याहरिष्यमाणराष्ट्रधार्तराष्ट्रशासनपरवशेन परिशीलित दुरालोचनेन पुरोचनेन तत्सचिवेन निगुढेङ्गितेन परिक्लेशितानामुद्वेलि तरणरङ्गकार्मुकताण्डवानां पाण्डवानां कारणीभूतविदुरान्तरङ्ग्येव सुरङ्ग्या विरोधिनिरोधविवशस्य ममापि निर्गमनमुचितमीदृशे समये समया देवालयप्राकारमिमं समेधमानस्य चिरं मयि समुदञ्चितसौहार्दस्य द्विजवर्यस्य सद्मनोऽभ्यन्तरेऽन्तरा यथा न ज्ञायते दुर्दान्तैरेतैरेकान्ते तथोपक्रम्य प्रकृतमामकीनाभ्यवहारशालागर्भे प्रतिगर्भ एव धरण्या निर्भरं रचितोचितसन्दर्भैः प्रवर्तनीया सुरङ्गानैषां तत्र प्रत्यवसानावसरेव स्थितिरिति स एव समयोऽपयातुं मम तोषितश्च मया स द्विजाग्रण्यो रोचते यद्येतदार्यचेतसे तदचिरेण गुप्तमन्त्रैरास्माकीनैर्विधेयं प्रतिविधेयं नास्मात्किमपि जाने यथाह्यमित्रा मित्राणि वा न बुद्ध्येरन् कृत्यं यदि च बुद्ध्येरन्नारब्धपर्यवसितमेव नोपक्रम्यमाणं तथा प्रवर्तनीयः प्रयत्नस्तथापि मन्त्रस्यात्यर्थकृच्छ्रेणाप्यशक्यत्वाद्गोपयितुं यदि निस्सरति बहिस्तदा प्रकटनीयमेव निश्शङ्कं दोर्दण्डशौण्डीर्यं संविधातव्यं हि भीतवदेव यावद्भयं नापतत्युपनमति च साध्वसे प्रहर्तव्यमेव दूरीकृत-शङ्कैश्शूरैरिति राजनीतिरियमित्यभिधाय मेधाविनामग्रणीरव्यग्रचित्तेन तेन च साधु दृष्टं महाराजेनेति श्लाघितस्तदनुसञ्जीभूतैरात्मीयैः

In Public domain. Digitization Muthulakshmi Research Academy

खनकैर्यान्त्रिकैश्च यथोदितमुपक्रम्य देवागारप्राकारबाहीकदेशप्रकाशमान-द्विजन्मवरेण्यनिशान्तमध्ये खनद्भिः प्रतिभटगर्भैस्साकं धरणीगर्भं निखातमृत्स्नामपि रिपुजन परिज्ञानभिया तदीय इव यन्त्रे विन्यस्य तत्रैव भवने परिष्क्रियमाणायां पुरुषद्वयसादधो वसुन्धरायाः प्रदेशात्सुरङ्गायां स रङ्गाधीश्वर करुणावलम्बनादनालोचितसाध्वसोऽपि सन्निकर्षमुपसर्पन्त्यां च तस्यां निशि निशि निश्शब्दतया उद्दाम-खुद्दालखननसमुज्जृम्भितनिध्वाने गर्भे धरण्याः तस्यैवार्थस्यानारतं हृदये जागरूकत्वादात्मनैकेनैव श्रूयमाणेऽपि निजनिरोधकविरोधिनिशमन-माशङ्कमानस्तद्गोपनाय प्रवर्तितानेक वाराङ्गनातानगानमसृणित-निर्दयमर्दितमर्दलतालजालझङ्कार चटुलनटनारभटीसमुद्बुद्धनिध्वानति-रोहितशब्दान्तरमङ्गलोत्सवः किञ्चित्कालञ्च तैरेव यवनैरात्मनोत्साहितै-रन्योन्यखुरलीविहार समयोत्तेजितक्ष्वेलितसारङ्गवल्लरीझल्लरीनिनादै-रभिरञ्जित इव निशास्सर्वानयन्नविदितमेव तेषामाविप्रगेहादामहानसञ्च न चिरादेव विरचितायां तस्यां तत्क्षणसमीकृतनीरन्ध्रविपुलफलकाचित तलत्वान्महानसप्रदेशे दृष्टेऽपि दुर्ग्रहायामितरैर्विदित्वा सर्वं च परिजन-मुखेन प्रस्थाप्य निजजनान्निखिलान् पुरस्तादेव शूराग्रण्या निजसेनान्या समन्तान्निर्गमनमार्गे विपक्षैरपरिज्ञातमेव गोपितेषु गृहीतधृढतरकृपाण खेटककुन्तादिविविधायुधेषु निजसेनायोधेष्वासुरङ्गामुखादन्तः पार्श्वयो-रुभयोर्बहिर्विशिखायाञ्च जागरूके च निखिलसन्नाहे कदा भविष्यति भगवदनुग्रहेणेतो निर्गमनं ममेति पारिप्लवहृदयो निनाय तत्र द्वित्रांश्चिन्ताधूसरान् वासरान् ।।७।।

In Public domain. Digitization Muthulakshmi Research Academy

गद्यम् ॥

उदीतायाञ्च मार्गशीर्षवलक्षपक्षाष्टम्यां विस्मापयन्निखिलभुवनं प्रतोष्यतानेव विरोधिसेनाभटान् उत्सवव्याजेन विविधाभ्यवहारैरुदारैरपारै रुपारूढभयकुतुकतया डोलायमानेन मानसेन महानसं प्रत्यागत्य प्रत्यवसानायावलम्बमाने चुम्बनकृतकौतुक इवाम्बुजबान्धवे वरुणदि गङ्गनावदनभागं सूदद्वितीयं विलोक्यात्मानमयमेवावसर इत्यधस्तात्किङ्कर-सङ्कलिताङ्गुलीप्रहारजनिततनुतरशब्देन जानन्नुद्धाटचाधस्समाचितं फलकमेकं विरचिताञ्जलिर्गरुडाद्रिशेखराय भगवते जननान्तरवैरमनुस्मरन् विजेतुं पन्नगा रसातलमिव विविक्षुरवतीर्य सुरङ्गामुखे पिधाय यथापुरं तमेव फलककवाटमुत्कील्यायोयन्त्रेणाग्रतो महाभागवतोऽयं नावसीदितु-मर्हतीति साहायकचिकीर्षया निर्भरस्फार वात्सल्यपूर्तिना बलिचक्रवर्तिना रसातलादिव प्रेरितैरनेकै रनीकैस्स्वकीयैः गृहीतविविधायुधैरुद्भटोद्भटैर्बद्ध-कच्छपुटैः पार्श्वद्वय्यामपि श्रेणीभूयावतिष्ठमानैर्महाराज विजयी भवेति दत्तविजय प्रणामः अन्तरान्तरा प्रतिभटानुधावनभिया कल्पितानल्पान् कवाटानुद्धाटयद्भिः पुनरपि पिदधद्भिर्भटैः प्रदर्श्यमानमार्गः निजदोर्दण्ड-शौण्डीर्यसाहसिक्यदिदृक्षया रसातलात्पृथुलवर्तिकाच्छलेन समागतानां फणाभृतामिव शिरोमणीनाम् प्रसृतमारुतत्वान्निष्पन्दानां निजतेज-स्समधिकोऽदसीयप्रतापप्रभाव इति चकितानां ध्यायतामिव किमपि निर्विण्णतया ज्वलनकुमारकाणां स्थूलतरशिखानां प्रदीपानां पङ्क्तीभूतानामालोकेन समुत्सार्यमाणे सुरङ्गान्तरगाढान्धतमसे क्षणं चकित चकितं क्षणं धीरधीरं क्षणं डोलायमानमानसं क्षणं विलोक्यमानभुज युगलं क्षणं करतलोल्लासितश्मश्रुयुगलं क्षणं विस्फारितलोचनं

In Public domain. Digitization Muthulakshmi Research Academy

क्षणमवधानमधरं क्षणमतिवेगदन्तुरं क्षणमुदञ्चितरोमाञ्चं क्षणं प्रस्विन्नगण्डफलकं क्षणं पक्ष्मलितक्रोधं क्षणं स्थूलस्थूलनिश्वासं क्षणं प्रसन्नगम्भीरं दिग्गज इव कश्चन चिरतरविधृतवसुन्धराभारभुग्नकन्धरतया विश्रान्तिमवलम्बितुमुद्गच्छन् भूलोकं श्रीरङ्गेन्द्रकृतभक्तिरयमक्लिष्टमितो गच्छतु निजराष्ट्रमित्यतिवेलवात्सल्यवलितहृदयतया पुरतो निर्गमनमार्गमावेदयितुं गच्छन्तमिव फणाधिराजं प्रसारयन् रत्नाङ्गुलीयक कमनीयाग्रं दक्षिणं बाहुदण्डमुद्दण्डमुपेत्य तत्प्रतिहारभागं चिरतररसातल निवासपरिम्लानहृदयतया भगवन्तं गरुडाद्रिनाथं सेवितुं कृतभक्ति रुद्गत इव बलिचक्रवर्ती चक्रवर्तिमाननीयकीर्तिर्नैजरत्नगर्भतां स्पष्टं जनानां प्रचिकटयिषन्त्या वसुन्धरया प्रसूत इव तत्क्षणं कश्चन महानीलमणिर्निर्गत्य सिंहकिशोर इव कन्दरामुखाद्भानुमानिव घनाघन कदम्बमध्याद्भीमसेन इव पुरा सुरङ्गायास्सहजानुगतधर्मजातविजयः कुन्त्याश्रितो विदुरप्रार्थ्यमानश्रेयोभरः उद्दीपित विपक्षपृथुलाक्षामयनिवेशः श्रीरामेश्वरवीरशेखरमणिस्तावदव्यग्रमतिनाऽनलसकृत्येन निजसेनाधिनाथेन सज्जीकृतं कियन्तमवधिं महाराजेनोषितमत्र विरोधिवशे किमिदमत्याहितमिति चिन्तया निश्वसन्तमिव समुन्नमिताकुञ्चितनिगालं विनम्रितमुखं प्रस्फुरत्कोमलतरप्रोथपुटमुद्वमन्तं सूत्कारान् मुहुर्मुहुरुन्नमितदक्षिणाग्रखुरपुटविलिख्यमानक्षोणीमण्डलतया निजाधिनाथविडम्बनाय स्वयमपि सुरङ्गामिव खनन्तं शारदसुधाकर दायादवर्णतया अनवक्लुप्तैकत्रावस्थानतया पारदेनेव निर्मितं पुनःपुनरुन्नमितावदातवालहस्ततया विजयचामरमिव प्रेङ्खयन्तं निरन्तर पतनोत्पतनचटुलखुरपुटाहन्यमानपृथ्वीतलतया निजनाथनिर्गमविजयि

In Public domain. Digitization Muthulakshmi Research Academy

डिण्डिममिव वादयन्तं अतिरभसदौर्ललित्यनिग्रहकृताग्रहपुरुषद्वयपार्श्वद्वय प्रतिक्षणदृढतरगृह्यमाणकनकखलीनशृङ्खलाकलापतया मुहुर्मुहुरुन्न-मितावनमितवदनमोहिजवान्महाराजेत्याह्वयन्तमिव उत्तप्तलाक्षाद्रवा-पाटलितसटाच्छटाभिरामतया मूर्तिमतीमिव निजप्रतापरेखां कन्धराग्रे लालयन्तं चकचकितकनकपल्याणकवचिततया निजरथ्यवैषम्यमहाया-सपरिजिहीर्षुणा तत्समानजवोऽयमेवेति जातनिश्चयेनाहरणाय प्रत्यागतेन सप्ताश्वेनेव परिगृहीतं सतीर्थ्यमिव समीरणस्य सच्छात्रमिव मानसस्य अर्जुनविक्रममिव स्तब्धकर्णं भोजराजसभाप्रदेशमिव समुज्वलत्कविकान्तं वेदविदमिवाभ्यस्तविचित्रपदक्रमोदात्तप्लुतप्रचयमतिरभसदर्पोद्वल्गन-चटुलतया याजनशतिकमिव दिनेनैकेनैव महान्तं तुरङ्गराजं रङ्गराज करुणामवलम्ब्य महाराज वीर मा भैषीरिति दत्तहस्तावलम्बो वाहिनी-पतिना तेन यावत्समारोहति तावदेव कृत्यान्तरप्रसक्तचित्ततया तालपद्दौलाभिधाननगरारक्षाग्रगण्य निकटमुपेत्य तत्र निशमितसुरङ्गा-मार्गनिर्गमनोदन्तेन आः कष्टमापतितं महान् प्रमाद इति कृता-धावनेन अतिरभसधावनोर्मिलनिश्वासवेगशोषिताधरेण निर्मर्यादनिदाघ-क्लिन्नसविशेषाङ्गलग्ननिर्मलतनुतरोरश्छदेन अतिसाध्वसप्राप्तदिग्भ्रान्ति ना पिशाचिकाक्रान्तेनेव प्रणष्ट निधानेनेव अभिमुखागतेन निजनिरोधक-विरोधिसेनाग्रगण्येन किमिदं राजन् कपटेन निर्गमनमुचितं तवेत्युदीरीतो दर्पोद्रिक्तकुटीलीभवद्भ्रुकुटिक्षुभ्यमाणप्रस्विन्नललाटदुर्निरीक्षमूर्तिरारक्तान्त-क्रोधदूरविस्फारित विलोचनाञ्चलमरीचिभिर्दहन्निव मूर्तीभूत क्रोधाग्नि-ज्वालाभिस्तं भटाग्रेसरमये किम्मयापचरितं युज्यते हि कपटिनां प्रतीकारः कपटेनैव यथा भवतां निर्बन्धस्तथास्मन्निर्गमनमिदं यद्यस्ति ते

In Public domain. Digitization Muthulakshmi Research Academy

शक्तिर्गृहाणेदानीं मामित्यभिवदन्वरूथिनीसन्नाहाय सरभसं धावमाने तस्मिन्ननुगम्यमानो निजध्वजनीनाथेन समीरणसब्रह्मचारितुरगाधिरूढेन रणरङ्गप्रौढेन अतिवेग प्रधावितनिजतुरगो रथ्यान्तरे तत्रान्तरे कृत्यान्तर-प्रसङ्गादभिमुखमापतन्त्यां निजतटप्ररूढविषयाधिनाथोऽयं प्रतिभट-निरोधान्निर्गत इति सकुतूहलं प्रत्युद्गच्छन्त्यां निजदेशानयनाय कृष्णाभि-धानायामिव वाहिन्यां हूणेन्द्र वाहिन्यामसङ्ख्येयकरितुरगरथचटुलभटवर्गदुर्ग-गम्भीरायां कुम्भीन्द्र बृंहितोपबृंहिततुङ्गतुरङ्गोत्तरङ्गहेषाघोषदत्तहस्ततत्क्षण सन्धुक्षित नलकमुखनिर्यत्नर्नियदयोघुटिकानिध्वानबद्धादरविविधतूर्या-निवार्य झाङ्कार शिथिलितदिक्सन्धिबन्धायां महाराजेन्द्र चिरं विजयीभव शूराग्रणीरसि दुष्करमिदं कृतवानसि कर्म यत्सुरङ्गाया निर्गमनं नाम प्रतीक्षमाणेष्वपि प्रतिभटेषु विचित्रं तव चरित्रं त्वमेव खलु बहदुर्बहिरि राजसिंह इति समुदञ्चित योधयूथोचितप्रणामैस्तैरेव सेनाभटैश्श्लाघ्य-मानापदानस्तामतिक्रम्य चिराद्वरूथिनीं तत्र तत्र निरुद्ध्यमानोऽपि कैश्चिन्नि-र्धूयतान्निश्शङ्कमनुकुर्वन्निव सुधाहरणसमयसरभसगरुडलीला-मत्यक्रामत्तां भाग्यनगरीमगरीयसा समयेन महारभसमयेन ।।८।।

पद्यम् ।।

तावद्रामेश्वरेन्द्रग्रहणकुतुकिभिस्सैन्यनाथप्रणुन्नै
र्योधैरुद्दामखड्गोद्भटनलककरैरापतद्भिर्नटद्भिः।
सत्रावित्रासयद्भिः प्रतिभटपृतनां द्रागवर्धिष्ट युद्धं
बद्धस्पर्धैं स्थितानामधिविपणितदोऽज्ञग्मुषान्तद्भटानाम् ।।५७।।

 In Public domain. Digitization Muthulakshmi Research Academy

केचित्तेषां महोग्रप्रथनभरजुषां वाहिनीमध्यभागे
केचिद्वेगादमीषामपि रचितमहासाहसानां ध्वजिन्यां ।
योधा यावत्पतन्ति प्रचलितवसुधां वीक्ष्यतां हूणसेनां
तावद्रामेश्वरस्यैतदिह बलमिति त्रासतस्ते निवृत्ताः ॥५८।

चित्रं याद्दच्छिकमपि भाग्यजुषां वस्तु साह्यमुपयाति ।
विनिवृत्ता हूणबले यद्रामेश्वरबलभ्रमात्तेऽमी ॥५९॥

जलदोदयाग्रजृम्भितपिपीलिकायूथविभ्रमालोकाः ।
तावद्वृन्दं बृन्दं तत्र सुरङ्गादिद्दक्षया मिलिताः ॥६०॥

आमूलाग्रं वीक्ष्य महाश्चर्यसुरङ्गां
जातां स्फारद्वारमिवाधो भुवनस्य।
श्लाघं श्लाघं तस्य महत्कर्म तदानीं
तत्रास्मार्षीत्पाण्डुसुतानां जनसङ्घः ॥६१॥

भूपालेन्द्रसहस्रमौलिवलभीपर्यन्त दीपायित
ज्योतिर्बन्धुरनून्नरत्नसरणीकेलीवयस्यायिता ।
यस्याज्ञापरिपन्थिदर्पदलनस्सोऽप्यात्तकौतूहलो
राजेन्द्रस्स्वयमेत्य भाग्यनगराधीशो व्यलोकिष्ट ताम् ॥६२॥

गाम्भीर्यच्युतिभीतितः किल महाश्चर्येऽपि यन्नातुचि
न्नालोलत्वमुपैति तस्य तदलं पट्टाभिषिक्तं शिरः ।
श्रीरामेश्वरकृत्यदर्शनवशाद्दोलायमानं चिरा
द्दृष्ट्वाऽत्यन्तिकवार्धकोदितमहाकम्पं जना मेनिरे ॥६३॥

In Public domain. Digitization Muthulakshmi Research Academy

येनाकस्मिकलेखनीविलिखितां रेखामिहैकामपि
क्ष्मापालाः परिलङ्घितुं भुवि चारा त्रस्यन्ति शूरा अपि ।
तस्याज्ञावशर्विभोर्भटवरै रुद्धोऽपि तान् वञ्चयन्नि
श्चक्राम सुरङ्गया क्व नु पुमान् धीरोऽस्ति रामेश्वरात् ।।६४।।

आचोदयादाचरमावनीध्रादासेतु चाहैममहीधरेन्द्रात् ।
अबालवृद्धं विदितं तदानीं रामेश्वरेन्द्रस्य विचित्रशौर्यम् ।।६५।।

गद्यम् ।।

तावदेव बहुतर संवर्तसमयसमुज्जृम्भिताम्भोधरगम्भीरशिलासार निष्ठुरनिपातखुरपुटविदलितधरणितलनिरतिशयसमुट्टङ्कित धूलिपालि निरुद्धघोरघोणघर्घरघुर्घुररवविदलितविपक्षान्तरङ्गेण तुरङ्गेण परिमितसैन्येन सेनान्यानुगम्यमानोऽतिक्रम्य निशीथिन्यामेव सुदूरं तत्र क्वचित्प्रत्युद्ग-च्छन्त्या परसैन्यविमाथिन्या निज वरूथिन्याप्युत्पिञ्जरितपुरः पश्चात्पार्श्व-भागः प्रविश्य निजराष्ट्रं तावदुदिते घनतरोष्मयुवकामिनीवक्षोज-कनककलशपरिरम्भारम्भसमात्तधैर्यतरुण समुदये हेमन्तसमये परिपाक-दशापिशङ्गकलममञ्जरीपिञ्जरित शालेयकेदारनिबिडनिखिलप्रदेशतया निर्भरनिपतदतिशिशिरहिमिका शैतल्यभीततया घनतरपीतराङ्कवेणेवाव-गुण्ठितशरीरायां वसुन्धरायां बन्धुरतरोत्पादितनिखिलजगत्तापस्य तपनस्य लोकबन्धुताप्रवादो विरोधिलक्षणयैवेत्युज्जृम्भितमपयशः प्रमार्जयितुमिव सौम्यतामुपगतस्य प्राप्तदक्षिणायनस्य तामरसबान्धवस्य करेषु प्रातरग्राह्य शौर्येषु दिनयौवने च सुखतरस्पर्शेषु विगलति च दिने निष्पाटवेषूत्तप्त-चामीकरद्रवसतीर्थ्येषु जगति वलमानेषु प्रतिप्रत्यूषमप्युद्गाढ तुहिन-

In Public domain. Digitization Muthulakshmi Research Academy

निपतनवशात्पारावारैस्सह बद्धस्पर्धमन्तर्जठरधृतबाडबाग्नितयेव धूमायमानेषु सर्वतो महाह्लदेषु किं बहुना स्वाभिमुखमागच्छति विक्रान्त राजचूडामणिरेष किं करिष्यति वेति भियेव धनुरवलम्बमाने चित्रभानौ चिरान्निर्गतो महाराजोऽयं भाग्यनगरादिति कुतूहलेन नृत्यद्भिरिव वनास्फालनान्दोलितैर्ध्वजपटपटलैरुदग्रसौधाग्रोत्तम्भितैरुत्तंसितां कुलक्रम समागतां वनपर्तिराजधानीं दूरादेवावलोकयन्नतिक्रम्य प्रत्यर्थिनिवहाक्रान्ततयाति प्रियमपि निजरामसागरोपवनमप्रविश्य बहिरेव गतो महाराजो बतेति जनकोलाहले विजृम्भमाणे प्रविश्य श्रीरङ्गपुरमावेदयितुमिव सुरङ्गानिर्गमं स रङ्गाधीशाय भगवते निजकुलदैवताय स्फीत कुतूहलस्समारुह्य गरुडगिरिं प्रदक्षिणीकृत्य दिव्यविमानं प्रणम्य भगवन्तं विलोक्याचरणमकुटाग्रं विलोचनानंदं रङ्गेन्दुं सगद्गदस्सानन्दभाष्पस्साञ्जलि बन्ध इत्थमभितुष्टाव ।।९।।

पद्यम् ।।

त्वदनुग्रहनिग्रहयोर्न किमपि दुष्करमवैमि रङ्गेन्द्र ।
तृणमपि लोकाधीश लोकाधीशोऽपि तृणति यन्निमिषात्
।।६६।।

जगदगदङ्कारदये भवति सुरङ्गावनैककृतदीक्षे ।
कथमिव बाधेरन्मां त्वद्भक्तं वैरिणस्सुरङ्गां ते ।।६७।।

श्रीभूम्योस्स्पर्धायां तनुजोऽयं मम ममैव तनुज इति ।
सपदि सुरङ्गागर्भाद्धरणिरसूतेव मां भवत्तनयम् ।।६८।।

In Public domain. Digitization Muthulakshmi Research Academy

नैतच्चित्रं विजाने त्वदनघकरुणावारवाणात्तरक्षः
पक्षीन्द्रो यत्सुराणां नगरभुवि सुधामाहरन् बाहुदर्पात् ।
सन्नद्धान् युद्धहेतोरखिल सुरभटान् द्राक्तथाऽसौ व्यतानी-
न्निन्देयुः प्रौढदर्पक्षुभिततरहृदस्ते यथा स्वामरत्वम् ॥६९॥

इन्दुकरादपि चन्दनमन्दारसुगन्धिमन्दमरुतोऽपि ।
अति शिशिरा रङ्गपते त्वदपाग सुधाझरी हरतु तापम् ॥७०॥

गद्यम् ॥

इति सम्प्रार्थ्य भगवन्तमुत्तररङ्ग कान्तं नितान्तं प्रतान्तिमुद्धूनयं-स्तद्दर्शनेन समर्प्य तस्मै दिव्यरत्नाभरणानि निजरुचिधिक्कृतारुणकिरणानि करुणानिधये प्रणम्य सम्यक् प्रदक्षिणीकुर्वन् विमानमभिवन्द्य रमाभूम्यौ तत्रैकदेशे विन्यस्य पञ्चषाणि पदानि पुरतोऽन्तराले भगवदाचार्यसन्निध्योः परिकल्पितं भगवतोऽध्ययनमहोत्सवाय तत्र तत्र विचित्रतरपटपटल घटिततया व्यालम्बमानानैकविधनूत्नरत्नहारस्फारमहोदाररुचिनिचय-कल्माषिततया च विष्णुपदासक्तमप्याकालिकमभूदित्यात्मनोऽपयशो निर्धूननायावनितलेऽवतीर्य विष्णुपदासक्त्या निरन्तरमखिलजननयनासेच नकतया वर्तमानमिव गन्धर्वनगरं भगवद्दिव्योत्सव निर्वर्णनजातविस्मय-स्तिमितैरिव देवैर्विचित्रतरपुत्रिकासहस्रैर्निगलितविलोकमानजननयन-तुरङ्गमङ्कायमानाग्रमहोत्सवसेवासमागत दैवतकरकिसलयानवरतपरि-गलदसमकुसुमसमुदयधारासारैरिव शबलतरचेलजालवेल्लितैः प्रवर्तित-मनुजलोचनोत्सवारम्भैर्महास्तम्भैरभिगुम्भितं क्वचिदखण्डब्रह्माण्डकोटि-नायकरङ्गनायकमहोत्सवसिषेविषा युगपदुपागतसुमेरुकुमार किञ्जल्कि-

In Public domain. Digitization Muthulakshmi Research Academy

तानेकसौवर्णब्रह्माण्ड शिशुमण्डलीसन्देहदानस्थूललक्षैः पिशङ्गवर्णैर्वर्तुल-स्स्फटिकमयदीपभाजन विशेषैरुल्लसद्दीपकलिकैः प्रतिबिम्बिताम्बुज-बन्धुबिम्बैरिव बुद्बुदैः दन्तुरितमुदन्वन्तं विराजन्तं निजननान्दुरिन्दिरायाः पतिर्महोत्सवसमये धत्ते जगन्मोहनान्याकल्पानीति द्रष्टुमवतीर्णैस्तारका-पङ्क्तिपुञ्जैरिव दीपप्रभा प्रतिफलनथलथलितैः व्यालम्बमानैः स्फटिक-मणिगुच्छैरुपारूढोदाढ सौभाग्यं तत्र तत्र महोत्सवदिदृक्षया सङ्घीभूतानां लक्षणोरूणां धिक्कृत निजश्रीभरमिति स्निग्धरम्योरुलावण्यमुद्वीक्ष्य साध्वसात्कम्पमानैरिव मन्दानिलचलाचलपलाशै रम्भास्तम्भैः प्रतिदिशं निबद्धैः परिष्कृतं सेवाकौतुकिना राजराजेनेव समर्पितं पुष्पकं मनसेव निर्मितमाश्चर्यमिव पुञ्जीभूतमसमानं कायमानं प्रविश्य तत्र च व्यालोलवनमालं चलाचल पीताम्बराञ्चलं कम्पितकर्णावतंसञ्चरन्तीं दधानां मोहिनीरूपं रमणीय तरगतिविजिततया पादयोर्निपत्य सावधान-वचनानि वदतेव हंसमिथुनेन समुल्लसच्छिञ्जितेन मौक्तिकमञ्जीरयुगलेन विराजमानां यन्त्राकृष्टतटिल्लतातन्तु सन्ततिनिर्मितेनेव पीताम्बरेण परिवीतमध्यभागां मदनमहाराजराज्यभारदिव्यतर रत्नाट्टालकेनेव नवमणिमेखलाकलापे नानुमेयमध्यभागामदसीयपाटलकुटिलतर-नखरूपस्य मामकीनचञ्चुपुटरूपस्य च साधर्म्यं घटते वा न वेति जिज्ञासयेव अहोस्वित्सौवर्णकङ्कण समुज्वलत्पद्मरागमणिगणे परिपक्व-दाडिमफलबीजराजिभ्रमाज्जिघत्सया प्रत्यासन्नेनेव लीलाशुकेनाधिष्ठितव-लग्नलग्नप्रशस्तवामहस्तामहो सर्वेष्वपि वलयकङ्कणमञ्जीराद्याभरणेषु ममैवासदृशं भागधेयं यन्मम निखिलभुवनमोहनयोः कनकाम्बुजकुट्मल सच्छात्रयोर्घनयोरस्यास्स्तनयोर्लब्धं स्थानमिति प्रहर्षान्नृत्यद्भिरिव प्रतिपद-

In Public domain. Digitization Muthulakshmi Research Academy

सञ्चरणडोलायमानैरुदारैर्मुक्ताहारैस्तारकितहृदयां हन्त हन्त महोन्नतावावामपि बध्नातीयमिति रुषा विदलयद्भ्यामिव दिव्यकनककञ्चुलीमतिपीवराभ्यां वक्षोजाभ्यां विक्षोभ्यमाणनिखिलभुवनहृदयां रोहिण्येव प्रियतमा तवेति कुपिताश्चित्रा स्वात्यादितारकास्समाश्वासयितुमङ्के दधानेव वज्रललन्तिकाधररुचिभरा पाटलनासामौक्तिकमुखानेकमुक्तावलीर्दधानेन परिपूर्णवदनकुमुदिनीनायकेनानन्दयन्तीं त्रिलोकीं निजसख्यास्त्रिपथगायाश्श्रीकान्तचरणनलिनजनिताहमित्यखर्वं गर्वं सोढुमसमर्थतया तस्या अपि वैशिष्ट्यमाश्रयामीति निश्चित्य तत्क्षणं मुखे जातामिव कालिन्दीं मृगमदतिलकरेखां दधानामनेनैव मोहिनीरूपेण चिच्छेदायं भगवान् पूर्वं मामिति वैरनिर्यातनाय समयं प्रतीक्षमाणेन पश्चान्निलीनेन ग्रस्तदिनकरेणेव राहुणा अम्बरमणिबिम्बाकृतिकनकाभरणविशेषपरिष्कृतमूलदिव्यवेणीभरेण पश्यताञ्जनानामपहरन्तीं हृदयानि दिव्याभरणकोरकिततनुलतामनेन रूपेण निराबाधस्य मम बाधकं राहुं नाम कञ्चिदसृज इत्युपालब्धुं लम्बमानेन राकाचन्द्रेणेव श्वेतच्छत्रेण सनाथीकृतोत्तमाङ्गां पूर्वं किल निखिलभुवनेश्वर्यप्येषा मां वितरीतुं देवेभ्यस्स्वयमेव करे जग्राहेति बहुमानहर्षादश्रान्तसेवनकृतोल्लासविधया सुधया प्रेरितैरिव निजशीकरपुञ्जैश्चामरैर्वीज्यमानां प्रथमे प्रदक्षिणे शठारियतिराजमुखगुरुपरम्परामन्तरान्तरा यथामर्यादं बहुमानयन्तीं प्रदक्षिणे द्वितीये सपदक्रमघनं निगमपारायणमातन्विद्भिरभिष्टुतां तृतीये प्रदक्षिणे दिव्यप्रबन्धबन्धुरस्वरनिशमनेन सानन्दं परिक्रामन्तीं चतुर्थे च प्रदक्षिणे वाराङ्गनागानलोलतया मन्दमन्दं कृतचङ्क्रमां क्रमादेव मन्येष्वपि प्रदक्षिणेषु प्राप्त यथोचितोत्सवां संसेव्य रङ्गनाथाभिधानां परदेवतां धन्यममनुत जन्म सन्मतिशिखामणी रामेश्वरभूमीश्वरः ॥१०॥

In Public domain. Digitization Muthulakshmi Research Academy

तत्र मिलिता विबुधा इत्यभिष्टुवन्ति स्म राजानम्।।

पद्यम् ।।

जगद्भयदचण्डदोर्नरकदानवाग्रेसर
प्रसूतिजनितोल्बणापयशसो विधूत्यै किल ।
भवन्तमखिलप्रियङ्करणशीलमत्यादराद्धरा
प्रसुषुवे विभो गुणनिधिं सुरङ्गोदरात् ।।७१।।

श्रीमद्भारत एव मानवपते तादृक्सुरङ्गामुखा
द्धीमस्योद्गमनं श्रुतम् ननु कलौ को वा पुमानीदृशम् ।
ईष्टे कर्म विधातुमुद्भटरिपुव्यूहाग्रबाहाग्रभूदर्पोद्धूनन
विक्रमक्रमजुषस्त्वत्तो जगत्तोषकात् ।।७२।।

इति कृतिपतिततिसन्नुतनिजभुजविक्रमभरो धराधीशः।
विधृतामन्दानन्दान्विधाय तान्नैजधाम भजते स्म ।।७३।।

रामेश्वरविजयेऽस्मिन् पञ्चममुल्लासमतनुत विलासात् ।
अभिनवदुर्गाभिजनः कृष्णः कविगण्डभेरुण्डः ।।

इति श्रीमन्नवदुर्गशठमर्षणतातार्यवर्यतनयस्य कृष्णकविसार्वभौमस्य
कृतिषु रामेश्वरविजये सुरङ्गानिर्गमोल्लासः पञ्चमः।।

श्रीमते श्रीनिवासाय परब्रह्मणे नमो नमः

श्रीरस्तु । मङ्गलानि भवन्तु । श्रियै नमः।

रामेश्वरविजये - ५ - सुरङ्गानिर्गमोल्लासः।

।। समाप्तः।।

In Public domain. Digitization Muthulakshmi Research Academy

शुभमस्तु

श्रीहयग्रीवाय नमः ।

रामेश्वरविजये - ६ - कल्याणोल्लासः

पञ्चषदिनेषु यातेष्वञ्चितगङ्गादितीर्थयात्रं तम् ।
गोविन्दनायकमणिं सोऽविन्दत वीक्षितुं महत्कुतुकम् ॥१॥

गद्यम् ॥

तावत्पर्यटन्नखण्डधरणीमण्डलमनुगतैरनेकद्विजकुटुम्बनिकुरुम्बैस्साकमाकलितविविधवितरणस्तत्रतत्र क्वचन निर्निरोधसमुन्मीलितानेकलताप्रतानकृतावष्टम्भजृम्भमाणबहुविधविशङ्कटविटपीपटलचटुलविटपशिखरनिकरपरिचुम्बितनाकलोके समुल्लसत्सल्लकी पल्लवतल्लजोल्लोलकल्लोलितमेखलाञ्चिततया पुनरपि चण्डांशुमण्डलतिरोधानायोत्तिष्ठेदयमिति शङ्कया तन्निवारणाभ्यर्थनायागतयेव समाश्रिते सन्ध्यया विन्ध्यनाम्नि धरणीधरे कुत्रचिन्निश्शलाके प्रदेशे दैवात्परित्यक्तजन व्यायामोचितमार्गैरज्ञातत्वाज्ञातुचिदपि जनैर्दुष्प्रवेशलतागुल्मकवचितं गहनाद्गहनं कथमपि यथासुखं प्रविशद्भिः प्रविष्टैरप्यरण्यानीं दवीयसीं पदवीं जनचङ्क्रमोचितामविन्दद्भिः किमिदमिति पारिप्लवहृदयैः परिजनैर्निखिलैरपि निष्पन्ददृष्टिभिर्विलोक्यमानवदनः पुरस्कृत्य निरन्तर रमाकान्तचिन्तनपरिपूतमनुजातं वेङ्कोबनायकं तत इतो गच्छन्नवलम्बमाने च चरमगिरिशिखरनिकुरुम्बमम्बुजबान्धवेसञ्चिन्तयन्नन्तरङ्गे भगवन्तं यदुकुलसार्वभौमं वत्साद्य खल्वेकादशी सर्वैरुपवस्तव्यमेव कथमपि नात्र कश्चिदपि विषादो मम

In Public domain. Digitization Muthulakshmi Research Academy

श्वः प्रभाते कथमिव पारयन्मे द्वादशीव्रतं भगवानिह दुर्गे कान्तारे तथा निशामिमां कथमिव रक्षिष्यति वास्मान् पुण्डरीकाक्षो दुर्दान्त-शार्दूलनिध्यानप्रबोध्यमानसाध्वसेऽस्मिन्निति वदन्नेव तत्र क्वचिद्विचित्र-तरमेकमेव कुटीरं पटीरतरुशतसच्छात्रं सन्निकर्षविभासमानैकवापीमात्र-मुद्वीक्ष्य किञ्चिदवलम्बितधैर्यः प्लावितेन स्वरेण कः कोऽत्र भो इत्याहूय निर्गतं कुटीरान्महाप्रमाणत्वात्कृतयुगपुरुषमिव दृश्यमान-माजानुचुम्बिबाहुदण्डं दधानं व्यथापनोदनपटुतरमनालोकितपूर्वं किमपि रूपं कमपि पुरुषं किन्नामा भवानमुष्य च ग्रामस्य किमभिधेयं किमत्रैक एवावतिष्ठसे त्वमुत ससहायस्सर्वं निवेदयेत्यापृच्छ्य तेन च नाम्नास्मि पुरुषोत्तमदासोऽहं नाम चास्य ग्रामस्य पुरुषोत्तमपुरमिति जगद्विदितम-सहाय एवाहं रक्षामि वनमिदं निशीथिनीमिमां क्रियतां वासो यथासुखमत्र भवद्भिरस्मत्सहायैः किमिति दिशो विलोकध्वे मा भैष्ट सर्वथापि तेजस्विनो यूयमित्यभिहित स्तत्रावतारितसर्वसम्भारो जलधिगम्भीरो नीत्वा तां यामिनीं चिन्तयन् श्रीकान्तं भगवन्तमेव निरन्तरमुदिते च कुवलयमुनिप्राणायामोपदेष्टरि कोककुटुम्बजीवनौषधे कोकनदप्रमोदकन्दे कस्मिंश्चित्तेजोबृन्दे कृतनियमाप्लवाद्याह्निककृत्य-स्सत्यसन्धो यद्यदविद्यमानमात्मसन्निकर्षे तत्तदतिवेलरभसेन वस्तु ददता यद्यद्विद्यमानं तत्तदत्र पृष्टं दुर्लभमिति वदता तेन पुरुषेण सम्भृतनिखिलसम्भारश्चित्रीयमाणान्तरङ्गेषु जनेषु निर्वर्तितायां च परमपुरुषाराधनायां प्रतोष्य विविधापूपपायसमेदुरैस्स्वादैरन्नैस्सुमृष्टै-र्हृष्टान्तरङ्गो निर्वर्तितपारणाव्रतोऽम्बरीष इव प्रतोष्यतं पुरुषं तेन चादूरादेव प्रदर्शितमार्गो निर्गत्य दुर्गात्तस्मात्साकं सकलैरविकलैः परिजनकुलैः

In Public domain. Digitization Muthulakshmi Research Academy

सम्प्राप्य कञ्चिन नगरं तत्र च कुत्रास्मिन् दिनेऽभ्यवहारो भवता-मित्यभिहितेषु जनैः पुरुषोत्तमपुरेऽत्रादविष्ठ देशाभिरामे ग्राम एवेति वदत्सु निजपरिजनेष्वश्रुतचरमिदमत्र राष्ट्रे कुत्रापि कदापि केनापि पुरमिति गगनन्यस्तविलोचनमालोचयत्सु पौरेषु तेषु विस्मितस्सस्मि-तवदनः पुनस्तरां प्रपद्यतमेव विपिनोद्देशमविलोक्य तत्र तं ग्रामं बहुदूरमपि विचित्यानुपलब्धतदुदन्तः पुलकिताङ्गैस्सानन्दबाष्पैर्भगवत-स्सर्वलोकशरण्यस्य निरुपाधिककरुणावरुणालयस्य कृत्यमेतदत्याश्चर्या-वहमिति ब्रुवद्भिस्तत्रत्यैर्महानुभावोऽसि स त्वमन्यथा क्वेदृशं भागधेय-मिति स्तूयमानस्स्वयमपि रोमाञ्चकञ्चुकितस्साकमनुजन्मना प्रमोद-भाष्पानुत्सृजन्निरर्गलं परिक्रम्य क्रमेण श्रीरामसेतुमुखदिव्यप्रदेशान् विरचय्य विलोचनयोर्जन्म कृतार्थं शेषाद्रिभूषामणेश्श्रीनिवासस्य सन्दर्शनेन मन्देतरसुकृतपरिपाकफलेन तावत्प्रत्यागतैरत्यादराद्रामेश्वरेन्द्रकृत शासनैर्विरचितरिपुनिष्कासनैरामोदिभिस्तुरगसादिभिर्वनपर्तिनगरागमनाय सम्प्रार्थ्यमानो मन्दं मन्दं निजपुरसम्मुखीनोऽभूत् ॥१॥

पद्यम् ॥

श्रुत्वा यान्तमनन्तरं स्वसुहृदं निर्वृत्तयात्रश्चिरा
त्पुञ्जीभूतसमस्ततीर्थपटलीसारङ्किलात्यादरात् ।
श्रीरामेश्वरराजशेखरमणिः कौतूहलोत्तानितो
द्रागा पञ्चषयोजनं गुणनिधिं प्रत्युद्ययौ नायकम् ॥२॥

नैतच्चित्रं राजा यदमुं प्रत्युद्ययौ परं प्रेम्णा ।
देवानामपि मान्यो भागवतोत्तंस एष सुश्लोकः ॥३॥

In Public domain. Digitization Muthulakshmi Research Academy

गद्यम् ॥

अनतिदूरेच तत्र कुत्रचिदनुगम्यमानौ गाम्भीर्याध्ययनव्यसनेनानुसरतेवोदन्वताद्विजकुटुम्बनिकुरुम्बेण मन्दराद्रिमथ्यमानदुग्धजलधिमध्यसमुद्बुद्धडिण्डीरमण्डलीरुचिमदखण्डनोद्दण्डशौण्डीर्यनिर्मोक परिलघुनिर्मलोष्णीषकञ्चुकान्तरीयप्रावारपरिवृतनिखिलावयवतया पावनचरित्राविमाहमिव निरन्तरविष्णुपदासक्ताविति विश्लेषवैक्लव्योप भोगाक्षमतया वात्सल्यादादर्शनादनारतं गङ्गयेव दत्तगाढालिङ्गनौ युगपदुदीताविव जगत्प्रकाशयितुं धरणीतले पूर्णतेजस्कतया सूर्याचन्द्रमसौ उत्पत्तिधरणीधरौ क्षमासरिताङ्गरुडकिशोरौ दुस्तृष्णा कृष्णाहीनां पारावरौ परमानन्दनूत्नरत्नानां वातूलावसद्ग्राहमहातूलस्य उपघ्नधरणीरुहावुपशान्तिलतायाः शुद्धान्तौ प्रज्ञाराज्ञ्याः प्रासादौ विजयध्वजस्य केसरिकिशोरौ लोभमहेभकुलस्य विपुलशाणौ विद्यामणीनां भानूदयौ रागतिमिराणां महामान्त्रिकौ क्रोधपिशाचानां ग्रीष्मोदयौ मोहह्रदानां जन्मनिलयावाचाराणामगोचरौ मदविकाराणां निर्मलादर्शौ सन्मार्गाणाम् उत्पत्तिकेदारावार्जवशालिसस्यानां अनधीनौ विषयविलासानां केलिवयस्यौ सत्यानां पूर्णफलायमानौ राधाम्बासुकृतकल्पतरोः महामणिदीपौ वेङ्कोबनायककुलप्रासादस्य विलोचनाय मानावात्मनस्तौ विलोक्य गोविन्दवङ्कोबनायकौ निखिलसुखदायकौ रामेश्वरराजराजोऽसावन्तरुत्प्लवमाननिर्भरप्रेमभारदूरविस्फारिताभ्यां विलोचनाभ्यामापिबन्निव रथादवतीर्य मन्दमुपसृत्य विनयनमितोत्तमाङ्गोऽभिवाद्य राधाम्बामम्ब दिष्ट्या कच्चित्ते सतनयायास्सपरिवारायाः कुशलं परिपूर्णयात्रां पुत्राभ्यामागतां भवतीं शुभवतीं व्यलोकिषि यथा तव

In Public domain. Digitization Muthulakshmi Research Academy

तनययोरनयोरनवधिकः प्रेमभरस्तथा मय्यप्यवारणीयः प्रसारणीयः तृतीयं जानीहि मां तव तनयं घनयन्त्रितधैर्यमयञ्च ममैकवर्षपूर्वस्सर्वगुणसान्द्रो गोविन्दनायकोऽग्रज एव नेयमौपचारिकोक्तिरपि चायं तव तनुजः कनिष्ठोऽपि ज्येष्ठो मेधाविनामग्रणीरव्यग्रनीतीनामभिवर्धमान तेजा दिने दिने वलक्षपक्षशिशिरांशुरिव शिशिरयत्यन्तरङ्गं निष्कलङ्को वङ्कोबनायको ममानुज एवानधिकवयस्कतया नैसर्गिकाग्रजन्मापि मात्र किमपि शङ्किष्ठा इति प्रणयमधुरगम्भीरललितानि वदन् वचांस्युपसृत्य च तौ नायकौ सन्मणिहारनायकौ गाढमालिङ्ग्य चिराय निर्वर्तितया-त्राभ्यां युवाभ्यामुपागताभ्यामानन्दितं मम हृदयमितःप्रभृत्यविश्लेषमभि-लष्यामि यावज्जीवितं भवद्भ्यामिदमखिलमपि मामकीनं राष्ट्रमेव सादर-मिच्छति युवां महात्मानौ सा दिव्यपदाधिरूढौ किं पुनरहं परन्तु साम्प्रतमसाम्प्रतमित्रनिवहाक्रान्तमप्यविलम्बितमेव कृपया भगवतस्स्ववशे भविष्यत्येव किमन्यत्प्राप्ता युवामपि ममाबाल्यसखाविति प्रेममन्थर-मभिधाय महाराज किमिव दुर्लभं भवदनर्घभुजार्गलनिरर्गल सम्प्राप्त-रक्षणानामस्माकमनौपाधिकी च ते करुणासुखाकरोति स्म रणपदवीमधिरूढापि पुनःपुनरस्मान् कस्मादियद्दूरं राजराजस्य प्रत्युद्गमन मुद्दिश्यास्मान् क्व नु स भवानन्तसामन्तधराकान्तसुदूरमकुटतटघटिता-ञ्जलिपुञ्जनिर्वर्णनायाप्यनारूढावकाशः क्वचामी वयं भवदीयभ्रूवल्लिचलन-मात्र निर्व्यूढनिखिलराज्यकृत्याः न चापि न सन्निकृष्टं प्रेमातिशयस्यात्यन्त दविष्ठमप्ययनं किं बहुना पितेव रक्षसि मातेव पुष्णासि भ्रातेव नन्दयसे राजाधिराजोऽप्यस्मद्विधाः प्रजाश्चिरादाकर्ण्याकर्ण्य जगति निरङ्कुशं विजृम्भमाणं भवतस्सुरङ्गामार्गनिर्गमोदन्तं किमपि विस्मय-

In Public domain. Digitization Muthulakshmi Research Academy

पक्ष्मलितं न केवलमस्मदीयहृदयमेवापितु सेतुशीताचलान्तर्वर्तिनां सर्वेषामपि जनानां क्व नु स भवानीदृशे वयसि विद्यमानः क्वचैतदमानुषं कर्म क्व चैतादृशी विद्याचातुरी नह्यल्पसुकृतानामीदृशी भवति गुणसमृद्धिः किं पल्लवितेन धन्याः खलु ते जनपदाः ये हि सगरदिलीपनलककुत्स्थसदृशं भवन्तमधीश्वरमभ्येत्य किमपि मोदन्ते सन्ततमिति श्लाघ्यमानस्साकं ताभ्यां परावृत्य प्रविश्य श्रीरङ्गपुरं तावन्निजप्रार्थनानुरूपमागच्छन्तं श्रीमदखण्डमहीमण्डलमण्डनायमानमहीपालकोटिकोटीरकोटीघटितचटुलमणिपटलविसृमरमसृणतरकिरणगणकिम्मीरितचरणपीठपर्यन्तं श्रीमद्रामानुजसिद्धान्तबद्धान्तःकरणं श्रीमत्तोताद्रिविष्णुचित्तरामानुजयतीन्द्राचार्यवर्यं निशम्य सम्यगुपजातनिरतिशयभक्तिकुतूहलोऽभिगम्य साकं सेनया सुदूरं प्रणम्य तमानीय सादरमवतार्य श्रीरङ्गपुरे तदनु गृहीतमङ्गलाक्षतस्तुङ्गतरतेजा ओजायमानप्रदीपिकाकान्ति सीमन्तिततिमिरेण मार्गेण न्यविक्षत समुन्नमितकेतनं निजनिकेतनम् ॥३॥

अन्येद्युः॥ पद्यम् ॥

घनतिमिरप्रतिसीरामुत्सार्य करेण पद्मिनीं दयितां
संद्रष्टुमिव सरागस्समढौकिष्टोदयाचलं भास्वान् ॥४॥

स्वकरेण तप्तचक्रोद्धरणं कुरुतेऽद्य परमहंसोऽयम् ।
पावयितुं जगदिति किल भास्वानपि समुदयंस्तथाकार्षीत् ॥५॥

तावद्विरचितनियमाप्लावश्चक्राङ्कनैककृतभक्तिः ।
पावनतरं यतिवरं सेवितुमागान्महीपतिर्वेगात् ॥६॥

In Public domain. Digitization Muthulakshmi Research Academy

उत्तररङ्गधरित्रीनिस्तुलकस्तूरितिलकमभिवन्द्य ।
श्रीपतिमथ तत्र गुरोराप मुदा सन्निधिं तदा भूपः ॥७॥

गद्यम् ॥

स सम्भ्रमोपगतैश्च परिजनैरुपदिश्यमाननिम्नोन्नतप्रदेशसञ्चरणावधानः पुरतः किङ्करकरदोधूयमानचामरव्याजेन गुरुवराय पुष्पाञ्जलिमिव समर्पयन्नभिवन्द्य तत्र लक्ष्मीनारायणं भगवन्तमनन्तरं च तत्र कुवलयोल्लासहेतोरवतीर्णं तद्विरोधितापवादप्रशिशमयिष एव भानुमन्तं तनुमन्तमिव ब्रह्मतेजो विशेषं दिव्यविग्रहान्तरुज्जृम्भितसत्वगुणकाशप्रसूनमञ्जर्येवोद्गतया पलितरुचिरया शिखया विभासुरं नासा वंशाङ्कुरोड्डीनस्थूलमुक्ताफलायमानस्य निस्तलमल्लीकुट्मलदायादरूपस्य वासामूलसितमृत्तिकारचितस्य रेखापीठस्योर्ध्वभागे समुल्लसन्तीभ्यां प्रपन्नानामुभयविधविभूतिप्रदानेन जाताभ्यामिव द्वाभ्यां यशोरेखाभ्यां श्वेतमृत्तिकोर्ध्वपुण्ड्राभ्यां निखिलदुरितनिचय पिशाचदूरोच्चाटनपटुतरकनकवेत्रलतायमानेन श्रीचूर्णतिलकेन च कामपि कान्तिमाबिभ्राणं विचिन्त्यात्मनोर्जडजाततामुद्धरत्ययं ज्ञानदानेन गुरुरिति समाश्रयद्भ्यामिव तामरसाभ्यां विलोचनाभ्यां रमणीयमनुक्षणसमुन्निषदवदाततरमन्दहाससुन्दरवदनारविन्दतया श्रोत्रोद्वान्तगङ्गाजह्नुमुनेरपि विशेषदिदर्शयिषया गङ्गामिव मुखादुन्मीलयन्तं निरङ्कुशज्ञानचन्द्रोदयोद्वेलान्तरुदरसमेधमानविद्यासमुद्रवीचिच्छटोत्क्षिप्तमौक्तिकश्रेण्येव रदनश्रेण्या मनोहरं ब्रह्मसूत्रचतुष्टयीमनोज्ञहृदयितया ब्रह्मसूत्राध्यायचतुष्टयीसारार्थनिरूपणहृदयतामिवात्मनो व्यञ्जयन्तं षट्पदमन्त्रसाम्राज्यस्थानमिदमिति

In Public domain. Digitization Muthulakshmi Research Academy

कुतुकाद्द्रष्टुमागतयेव षट्पदमालिकया स्थूलपरिपक्वजम्बूफलमदकूलङ्कषरुचा पद्माक्षमालिकया परिगतहृदयफलकं धामनिधिरेष समाश्रयणीयो मयेत्यनुरागादुपागतामिव सन्ध्यां काषायपटीं दधानं धातुराग परिगतमिवेरावतं सान्द्रमुक्ताञ्चितसद्वंशप्रसूता इमे ऋजुस्वभावा इत्यनुग्रहेणेव वेणुदण्डांस्त्रीन् सोपदण्डान् दधानं बाहुमूले बोधयन्तं शिष्येभ्यश्श्रीभाष्यभगवद्विषयसारार्थान् कमलबन्धुं कामान्धकारस्य महामृगेन्द्रं मदमदावलस्याविषयं क्रोधस्यानास्पदं मोहस्यागोचरं लोभस्य अनालोच्यं मात्सर्यस्यास्थानं शममहाराजस्य दुरितनिवहविजयधृष्णुचित्तं विष्णुचित्तरामानुजयतीन्द्रं विलोक्य विलोक्य सगद्गदेन वचसा सानन्देन मनसा सरोमोद्गमेन वपुषा प्रकाशितनिरवधिकभक्तिभरः प्रणम्य क्षणमात्रमिवाचेतितचामरोत्क्षेपणनिश्चलबाहुदण्डैः दूरापास्तनिमेषस्पन्दपरमानन्दविस्फारिततरलतरतारकैश्चित्रार्पितैरिव प्रतिमाविशेषै प्रतिहारपालैरास्वाद्यमान इव नयनाञ्जलिभिरेष रामेश्वरराजो नमस्करोतीति परजिनावेदनजातानुग्रहेण तेन गुरुणा निषीद महाराजेति वितीर्णमवलम्ब्य शासनं दूरे दूरे नीचैरभिमुखं निषसाद सादरं वसुन्धराधुरन्धरः क्षणमिवोत्थाय तदनुचेत्थं व्यजिज्ञिपच्च साञ्जलिबन्धम् ॥३॥

पद्यम् ॥

चिरादाविर्भूतं सुकृतमतिमात्रं विरचितं
पुरा जन्मन्येतन्न सुलभमदो जन्मनि परम् ।
भवन्तश्श्रीमन्तः क्व नु ननु जगत्पावनगुणाः
क्व चाहं मन्दात्मा विषयमृगतृष्णाक्षुभितधीः ॥८॥

In Public domain. Digitization Muthulakshmi Research Academy

विना श्रीमद्युष्मत्पदकमलसम्बन्धमनघं
गतिं नान्यां जाने भवतरणहेतुं क्वचिदपि ।
यथा देवश्श्रीमान् सममदयते वत्सतया
तथा कल्याणीं तां कुरुत मयि सम्पूर्णकरुणाम् ।।९।।

दयालूनां रीतिर्जगति बहुचित्रा विजयते
यदात्मायासेऽपि प्रभवति किलान्योपकृतये ।
स्वयं तप्तौ श्रीमत्करकमलतश्शिष्यभुजयोः
प्रदत्तौ चक्राब्जौ हरत इह तापत्रयमपि ।।१०।।

अविद्यान्धध्वान्ते चिरमिह लुठन्तो वयममी
न विन्दामश्श्रीमन्निरुपमपदप्राप्तिसरणिम् ।
तदद्य श्रीमन्तस्तरणिशतकोटिप्रतिभटं
प्रदाय श्रीचक्रं शुभदमयनं दर्शयत नः ।।११।।

प्रपन्नं पादाब्जे निज इति समुद्वीक्ष्य नृपतिं
दयासान्द्रश्श्रीमांस्तदनु च स रामानुजगुरुः ।
विदित्वाभिप्रायं सुगुणजलधिस्तस्य तमिमं
हरेर्दासं कर्तुं मनसि कलयामास विमले ।।१२।।

बहुसरनिवहं प्रादान्नृप एष इति स्मरन् किलामुष्य ।
चक्राङ्कनदीक्षायै गुरुस्तदा प्रतिसरं करेऽबध्नात् ।।१३।।

रामेश्वरराजमणेः कर एव परं न कौतुकाकलितः ।
हृदयमपि तत्र गुरुवरकरुणाविसरणमहार्घशरणस्य ।।१४।।

In Public domain. Digitization Muthulakshmi Research Academy

तदनुविधिना दीप्ते वह्नौ पुरोधसि जुह्वति
प्रविमलमतौ दिव्यं भव्यं हविर्हविषाप्लुतम् ।
सुरभिलतमैर्हैमैर्गन्धैस्समस्तदिगन्तरे
विरचितनतिं प्रह्वं भूपं व्यलोकित देशिकः ॥१५॥

तापमुपयाति यस्मिन् संश्रितजनदुरितचक्रमपि निमिषात् ।
तच्चक्रं तप्तमथ श्रीमान् दक्षिणभुजे नृपस्याधात् ॥१६॥

तन्नामघटकवर्णद्वयवाच्यमिति क्रुधेव विजहति जन्यम् ।
रिपवो यद्ध्वनिभीतास्तत्तस्य स पाञ्चजन्यमितरभुजेऽधात ॥१७॥

नैतच्चित्रं गुरुवरकृपयैष सुदर्शनाङ्कितो यदिह ।
दुर्दर्शनान्ध्यमजहाच्चित्रं व्यधुनोद्दरन्दराङ्कनतः ॥१८॥

चक्राब्दाङ्कितमिह भुजयुगमिति तत्साम्यमाप्तुमिव राज्ञः ।
कण्ठोऽथ पृथुलगद्गद उचितमहानन्दकाञ्चिते नयने ॥१९॥

तदनुगृहीतं पुण्ड्रं तदनुच मन्त्रं महार्घमवनीन्द्रः ।
रामेश्वर रामानुजदास इति श्रीमदाह्वयञ्च दधौ ॥२०॥

गद्यम् ॥

तदनु समुत्थाय प्रणम्य निजपरिजनानप्याचार्यवर्यकरुणाकटाक्ष-समासादितवैष्णवभावानवलोक्य परमानन्दबन्धुरान्तःकरणो वसुन्धरा रमणः स्वीकृतनिर्धूतनिखिलपापसार्थं श्रीपादतीर्थं समर्प्यानेक-मणिहारराङ्कवपट्टवसननिष्काञ्जलिगजतुरगाग्रहारान् प्रणम्य धन्योऽस्मि श्रीमदाचार्यवर्यकृपासुधालहरीप्रसरणादिति वदंस्तदनुग्रहीतान्

In Public domain. Digitization Muthulakshmi Research Academy

सबहुमानमङ्गीकृत्य सफलमन्त्राक्षतानुपेत्य निजभवनमाचार्यचरित्रमयीरेव कथाः परिजनैस्सह प्रवर्तयन् ध्यायं ध्यायं हृदयफलके निजाचार्यवर्यचरण युगलमहो बहुचिरात्फलितं मनोरथेन सुचिरसङ्कल्पितेन न खलु प्रथममेवोप्तमपि विना प्रावृषेण्यदिनोदितजलधरजलधारासारासेकमङ्कुरतां प्रपद्यते बीजं नैवाङ्कुरदशायामेव फलाय कल्पते महीरुहः एव भवितव्यं यस्मिन् समये तेन तस्मिन्नेव भूयते समये किं वृथा सङ्कल्पितैरथवा कदाचित्सङ्कल्पितमपि चिराय कदाचित्कुत्र वा किमपि वा फलत्येव भाग्यवतां न खलु कल्याणाभिनिवेशो न सुखाय सम्पद्यते कस्यापि किं बहुनास्मासु परमोऽनुग्रहो गरुडगिरिधाम्नो धाम्नो विचित्रभूम्नो नान्यथैवं सिध्यति मनोरथः क्वाहं दुर्दान्तचित्तवृत्तिरशिक्षितेन्द्रियः क्वचामी निखिल जगत्पावनचर्या आचार्याः क्व च तच्चरणारविन्दसम्बन्धो ममेति चिन्तयं-श्चिरतरं नीत्वा तत्र दिनानि कानिचिदनन्तरं च परमहंसनिर्गमनसमयोऽय-मिति विकसत्सु पुण्डरीकेष्विव तत्क्षणं प्रफुल्लेषु धवलातपत्रेषु धवलांशु-सच्छात्रेषु दर्शनादमुष्य गुरोश्चामराणामप्यानन्द इति सूचयितुमिव चामरेषू-द्वल्गत्सु किङ्करनिकरकरकमलोद्धूयमानेषु ध्रियमाणेषु रजतदण्डेष्वखण्डेषु कृष्णाजिनकशाघातनिर्धूयमाने महाजनसम्मर्दे पठत्सु चाग्रे-भुजानुद्धृत्योद्धृत्य बिरुदगद्यानि हृद्यानि प्रतिहारिषु विनीतमतिनात्मना प्रदत्तहस्तावलम्बमारूढं शिबिकां प्रस्थितं स्वाचार्यं तं यतिवर्यं सुदूरमनुगम्य सेनया प्रणम्य निवृत्य तदनुज्ञयानुतप्यमानान्तरङ्गः कञ्चित्कालं गुरुवरविश्लेषवैक्लब्येन पेब्बेराभिधानां प्रविश्य राजधानीं कतिचन तत्र निनाय दिनानि परिणयचिन्ताघनानि ॥४१॥

In Public domain. Digitization Muthulakshmi Research Academy

तावदेव जलनिधिगाम्भीर्याच्चिन्तारत्नौदार्यात्प्रालेयाचलस्थैर्यादर्जुन-शौर्यादतिचातुर्यादतिधैर्याद्रामेश्वरसार्वभौमवर्यादन्यं भूपं मन्यं न कञ्चिदपि मनसापि स्मरामीति चिरादारचितस्वयंवरामास्थानीं शुचितायाः वासगृहं वात्सल्यस्य विहारशालां विपुलकरुणाया उद्यानभूमिं दाक्षिण्यलतायाः उपकार्यामाचाराणाञ्चन्द्रशालां चातुर्यस्य हर्म्यस्थलीं हर्षस्य कल्पलता-माश्रितमनोरथफलानां चन्द्रमण्डलीं चारुविद्यासुधानां सहकारच्छायां सततदैन्यतप्तानां विपुलखनीं विनयमणीनां समावेशभूमिं सौभाग्य-सौलभ्ययोः सौवर्णपीठीं सौन्दर्यराजस्याश्रयशालां सौकुमार्यस्याधारं सौजन्यस्यालम्बनयष्टिमौदार्यमल्लीलतायाः प्रावृषेण्यकादम्बिनीं प्रचुर-सौहार्दजलानां प्रासादभूमिं प्रसन्नतायाः किम्बहुना निधिं निखिल-शुभगुणगणानामवलम्बितविग्रहामिव वनपर्तिराजेन्द्रसाम्राज्यलक्ष्मीं कोडुगल्लुपुराधिनाथजगन्नाथावनिपालवंशमुक्तामणिं जगन्नाथाम्बागर्भ-दुग्धाब्धिपारिजातलतिकामादावेव प्रदत्तमन्त्रवसनहरिद्राकुङ्कुमफला-मुपानीतामनर्घवैभवेन जगच्छिवङ्करां शङ्कराम्बाभिधानां धन्यां कन्यामुन्मिषत्तारुण्यां निशम्य तत्क्षणं निजाज्ञया परिष्कृतायामुत्तुङ्ग-निर्मलहर्म्याग्रघटितचटुलतरध्वजपटभुजलतां प्रसार्याह्वयन्त्यामिव परिणयोत्सवनिरीक्षणाय देवाध्यक्षं तदात्वसमुत्कूलितकुतूहलनागरिक-नारीजनविकीर्णमल्लीमतल्लीकुरवकमरुवकमुखविविधबन्धुरसुगन्धिवस्तु-घुमुघुमायमानरथ्यान्तर निरन्तरचमत्कृतनानावर्णमौक्तिकादिचूर्णपूर्ण-रङ्गवल्लीशबलिततया माहोत्सवहेतोः प्रच्छदपटेनेव कीर्म्मीरवर्णेनालङ्कृतायां प्रकृतोत्सवकुतूहलादिव कुसुमकुट्मलाञ्जलिं धृतवतीभिरम्भाभिर-

In Public domain. Digitization Muthulakshmi Research Academy

नेकाभिरभिरामतया विपुलाट्टालकाधिकश्रियमात्मनस्स्पष्टमिव दर्शयन्त्यामहमिहमिका समापतत्क्ष्मापतिशतसहस्रशताङ्गमातङ्गतुरङ्गपदातिगम्भीरनिध्वानतरङ्गितायां तत्र तत्र प्रक्रान्तकान्ततरवारकान्तानर्तनानुवर्तनसमुज्जृम्भितमङ्गल मृदङ्गधिमिधिमिध्वानजटिलचटुलतालजालझङ्कारबन्धुरायां सर्वतस्समारोपितगन्धतैलावसिक्तस्थूलतरदीपिकाकलिकावलिकाकोरकिततया पद्मरागमणिहारैरिव परिकर्मितायां तत्रतत्रानुबद्धसुन्दरवन्दनमालिकानन्दनीयायां शक्रचापशतकल्माषितायामिव गगनस्थल्यां श्रीरङ्गपुर्यामवतार्य सम्बन्धिनस्सर्वान् शुभतमेऽहनि प्रत्यासन्ने सुमुहूर्ते प्रस्थाय भवनात्सरभसोत्पतनचटुलचरणतलाघट्टनक्वणित मञ्जुमञ्जुमञ्जीरशिञ्जितरञ्जिततरुणहृदयेन निर्मर्यादनिदाघजलधौतानुलेपनकिम्मीरितनिर्मलचीनाम्बरेण संसम्भ्रमपदन्यासडोलायमानैकावलीहारास्फाल्यमानवक्षोजयुग्मेन निर्भरकुतूहलोत्कीर्णपटवासक चूर्णधूसरितालकजालकेन गायतात्यन्तमङ्गलगीतान्युत्क्षिपता कुसुमसमुदयान् प्रकिरता लाजान् प्रवर्तयता दृष्टिदोषपरिहाराचारान् उदञ्चयता पदेपदे नीराजनाविधिं सुवासिनीजनेन डोलायमानवनमालेन सरभससमर्प्यमाणोपहारेण प्रस्वेदजलैकान्तशरीरसंसक्तचीनांशुकेन राजन्यलोकेन च निर्दयमर्दितमर्दलपणववीणावेणुभेरीझर्झुरढक्कातूर्यतालकाहलतारताररवबधिरीकृताष्टलोकपालपुरजनेन परिजनेन चानुगम्यमानो विद्वद्बृन्दैर्मन्दमन्दं कन्यकया तया सह प्रविश्य श्रीरङ्गेन्द्रसन्निधिं तावत्स्वीकृतपादच्छायाप्रमाणैर्दैवज्ञैर्गृहीते शुभलग्ने विरचिताशीर्वचनो विजयीभवेति द्विजनिकुरुम्बैर्जग्राह

In Public domain. Digitization Muthulakshmi Research Academy

पाणिना पाणिं शङ्कराम्बाभिधानायास्तस्याः कन्यामणेर्यस्याश्च शिङ्गमाम्बेत्यन्यदपि नाम जगद्विदितमनवधिकं च वितितार धननिचयं द्विजेभ्यो मोदयामास च समागताननेकदेशाधिनाथान्नरनाथान् विचित्रराङ्कवचीनाम्बरमणिहाराङ्गुलीयकैः पारितोषिकैः तोषयामास चान्नदानैरागोपालाविपालं जनपदजनान विससर्ज च तांस्तान्यथार्हं प्रविवेश च निजनिकेतनं साकं सहधर्मचर्या तया सुस्मेरवदनशशाङ्क-बिम्बया शङ्कराम्बया निनाय सुखेन तत्र कतिचन निर्भरप्रमोद-भासुरान्वासरान् ॥५॥

रामेश्वरविजयेऽस्मिन्नुल्लासं षष्ठमतनुत वरिष्ठम् ।
वनपर्त्यास्थानकविः कृष्णः कविगण्डभेरुण्डः॥

इति श्रीमन्नवदुर्गकृष्णकविसार्वभौमस्य कृतिषु श्रीरामेश्वरविजये चम्पूप्रबन्धे कल्याणोल्लासष्षष्ठः

श्रीमते श्रीनिवासाय परब्रह्मणे नमो नमः ॥

श्रीरस्तु ॥ मङ्गलानि भवन्तु श्रियै नमः॥

रामेश्वरविजये - ६- कल्याणोल्लासः ।

॥ समाप्तः ॥

In Public domain. Digitization Muthulakshmi Research Academy

श्रीहयग्रीवाय नमः

रामेश्वरविजये - ७ - सङ्गरोल्लासः

तावत्ते यवनाश्च भाग्यनगरे निश्शङ्कमस्मानयं
निर्धूयैव मृगेन्द्रशाबक इव क्षोदिष्ठवीर्यान्मृगान् ।
राजेन्द्रो निरगान्मिषत्सु निखिलेष्वस्मात्सुरङ्गा मुखा
दित्यालोच्य परं विलक्षहृदयालक्षं क्रुधस्तं व्यधुः ॥१॥

वनपतिर्ग्राष्टमग्रे यं प्राप्य च यवनपतिराष्ट्रमभूत् ।
नगरारक्षन्तं पुनरवाप्य यवनं वचोऽब्रुवन् सैन्याः ॥२॥

रुद्धेऽत्र क्षितिपालकेसरिशिशौ रामेश्वरे शूरव
त्त्वं तावन्नगरं तदीयमहरः किं तावता निर्जितम् ।
जञ्झावात इवात्र तूलनिवहानस्मान्नखेन क्षिप
न्निर्यातस्स्वपुरं वशेऽद्य कुरुते निर्याहि शूरोऽसि चेत् ॥३॥

इत्थं सैनिकवाग्भरेण नितरां मर्माविधातालप
द्दौलाख्यो यवनाग्रणीरतितरक्रोधोज्वलल्लोचनः ।
सन्दष्टौष्ठपुटः प्रभुग्नकुटिलभ्रूभङ्गिचण्डाननो
दोर्दण्डं निजमुद्धरन् सरभसादाज्ञापयामास तान् ॥४॥

उत्क्षिप्यं तां पताकाः पटुतरनटना उद्ध्रियन्तां च कुन्ता
स्सन्नह्यन्तां च सैन्योद्भटभटनिवहास्संस्क्रियन्तां च भाण्डाः ।
वल्यन्तां वल्गुवाहाश्चटुचटुगमनास्सम्भ्रियन्तां क्रमेला
स्सन्धुक्ष्यन्तां समन्तादविरलवलकास्सिंहनादाः क्रियन्ताम् ॥५।

In Public domain. Digitization Muthulakshmi Research Academy

यावद्रामेश्वराख्यक्षितिपतिविजयस्तावदुद्व्यूढदर्पा
यावत्प्राणं कुरुध्वं समरमवति वः पैलवान् खानभिख्यः ।
सेनानीर्नः प्रचण्डज्वलदनलनिभक्रोध दन्दह्यमान
स्सोऽयं यात्वग्रतो वस्सरभसमचिराद्यातयाताद्य सैन्याः ॥६॥

एते नासाच्छिन्नदर्पस्फुटपटदसुहृत्कोटिकोटीरकोटीः
कृत्तोत्क्षिप्तास्सुवर्णोल्बणमणिघटितस्वस्तिकाश्शस्तकान्तीः ।
वीक्ष्य व्योमाग्रभागे किमिदमशिशिरज्योतिषः कोटिशोऽमी
जाताः कल्पान्तकालः किमयमिति जनाः प्रागजल्पन्ननल्पम् ॥७॥

इति रचितप्रशासनमनेन घनेभरथ
स्फुटभटकोटिघोटकविपाटितभूवलयम् ।
अनिलचलद्ध्वजव्रजमनीकमनेकमथ
प्रति वनपर्तिपत्तनमवर्तत मूर्ततरम् ॥८॥

घनतरदन्तकुन्तयुगदन्तिनितान्तपद
प्रतिहतिदारितावनितलोद्गतधूलिभरे ।
सपदि निमग्नमुन्नतगभीरमहीध्रखनी
जठर मणिश्रियं द्युमणिबिम्बमधत्त तदा ॥९॥

सरभसभुजास्फालोद्वेलोर्जितोर्जितगर्जित
प्रचुरतुरगह्रेषाघोषेभजृम्भितबृंहितैः ।
घणघणरणद्धण्टाघोषैर्भटोद्भटहुङ्कृतै
रभवदखिलं शब्दब्रह्मात्मकं जगदन्तरम् ॥१०॥

In Public domain. Digitization Muthulakshmi Research Academy

गन्धर्वा इति नाम चेद्भवतु तत्क्षन्तास्महे नोच्चता
मेते चित्ररथान्विताश्च समितौ नित्यं प्रवीणा यदि ।
अस्माभिस्सह सङ्गरं विदधतामित्थं नियोद्धुं ध्रुवं
गन्धर्वास्सुरवैणिकैस्सह तदोत्क्षिप्ताग्रपादा बभुः ॥११॥

सुसारथिकशाहतिक्षुभितघुर्घुरद्घोटक
प्रचण्डतरमण्डलक्रमभरान्मरुज्जित्वराः ।
विलङ्घितवियत्पथा घनरथा मुहुर्बभ्रमु
स्सपक्षधरणीधरा इव महारथाधिष्ठिताः ॥१२॥

धैर्येणास्मान् जिगाय क्षितिभृदतितरामेष रामेश्वराख्य
स्सम्प्रत्येतद्रिपूणामिह समरकृते साधु साह्यं विदध्मः ।
इत्याराद्वैरशुद्ध्यै कुलधरणिधराव्यूढसर्वाभिसारा
बृन्दं बृन्दं प्रयाता इव करटिघटा मन्दमन्दं विचेरुः ॥१३॥

यावत्तद्वनपर्तिसंज्ञनगरप्रत्यग्दिशारण्यभू
जाग्रत्कृष्णपुराग्रहारनिकटं सैन्यं समागच्छति ।
तावच्चारमुखादुन्तमखिलं रामेश्वरक्ष्मापतिश्शु
श्रावाथ च सैन्यनिर्गमकृते व्यश्राणयच्छासनम् ॥१४॥

स्फुरिततटिल्लताशतहता इव वारिधरा
भटपटलैः कनत्कनककोणशताभिहताः ।
सपदि विदध्वनुर्धुरि जयोद्धुरदुन्दुभयः
प्रतिभटमण्डल प्रलयभैरवसध्वनयः ॥१५॥

In Public domain. Digitization Muthulakshmi Research Academy

तावद्ब्रह्माण्डभाण्डोद्दलनपटुतरोद्दण्डदण्डप्रचण्डा
धूतस्फीता विगीतस्फुटपटहसटाभेरिकाधीरनादैः ।
हेषाघोषात्तहस्तैः पटुभटपटलोट्टङ्कितैर्हुङ्कृतैर्द्राक्कुम्भी
न्द्राडम्बरैरप्यथ निखिलदिशां दन्तुराण्यन्तराणि ॥१६॥

गद्यम् ॥

तावदेव वाहिनीपतिसन्नाहितयोधयूथदुर्निरोधगतितुरगतति मदाकुलमदावलारूढनृपनन्दनस्यन्दनबृन्दनिध्वानार्भटीक्षुभित सप्तसमुद्रामुन्निद्रामुत्तम्भितजयध्वजां निजध्वजिनीं निरीक्ष्य निर्गत्याभिनन्द्यमानो विजयाशीर्वचनैरारुह्य तुङ्गतुङ्गतुरङ्गमितश्चेतश्च निर्गतो महाराज इति निशम्य ससम्भ्रमोत्पतन्नैस्त्रिंशिकसिंहनादाट्टहासधूसरित हेषाघोषभूषितखरतरखुरनिकरनिनदमसृणितगम्भीरकुम्भीन्द्राडम्बरोत्तम्भिततदीयघण्टाभरणघणघणात्कारदत्तहस्तवन्दिबृन्दवन्दन स्तुतिरवमुखरितसरभससमापतच्छताङ्गतुङ्गतररथाङ्गक्रेङ्कारसङ्कलित विजृम्भमाणहूणवाद्यहृद्यनिध्वानबद्धादरनिस्साणनिस्वानतुन्दिल दुन्दुभिभाङ्कारपूरितकाहलतारतारनिनाददूरोत्क्षिप्तडिण्डिममण्डलाखण्डनिर्ह्रादताण्डवितमहाजनकोलाहलक्षुभितकर्णेमूर्च्छतीव जगति समस्ते मुहुर्मुहुरुन्नमितशुण्डादण्डाग्रविवरनिरतिशयविनिर्गलदुडुनिकरसदृश जलशीकरनिकरेषु सङ्ग्रामप्रस्थानमङ्गलाचारलाजानिवोत्क्षिपत्सु समन्ताद्दन्तावलेषु समरविजयलक्ष्मीः प्रत्युद्गच्छत्यस्मन्महाराजमिति प्रमोदबन्धुरया वसुन्धरयोत्क्षिप्ते पटवासक इव गगनमवलम्बमाने महापरागे उदग्रतरमदावलमहीधर शतसहस्रससम्भ्रमसमापतनक्षुभित बलजलनिधिदूरदूरसंसर्पिमां सलतरतुरङ्गतरङ्ग-

In Public domain. Digitization Muthulakshmi Research Academy

परम्परोर्ध्वपुञ्जायमानफेनस्तबकेष्विव सर्वत्रोध्रियमाणेषु कथञ्चिदुच्चल-ज्जालकेषु धवलातपत्रेषु अवसरत सुदूरमस्मन्महाराजसैन्यमायातीति सूचयन्त्यामिव प्रतिभटानामनुकूलपवमानान्दोल्यमानायं वैजयन्त्यां जयन्त्यां क्वचिदेकवर्णोष्णीषाणामेकरूपकवचनामेकविधान्तरीयकञ्चुका-नामेकरूपालङ्कारपरिग्रहाणां सेनाध्यक्षशिक्षावाक्यनिशमनानुक्षणमेव युगपदेवोत्क्षिप्यमाणचरणानां युगपदेव न्यस्यमानपदानां युगपदेवोदञ्चित-चन्द्रहासानां युगपदेवोदस्तनलकानां युगपदेव सन्धुक्षितनलकानां युगपदेव वितीर्णक्ष्वेलितानां युगपदेव मुकीभूतानां युगपदेव चलतां युगपदेव निश्चलानां युगपदेव मण्डलीभूतानां युगपदेव रेखायमाणानां युगपदेवैकीभूतानां युगपदेव द्वन्द्वं द्वन्द्वं पृथग्भूतानां सूत्रग्रथितानामिव भटानां रेखाभिर्नानावर्णवैजयन्तीमालिकाभिरिव परिष्कृतायामुच्चलन्त्यां वाहिन्यां एक एवाहं प्रतिभटानां तुरङ्गानेक एवाहं शताङ्गानेक एवाहं मातङ्गानेक एवाहं योधानेक एवाहं सेनाधिनाथमेक एवाहं सर्वसेनाश्च भस्मीकरोमीति प्रमृज्यमानश्मश्रु सन्दष्टाधरपुटमुत्कम्पितभ्रुकुटिकन्दूर-विस्फारितारक्तलोचनमास्फोट्यमान भुजमाघट्यमानविजयडिण्डिम-मुत्क्षिप्यमाणनलकमुद्धूयमान कौक्षेयकमदञ्चयद्भिर्वीरवादान् वीराग्रगण्यैः परिगतस्साकं विक्रान्तचूडामणिना सेनाधिनाथेन उत्क्षिपन्निव सप्तकुलाचलान् विदारयन्निव वसुधां शोषयन्निव सप्तसिन्धूनुन्मूलयन्निव दिग्गजान् विलोडयन्निव दिगन्तराण्याहरन्निव चन्द्रमण्डलं कम्पयन्निव नाकलोकं निरुन्धन्निव गन्धवाहगतिं कैतवनिरोधस्मरणमुहुर्मुहुर्विक्षुभ्यमाण हृदयोन्मिषत्क्रोधावेगालोहितलोचनाञ्चलतया दुर्निरीक्षो निजसैनिकैरपि क्वचित्क्रोधमन्दहाससुन्दरं क्वचिदुच्चलद्भ्रुकुटिभीषणं क्वचिद्दष्टौष्ठभयङ्करं

In Public domain. Digitization Muthulakshmi Research Academy

क्वचिदुत्क्षिप्तखड्गं क्वचिदुद्धूतमूर्धतलं क्वचित्प्रक्रान्तपरिहासं क्वचिच्छ्लाघावचनमन्थरं क्वचिद्दीयमानपारितोषिकं क्वचिद्धिक्कारवादमसृणमुत्साहयन्निजसैनिकान्निर्मलतरोष्णीषाम्बरविभूषिताशिशिरकरकिरणमसृणित इवाञ्जनाचलशिखरः प्रत्यर्थिशतसङ्ग्रामेश्वरो रामेश्वरभूमीश्वर उत्तराभिमुखमुच्चलन् साकं प्रतिभटधैर्यलक्ष्म्या क्षणेन निदधे पदं कृष्णपुरनिकटे विपक्षसेनोद्भटे ॥१॥

पद्यम् ॥

अन्योन्योद्वीक्षणोत्थप्रतिघभरपरिक्षुभ्यमाणान्तरङ्गा
रङ्गन्तः प्रौढदर्पाः पटुसमरमहानाटकारम्भहेतोः ।
नान्दीपद्यं किलादावुभयबलभटास्सूत्रधारा इवैते
चक्रुश्शक्रादिलोकाधिपतिपुरजनैर्लालितं क्ष्वेलितं द्राक् ॥१७॥

युद्धप्रेक्षाभिलाषप्रमिलितविबुधव्यूहभारार्त एष
व्योमप्रासादवर्यः क्वचिदिह निपतेदित्यवन्या सशङ्कम्
उत्क्षिप्तं बाहुयुग्मं किल सपदि तदालम्बनार्थं समुद्यत्
प्रत्येकं सैन्ययुग्मात्पृथुलतररजश्श्रेणियुग्मं चकाशे ॥१८॥

श्रीरामेश्वरराजवैरिनिवहास्त्यक्त्वा क्षमां द्यां प्रति
प्रस्थानं रचयन्ति संयति जवादित्यर्थमुद्योतयत् ।
दर्पोदञ्चितगन्धसिन्धुरघटापादाहतेरुद्गतं
धूलीमण्डलमारुरोह गगनं त्यक्त्वा क्षमां तत्क्षणात् ॥१९॥

In Public domain. Digitization Muthulakshmi Research Academy

प्रवृत्ते तयोस्सेनयोस्तत्रयुद्धे क्रुधात्यन्तरूक्षे जनैर्दुर्निरीक्षे ।
तदा पांसुवृष्ट्यां समन्तात्पतन्त्यां विचित्रं समुद्रास्तटिन्यश्च शुष्काः ॥२०॥

मदावलैर्मदावलास्तुरङ्गिभिस्तुरङ्गिणः
पदाजिभिः पदाजयोरधीश्वरैरधीश्वराः ।
मिथः क्रुधायुधं दधुः प्रचण्डविक्रमक्रमा
घनाघनाघनाघवैरिवात्मनाथशासनात् ॥२१॥

एकं बलाधिकमभूत्क्षणमन्यदासीद्वीर्याधिकं क्षणमनीकमथाव्यवस्थम् ।
पश्चात्पुरः पवनवृद्धिवशात्तरङ्गौ पर्यायतो जलनिधेरिव तुङ्गतुङ्गौ ॥२२॥

प्रचण्डतर विक्रमक्रमभरं भुजास्फालनो -
द्भटोद्भटपटुध्वनिक्षुभितसर्वदिङ्मण्डलम् ।
सपत्नबालमाददे सरभसं स रामेश्वर
स्सरिन्निवहमुल्बणोल्बणरयं सरस्वानिव ॥२३॥

दिशो दक्षिणस्या उदीचीं विशन्तं दिशन्तं रिपूणां भयञ्चादिशन्तम्।
महोच्चण्डदीप्तिं प्रवीराग्रगण्यं परे वीक्षितुं वापि नाशक्नुवंस्ते ॥२४॥

रथाङ्गक्रेङ्कारैरथ समिति जज्ञे रथचयो
विलोलद्घण्टालीघणघणरवैर्दन्तिनिचयः ।
निजाधीशाभिख्याग्रहणवशतोऽत्यन्तनिबिडे
रजोध्वान्ते तस्मिन् स्वपरबलबोधस्समजनि ॥२५॥

रुन्धानस्य मुहुर्विलोचनपथं स्निग्धाञ्जनज्योतिषो
धूलीपालितमोभरस्य समरक्ष्मामण्डलाभ्यन्तरे ।

In Public domain. Digitization Muthulakshmi Research Academy

योधाग्रोद्धतदोरुदस्तविचलत्कौक्षेयकोत्क्षेपण
प्रक्षुण्णद्विपनिस्रुतास्रलहरीपूर्वेव सन्ध्या बभौ ॥२६॥

गजकरवालखण्डनकृते रभसोच्चलित
भ्रुकुटिविभीषणस्समिति यावदभिप्लवते ।
सपदि स तावदेव हि विपक्षभटेन भटो
निजकरवालखण्डनवशाद्विमना विदधे ॥२७॥

सङ्ग्रामेऽत्युग्ररामेश्वर नृपवरदोर्दण्डतेजोंशुमालि
ज्योतिः प्रोच्चण्डतापप्रसरणरभसप्राप्ततापातिरेकाः ।
दूरं द्यामुत्पतन्तः प्रतिभटपृतनायोधयूथाग्रगण्याः
पायं पायं मनोज्ञामृतमधरमधुर्मोदमेतेऽप्सरस्सु ॥२८॥

समुच्चलत्पट्टसघट्टनेन च्छिन्दन् भटः कश्चिदुदग्रदन्तौ ।
रुषा द्विषां दन्तिनमाततान कश्चित्तदा तद्धितवृत्तिशून्यम् ॥२९॥

हतहयमास्थितं रथवरं समुदग्रभयं
निहतरथोऽत्र कश्चन रथी विनिपात्य रथात् ।
दृढमनुबध्य तत्र सरयं तुरगान्निरगा
त्सपदि मिषत्स्वपि प्रतिभटेषु विचित्रमिदम् ॥३०॥

विहतरथिकसूतो वीररामेश्वरेण
प्रथनभुवि शताङ्गः कश्चिदुद्वेलवेगैः ।
दिशि दिशि विदधानैश्चित्रधाटीविशेषान्
सरभसमथ रथ्यैः कृष्यते स्माव्यवस्थम् ॥३१॥

In Public domain. Digitization Muthulakshmi Research Academy

तावद्रामेश्वराज्ञोद्भटभटपटलक्रोधसन्धुक्षितेभ्यो
ज्वालाजालोग्रकालायसघनघुटिकाद्राक्छतघ्नीमुखेभ्यः।
आरक्तास्सम्पतन्त्यः प्रतिभटपृतनानल्पकल्पान्तकाल
प्रोद्यच्चण्डाशुबिम्बायुतशतमतिदा निर्दहन्ति स्म शत्रून् ॥३२॥

एकत्रोच्चण्डदर्पस्फुटघटितभुजास्फोटनेवेन्द्रखड्ग
प्रोत्कृत्तेषु प्रचण्डप्रतिभटपटलीमस्तकेष्वापतत्सु ।
कल्पान्तानल्पदृप्यज्जलधरपटलीवृष्यमाणोपलौघस्फार
स्फाराग्रशब्दप्रतिभटनिनदं सङ्कटं श्रूयते स्म ॥३३॥

ज्वालारक्तं शतघ्नीशिखरविवरतो गोलकं सम्पतन्तं
पक्वाम्रभ्रान्तिभारात्समरभुवि भटो वीरपाणेन मत्तः ।
अदायास्वादनाय द्रुततरमथ विन्यस्य वक्त्रेऽतिमात्रं
दग्धश्मश्रुर्जनानां प्रहसनपदवीं कश्चिदालम्बते स्म ॥३४॥

ह्लदैस्सपदि पूरितैः प्रथनसीम्नि रामेश्वर
क्षमापतिविदारिताहितवपुस्स्रुतैर्लोहितैः ।
धरापि निजनायकप्रतिभटालिनिर्धूतये
दधार किल लोचनायुतशतं रुषा लोहितम् ॥३५॥

स्वर्गस्त्रीपरिरम्भमङ्गलकृते सम्प्रस्थितानां क्षणा
च्छ्रीरामेश्वरखड्गकृत्तवपुषामाधोरणानां पुरः ।
आरान्मङ्गललाजपुष्पनिकरानुच्चैः क्षिपन्तः किल
स्वच्छन्दं वमथूत्करानुदकिरन् प्रत्यर्थिदन्तीश्वराः ॥३६॥

In Public domain. Digitization Muthulakshmi Research Academy

उद्दीपितोग्रनलकाननिर्गताभि
श्शोणाभिराचितमयोघुटिकाभिरङ्गम् ।
वाजिव्रजादधत उज्ज्वलपञ्चधाराश्चित्रं
बभुस्समरसीम्नि सहस्रधाराः ॥३७॥

तत्रान्योन्योज्जिगीषा विरचितशपथप्रौढवाचाभरणां
धूलीपाल्यन्धकारे रभसभरजुषां सैनिकानां द्वयानाम् ।
अत्यर्थोद्दीप्यमानोद्भटनलकमुखाद्गोलकौघाः पतन्तो
ज्वालाजालैर्जटालास्समरभुवि दधुर्हृद्यखद्योतलीलाम् ॥३८॥

विचित्रधाराकलिते मयि स्थितेव हन्ति धारारिपुघोटकाः कथम्।
अहं हि तीक्ष्णो न सहेय जात्विति क्रुधाच्छिनत्तान्नरदेवखड्गारात्॥३९॥

पुन्नागौघकरावमृष्टमसकृत्प्रव्यक्तमापांसुलं
मातङ्गी पृथुकुम्भयुग्ममनिशं स्पृष्ट्वा निषादीकृतान् ।
सङ्के हास्तिपकान् विधाय न चिरात्पूतानसेर्धारया
स्वर्गस्त्रीकुचकुम्भभोगसुभगान् रामेश्वरेन्द्रो व्यधात् ॥४०॥

चिरं समानो रिपुणा समानं नियुद्ध्य कश्चिद्रणभूविपश्चित् ।
प्रमापितस्तेन जवेन योधो विमानराजत्त्वमवाप चित्रम् ॥४१॥

भिन्दन्नत्युग्रशौर्यः पटुकरटिघटाः पाटयन् घोटकौघा
नुद्धून्वन्युद्धलुब्धां स्फुटभटपटलीं चूर्णयंस्तूर्णमुष्ट्रान् ।
तन्वंस्तुङ्गान् छताङ्गांस्तिलकणसदृशान्विद्विषामद्वितीय
श्श्रीमान्रामेश्वरेन्द्रस्समजनि रिपुभिर्दुर्निरीक्षोऽतिरूक्षः॥४२॥

In Public domain. Digitization Muthulakshmi Research Academy

तावत्सर्वैस्तुरङ्गैस्सरभसगमनैर्दन्तिभिश्चापि सर्वै
स्सर्वैर्योधैश्च सर्वैरथरथनिवहैरायुधैश्चापि सर्वैः ।
सेनाध्यक्षोऽतिरूक्षस्समरभुवि परिव्यूढ सर्वाभिसार
श्श्रीमद्रामेश्वरेन्द्रं सुभृशमपिदधे पैलवान् खानभख्यिः ॥४३॥

उद्धृत्यैकैकवारं थलथलितितमं मण्डलाग्रं महोग्रं
शीर्षाण्युच्चण्डदर्पप्रमिलदसुहृदां द्राक्सहस्रं सहस्रम् ।
राजेन्द्रः पातयित्वा प्रतिपदममराधीश्वरस्य व्यतानी
च्छ्रीमानानन्दबाष्पोद्गमविमलतरं लोचनानां सहस्रम् ॥४४॥

तावत्कल्पान्तदृप्यत्प्रमथपतिमहोग्रोग्ररूपं निरीक्ष्य
श्रीमद्रामेश्वराख्यक्षितिपपरिबृन्दं निर्दयं स्पर्धमानं
तीव्रक्रोधारुणाक्षः स्फुरदधरदलः पैलावान् खानभिख्यः
प्रोदस्तोदग्रखड्गः पटुतरघटनं वाक्यमेवं बभाषे ॥४५॥

या काचिन्मूषिकेव क्षितितलखननान्निर्गतश्चेत्कथं वा
विक्रान्तत्वं भजेथा यदि समरधरामण्डले चण्डशौर्यैः।
माहक्ष्यैर्युध्यसे त्वं ननु भवसि तदा तात शूराग्रगण्यः
किं कृत्वा कर्म लोकोत्तरमिह कलयस्यात्मनात्मानमेव ॥४६॥

इति वचनं निशम्य हृदयान्तरतिज्वलन-
स्फुटितमहोद्भट प्रतिघवह्निकणोपमितम् ।
दधदथ लोचनद्वितयमत्यरुणस्फुरणं
वचनमुपाददे स बहिरी नरपालमणिः ॥४७॥

 In Public domain. Digitization Muthulakshmi Research Academy

निजबलमविज्ञाय क्रोधाद्वृथैव विकत्थसे
न खलु निपतन्त्यत्रारीणां शिरांसि विकत्थनैः।
कथमिव गलन्त्यल्पैर्मन्त्रैर्नवाम्रशलाटुका
स्त्वमिह ननु चेद्वीरस्तिष्ठ क्षणं पुरतो मम ॥४८॥

निष्क्रान्तो नहि मूषिकेव धरणीगर्भादहं सर्वतो
युष्मासूत्कटदर्पभीकरमुखेष्वारात्प्रपश्यत्स्वपि ।
शार्दूलो गिरिकन्दरादिव तदा मत्वा तृणायैव व
स्सर्वानेष विनिर्गतोऽद्य बहिरी रामेश्वरं पश्य तम् ॥४९॥

शूरस्त्वं चेत्तदानीं क्व नु गतमिव ते शौर्यमन्यैरवार्यं
तिष्ठत्वेतद्यथेष्टं प्रकटय निजदोर्दण्डशौण्डीर्यमद्य ।
न त्वां तूष्णीं विमुञ्चत्ययमिह बहिरीराज रामेश्वराख्यो
नैनं रङ्गेद्रपादद्वितयदृढमति प्राकृतं विद्धि भूपम् ॥५०॥

पेलवान् खादसि भटान् पेलवान् खान रे कुतः ।
शौर्यवान् यदि निश्शङ्कं धैर्यवांस्तिष्ठ मे पुरः ॥५१॥

इत्यन्योन्योद्भटपटुमहावीरवादैर्विनुन्नौ
तावत्युग्रभ्रुकुटिघटनारौद्ररौद्रस्वरूपौ ।
कल्पान्तोद्यद्घनघनघटागर्जितावूर्जिताङ्गौ
सन्दष्टोष्ठक्षुभितवदनौ चक्रतुर्द्वन्द्वयुद्धम् ॥५२॥

तत्ताहृग्रणरङ्गशारिफलके शस्त्रोपधीन् पाशका
नुत्कीर्यानुपदं भटाक्षनिकरानुट्टङ्कयन्तौ क्षणात् ।

 In Public domain. Digitization Muthulakshmi Research Academy

उद्दिश्याथ जयग्लहं निरुपमन्तौ वीरचूडामणी
युद्धद्यूतमति क्रुधावतनुतामुग्राट्टहासोत्कटौ ।।५३।।

खड्गाखड्गि विजृम्भि विक्रमभराद्रामेश्वरक्ष्मापते
र्भीतस्तद्धनदोरुदञ्चितमहाशस्त्रक्षताङ्गः क्षणात् ।
दिग्धिक्कष्टमिति ब्रुवन्नतितरान्द्राक्पैलवान् खानयं
निर्लज्ज्ं रणभूतलं प्रविजहद्धन्ता पलायिष्ट सः ।।५४।।

भेरी स्त्रीत्वात्सलज्ज्ञा किल यवनचमूनाथभङ्गे तदीया
किञ्चिद्वा नव्यनादीदथ विजयजुषो वीररामेश्वरस्य ।
प्रौढं सैन्ये स्वपुंस्त्वप्रचिकटयिषया दुन्दुभिर्द्राग्व्यनादीद्भेरी
स्त्री दुन्दुभिर्नेत्यलममरवचो जात्वपि स्यान्न मिथ्या ।।५५।।

गद्यम् ।।

तदनु कदनरङ्गोत्तरङ्गशौर्यरामेश्वरभूमीश्वरवर्यदुर्दान्तोद्दण्डदोर्दण्ड खण्डितानां रणमण्डलपण्डितानामुच्चण्डदर्पाणामनल्पानां तालपद्दौलाख्य सेनानामनूनानामगण्यैस्सौवर्णशीर्षण्यैरतिविशङ्कटैः कङ्कटैश्शुण्डालशुण्डा-दण्डोद्दण्डैर्दोर्दण्डैरुदस्तवालहस्तैर्मस्तैः स्वर्णाभरणपूर्णैः कर्णैः खण्डितरिपु मण्डलाग्रैर्मण्डलाग्रैरुद्दामैरस्तोमरैर्विलूनरिपुदोर्दण्डजालैर्भिण्डिवालैरुट्टङ्कित-द्विषद्गलकैर्नलकैः प्रतिभटसंशप्तकत्वव्रतघ्नीभिश्शतघ्नीभिरुत्कीलित-प्रत्यर्थिहृदयजालैश्शूलैस्सूदितविपक्षशकुन्तैः कुन्तैर्भेदितवैरिचक्रैश्चक्रै-र्विरचितसङ्ग्रामाखेटकैः खेटकैः खरतरखुरनिकर धरणितलोत्पाटकैर्घोटकै-र्विभिन्नैः प्रभिन्नैर्विरदैर्द्विरदैरुन्नताङ्गैश्शताङ्गैश्च समन्ततः पतितैस्तिल-शश्चूर्णीकृतैः कल्पान्तभूमण्डल इव संस्तीर्णे सङ्गर भूमण्डले पलायमाने

 Public domain. Digitization Muthulakshmi Research Academy

च निजनाथे पैलवान् खानभिख्ये उपलायमाना अप्यनुपलायमाना धनाधिनाथदिशं प्रत्यविलोकमानाः पृष्ठभागं हतशिष्टास्तदीयसेनाभटाः वनपर्तिराजसामन्तराष्ट्रविराजमान सोलीपुराख्यपल्लीमवष्टभ्य रुष्टा-न्तरङ्गास्तावत्तालपद्दौलाभिधानप्रेरितया तत्रागतया अदीनया सेनया कवचिताः परिवार्य पैलवान् खानभिख्यं सेनान्यमनन्यमानसा निवर्तमाना मूर्तमाना दक्षिणाभिमुखं रक्ष्यमाणास्तेन पुनरभिषेणयन्ति स्मात्यन्त-कृतोन्मेषेण रोषेण विरचितपरिपोषेण क्ष्वेलितघोषेण मुखरयन्तो दशदिशावकाशान् विजिगीषन्तो वनपर्तिधराधिनाथं घनकीर्तिधराधि-नाथम्। तावदाकर्णिततदुदन्तो रामेश्वरधराकान्तोऽपि स्तूयमानो जय जय शब्दैर्विरचिताभिक्रमः प्रौढविक्रमस्समुन्नतध्वजिन्या निजध्वजिन्या सर्वोत्तरयोत्तराभिमुखं स्वच्छन्दं गच्छन्नच्छाच्छपुच्छच्छविगन्धर्वसहस्रबन्धु-रपार्श्वभागश्शारदनीरद निबिडितोपत्यक इवाञ्जनाचलो दुर्निरीक्षो ग्रैष्मदिनयौवनमध्यमध्यासीन इवांशुमाली परं सोलीपुरं प्रत्यागत्य यावत्पश्यत्याचक्षुःप्रसरणं विजृम्भमाणामसङ्ख्यां सेनां प्रतिभटानां तावदेव कृन्तन्तः कुन्तान् पाटयन्तः खेटकान् खण्डयन्तो भिण्डिवालां-श्चूर्णयन्तस्सौवर्णशीर्षण्या निपातयन्त स्तुरङ्गान्मर्दयन्तश्शताङ्गान् भिन्दन्तो दन्तावलान् छिन्दन्तश्शीर्षाणि रुन्धन्तोऽभ्यायातान् उन्मूलयन्तो बाहून् उत्सारयन्तस्सारसनाश्शकलयन्तः कवचान् घोषयन्तो निजनाथनामानि प्रसारयन्तस्तलातलि प्रवर्तयन्तः केशाकेशि वितन्वन्तो बाहूबाहवि विरचयन्तो दण्डादण्डि प्रोन्मीलयन्तश्शस्त्राशस्त्रि सन्दर्भयन्तो मुष्टीमुष्टि समङ्कुरयन्तः कुन्ताकुन्ति प्रोन्मेषयन्तो नखानखि विजृम्भयन्तः पादापादि

 In Public domain. Digitization Muthulakshmi Research Academy

विदलयन्तो नासिका विदारयन्तः कर्णानुल्लुञ्छन्तश्श्मश्रूण्याकर्षन्तः कूर्चानुत्कीलयन्तश्शतघ्नीस्सादयन्तस्सादिगणान् सूदयन्तो निषादिनः केदयन्तस्सारथीन्वर्षन्तस्तप्तायोगोलकानवधीरयन्तः परस्परं निगृह्णन्तोऽन्योन्यं वर्जयन्तश्शरणागतांस्तर्जयन्तो दर्पोदग्रान् गर्जयन्तस्स्वपक्षानरे तिष्ठ तिष्ठामि प्रहर प्रहरामि सहस्व किं वृथा कत्थसे कुतः पलायसे सम्मुखे मे हि दूरादपेहि प्रकटय शौर्यं प्रकाशयामि क्रौर्यमित्यादि बहुविधं जल्पन्तः कल्पान्तरुद्ररौद्रतर रूपेण रामेश्वरभूपेन निजदेवतासारूप्यं प्रापितेष्विव दयया हस्तमात्रावशेषितेषु केषुचिद्यवनेषूत्तमाङ्गत्वबहुमिमानयिषयेवोच्चैरुच्चैर्गगनाग्रमुट्टङ्कितेषु केषाञ्चिच्छीर्षेषु म्लेच्छानां दक्षिणां दिशमागतेषु तेषु सैन्येषु तामेव दिशं चिरादपुनरावृत्तिप्रापितेषु पराभूते च पैलवान्खानभिख्ये सेनाधिनाथे चुबुकाग्रप्ररूढमहाकूर्चभारातिशयदत्तसाहायकेनेवावमाननम्रेण शिरसा विलोकमाने धरणीतलमेव तदीयकरवालमहोच्चाण्डस्पर्शनवेगविवश इव सुदूरं पलायमाने निसर्गादाशैशवादविद्धरकर्णानामपि प्रतिभटम्लेच्छानां जनयन्तो महोग्रसिंहनादविजयदुन्दुभिनिध्वानैः कर्णवेधं सुदुस्सहं निटिलतटघटनरूपप्रणामापदेशेन ललाटलिपिरेखामाहत्याहत्य प्रकाशयत इव नैजदौर्भाग्यं कांश्चिद्धतशिष्टान् प्रतिभटान् विमुञ्चन्तो दयया पलायमानान् स्वच्छन्दं विलोक्य तान् जीवत गच्छत किमारोपितैश्शौर्यैरिति वदन्तस्तान् परिवव्रुर्म्लेच्छमुखान्यपि दुर्वर्णानि विधाय निवर्तमानं सेनाधिनाथदत्तहस्तमुदस्तजयलक्ष्मीकटाक्षं रामेश्वरक्षोणीश्वराध्यक्षम् ॥३॥

In Public domain. Digitization Muthulakshmi Research Academy

पद्यम् ॥

ये प्राक्कर्णेऽप्यविद्धास्समरभुवि तदा तान् समग्राङ्गविद्धान्
क्रुद्धः कृत्वा क्षणेन प्रतिभटयवनानुद्भटैः खड्गपातैः ।
तन्वन्नेष स्वराष्ट्रं निजभुजवशगं वीररामेश्वरेन्द्रः
प्राविक्षद्गीयमानो जयजयवचनैस्स्वां पुरीं सर्वसैन्यैः ॥५६॥

श्रीमद्रामेश्वरेन्द्रोद्भटपटुतरदोर्दण्डशौण्डीर्यधूताया
ताजातानुतापा निशि निशि यवना वीक्ष्य विद्योतमानान् ।
खद्योतान् हन्त रामेश्वरनलकमुखादुद्गलद्गोलकौघा
स्तप्तारक्ताः पतन्तीत्युदितभयभरा दीनदीना बभूवुः ॥५७॥

संरक्षन्निजराष्ट्रमेष घनदोर्दण्डप्रतापोत्करैः
श्रुत्वात्युत्तमवीरराघवमहायोगीन्द्रमभ्यागतम् ।
प्रत्युद्गत्य सुदूरमात्मनगरीमानीय रामेश्वरो
दिव्योद्यानवनीं तमेनमनघं भव्यामवातीतरत् ॥५८॥

गद्यम् ॥

अन्येद्युरुद्यानवन्यावन्यामुद्योतमानं प्रद्योतनमिव द्योमण्डल्यां सद्यो हृद्योन्मिषत्कुतुको रामेश्वरभूमीश्वरोऽपि संसेवितुं तं यतिवरेण्यमगण्यमहिमानं महिमाननीयविचित्रचरित्रं जगत्पवित्रमुपागत्य साकं नायकाभ्यामग्रतः प्रणम्य दूरीकृतप्रपन्नजनांहस्संहतिं श्रीलक्ष्मीनृसिंहमुपसृत्य किञ्चिदन्तरमग्रतस्सर्वमप्यधः क्रियतेऽस्माभिः कृष्णाजिनमिति स्पष्टं सूचयितुमिव जगतां यतीन्द्रसिंहासनाग्रसमास्तीर्णं कृष्णाजिन-

 In Public domain. Digitization Muthulakshmi Research Academy

मधिरूढं महर्षिभिरिव वसिष्ठं देवैरिव पितामहं परिगतं शिष्यमण्डलैः परमार्थबुभुत्सया पठद्भिश्श्रीभाष्य श्रीरहस्यत्रयसारमुखान् दिव्यग्रन्थान् शुद्धसत्वमयतया दिव्यविग्रहस्यान्तरनधिगतावकाशाभ्यां कुत्रापि यातुमुद्गताभ्यामिव द्वितीयतृतीयगुणाभ्यां काषायशिखाभ्यां मनोज्ञरूपं मम तावदेकाधिकाः पञ्चदशकलास्ता अप्यनित्या मत्तोऽप्येष निरन्तरं गुरुवरवदनचन्द्रश्चतुर्गुणितकलापरिपूर्ण इति नित्यकलाजिघृक्षया समाश्रयन्त्या बालकलानिधिरेखयेव सितमृत्तिकोर्ध्व पुण्ड्ररेखया शरणागतमतिचाञ्चल्यनिराकरणपटुरयं गुरुवर इति नैजचाञ्चल्यमपहारयितुमिच्छया रचितोपसर्पणयेव विद्युल्लतया श्रीचूर्णरेखया च मनोहरललाटफलकं अन्तस्समेधमानशुद्धसत्वगुणवल्लर्यग्रसूक्ष्मतन्तुभिरिव स्वच्छन्दं बहिश्शरीरयष्टिमवलम्बमानैरति स्वच्छैर्ब्रह्मसूत्रैः पद्माक्षतुलसीमालिकाभिश्च परिष्कृत वक्षस्थलमम्भोनिधिं दयामहानद्याः वसन्तसमयं सौशील्यमल्लीकुसुमस्य शरदारम्भं तमोजलधाराणां सौवर्णकरण्डं सौलभ्यसिद्धाञ्जनस्य नारदमिवात्यर्थगौरवपुषं व्यासमिव सत्यवत्याहृतं सर्वत्र समुन्नतिभाजमपि चित्तसमुन्नतिवर्जितं रञ्जित विषयमप्यरञ्जितविषयं विलोक्यापादमस्तकं श्रीमत्परमहंस परिव्राजकाचार्यं श्रीमत्कविकथककण्ठीरवचरणनलिनयुगल समर्पितात्मभरं श्रीमद्रामानुजसिद्धान्तनिर्धारणसार्वभौमं श्रीवीरराघवयोगीन्द्रं निखिलगुणसान्द्रं प्रणम्य प्रणम्य समर्प्य राङ्कव मुक्ताहारनिष्काञ्चल्यग्रहारान्निषण्णस्तदाज्ञया विलोकमानो विरचित वादाहवान् मोदावहांस्तत्सन्निधिसुधीसङ्घान् समुपागतश्च तत्र तर्काध्वन्य मूर्धन्यं निर्भरशास्त्रार्थसन्दर्भगर्भितवचोभरदूरीकृततार्किकविशृङ्खलवाद कण्डूतिभरं

In Public domain. Digitization Muthulakshmi Research Academy

सुब्बाशास्त्रिसमाह्वयं सुधीवरेण्यं ततस्ततो निषण्णम् अखिलगुण-परिपूर्णश्श्रीमच्छ्रीनिवासब्रह्मतन्त्रपरकालगुरुवर्यकृपया वर्धमानमञ्जलिनेव निपीतपतञ्जलिनयसुधाझरमाचार्यवेङ्कटाचार्यं कृतिवर्यञ्च विलोक्याहो खल्वनयोर्विद्वद्वरेण्ययोरुद्दामा वाक्पटिमा तदेतावस्मदास्थानोचिताविति यावन्नैकटिकेन सकुतूहलं विनयानम्रेणालोकमात्रविदिततत्तत्पुरुषसारेण लोकोत्तरमेधाविशेषवशीकृततत्तच्छास्त्रार्थेन प्रणयमधुरगम्भीरललित-वचनसुधापरिशमिताश्रितजनहृदयतापेन निर्भरब्रह्मवर्चसपरिपूर्णेन सुधारसपरिपूर्णेनेव राकाचन्द्रेण सर्वशुभगुणसान्द्रेणानुजत्वेनाभिमतेन वेङ्कोबनायकेन समालपति तावदेव महाराज भवत्प्रसादप्रोत्साहितेन कौतुकेन तरलीभूतमस्मदन्तरङ्गमनिच्छन्तमपि मां प्रार्थनकर्मणि प्रसभमाज्ञापयत्युन्मीलयति हि प्रभूणामनुग्रहस्स्वल्पोऽपि प्रागल्भ्यं मादृशां किमुतानवधिके तस्मिन् किं बहुना परिपूर्णस्तद्यदि मयि यवीयस्त्वेन प्रसादस्तदनुगृह्णातु मम प्रार्थनं महाराजः अराजकमिव राष्ट्रमनधिगत-शास्त्रमिव द्विजतुलमदैवतमिव भवनमनुदितविनयमिव वैदुष्यमनुन्मील-तवैराग्यमिव तत्तच्छास्त्राभ्यसनमपण्डितमास्थानं न कदापि रोचते राज्ञां तदवश्यं न निवर्तनीयं कुतूहलं महाराजेन सर्वज्ञेषु प्रार्थनापि दाढर्यायैव केवलमित्यभ्यर्थितस्तेन बहुधाज्ञप्तश्च तैर्गुरुवरैर्बहुविधाग्रहारादिजीविका-प्रदानपूर्वकं समावेश्य वनपर्तिनगरे तत्प्रमुखान्विद्वदग्रगण्यान् शतशोऽती-तेषु च पञ्चषेषु दिनेषु प्रस्थितं यतीन्द्रमनुव्रज्य तदनुगृहीतविजय-मङ्गलाशासनः निजराष्ट्रे कांश्चित्सुखमुवास वासरांस्तोषयन् भूसुरान् ॥४॥

In Public domain. Digitization Muthulakshmi Research Academy

पद्यम् ॥

श्रीमद्रामेश्वरेन्द्रोद्भटभुजविजितं पैलवान्खानभिख्यं
नासदौंलानरेन्द्रस्सपदि निशमयन्नब्रवीद्धिग्धिगेतान् ।
जाल्मा म्लेच्छा अवल्गान्नविदितमिह मे दुर्मदात्कर्म दार्ढ्यं
नालोच्यैव क्व चामी विरलतरबलावीरमौलिः क्व राजा ॥५६॥

एष श्रीमानुदारः पटुमतिरमितोद्दण्डदोर्दण्डतेजा
राजारामेश्वराख्यो भुज इव सुमहान् दक्षिणोदक्षिणो मे ।
ईदृक्षेणापि योद्धुं कथमयतिषत प्रज्ञया दूरमुक्ता नूनं
दुर्दान्तचित्ता व्यदधत नितरामुत्कटं विप्रियं मे ॥६०॥

आबाल्यादेष धीमानिह निखिलजगत्ख्यातविक्रान्तिभूमा
नाजैषीत्कान् सलीलं प्रतिभटनिवहानस्मदाज्ञप्तिमात्रात् ।
ईदृक्साहाय्यहेतुं कथमिव दयितं वीररामेश्वराख्यं
जेतुं यूयं कृतास्था धिगिह जडधियो दुर्भगान् हन्त युष्मान् ॥६१॥

धिक्कृत्यैवं तदानीं बहदरु बहिरीराजदोर्दण्डभग्नानु-
द्विग्नांस्तान् समस्तानथ समदगजान् रत्नहारानुदारान् ।
आनाय्यालेख्य पत्रं स झडिति बलवन्ताभिधानं प्रदत्तं
तुभ्यं यस्मादजैषीः प्रतिभटनिवहानित्यमुष्मै ससर्ज ॥६२॥

आप्यारादाज्ञया मे नृपनिजनगरान्निर्जिहानो महोग्रां
सेनां सन्नाह्य तूर्णं प्रतिभटवशगां नल्लपल्लीं निरुद्ध्य ।
बध्वा प्रातीपिकान्मे कुरुनिजवशगां तामिति प्राप्तहर्षो
नासदौंलावनीन्द्रस्स धरणिपतये प्राहिणोत् पत्रमस्मै ॥६३॥

In Public domain. Digitization Muthulakshmi Research Academy

तदनुविरचिताज्ञो मण्डलेन्द्रेण राजा
कदनकृतमहास्थस्साधु सन्नाह्य सेनां ।
मदगजभटघोटीमालिनीं कालनीतिं
दधदहितविधूत्यै नल्लपल्लीं प्रपेदे ॥६४॥

उल्लोलकल्लोलमतल्लिकाभिर्निर्लोडयन् भूमिमिवाब्धिराजः ।
वेल्लन्मुहुर्दुलन् लिताश्वमल्लैस्तां नल्लपल्लीं स रुरोध कल्ये ॥६५॥

स्तुत्वा सर्वं सहेति प्रतिपदमखिलास्ताडयन्ते पदैर्मां
यस्स्याल्लोकेक्षमावांस्तमखिलमनुजाः क्लेशयन्ति ह्यजस्रम् ।
स्तुत्यैषां किं ममेति क्षितिरतिकुपिता सर्वलोकोपरिष्टा-
दारूढेवाबभासे बलचलितमहाधूलिकापालिकाग्रे ॥६६॥

रुद्धं श्रुत्वाथ रामेश्वरनृपवरदोर्दण्डशौर्याभिमग्रं
मत्वारादङ्गराजो निजनगरमथोन्मज्ञनायास्य तूर्णम् ।
विभ्रत्खेटोडुपं द्राङ्निजभुजविलसन्मण्डलाग्राख्य
नौको गेहान्निर्गत्य वाहिन्यभिमुखमचलद्वीवरैस्सर्वसैन्यैः ॥६७॥

विपक्षपृतनामुखं चलति तत्र राजन्यदः
पुरस्य ललना महोच्चतरचन्द्रशालागताः ।
बबुर्निजनिजाम्बरानि हरणे समायास्यतो
विलोकितुमिवागता दिविषदङ्गनाः कौतुकात् ॥६८॥

उद्भटयोर्वाहिन्योः परस्परं सङ्गमेतयोस्तत्र ।
इतरेतराभिघातात्कीलालैरुत्तरङ्गितादेशाः ॥६९॥

In Public domain. Digitization Muthulakshmi Research Academy

अताडयन्त दुन्दुभीननादयन्त काहला
नगर्जयन्त कुञ्जरानहेषयन्त घोटकान् ।
अदर्शयन्त विक्रमानघट्टयन्त दोर्युगी
र्द्वये भयेन दूरिताश्चमूभटा महोद्भटाः ॥७०॥

उग्रं पश्याघनेरम्मदनिभमहसस्तत्र पाणिन्धमेषु
प्रोद्यद्धूलीघनालीतिमिरकवचितेषूभये ते बलेषु ।
अत्यर्थोत्क्षिप्तकौक्षेयकतटिदुदयज्ज्योतिरभ्यन्तरेष
दृष्ट्वैवैकैकवारं लुलुवुरसुहृदां मस्तकान्यस्तसङ्गम् ॥७१॥

सञ्जातेऽत्युग्रयुद्धे प्रतिघभरजुषां सैनिकानां द्वयानां
विक्रान्तः क्लृप्तसङ्घोप्यथ खलु बहिरी राजरामेश्वरोऽयम् ।
सज्जीकुर्वन्नसङ्घाः प्रतिभटपृतनाधूमकेतून् शतघ्नी
रुगोग्रं वीक्षमाणो निजभटनिवहैर्धुक्षया मास रूक्षाः ॥८२॥

ताश्च प्रत्यर्थिसेनाततिविलयकृते शश्वदुज्जृम्भमाणाः
कल्पान्ताम्भोदमाला इव भटपटलानुक्षणोद्दुक्षणेन ।
आरक्तान् स्थूलकालायसघनघुटिकौघाशनीनुत्किरन्त्यः
प्रोद्दामानश्शतघ्न्यस्सपदि दशदिशोऽप्युग्रशब्दैरभिन्दन् ॥७३॥

भङ्गं प्रददौ राजा तुङ्गतरं रङ्गरायवाहिन्यै ।
सा पतति सर्वतोमुखबृन्देऽरीणामभूदहो शुष्का ॥७४॥

उत्कृत्तानाञ्च मूर्ध्नां करिकरनिकरज्योतिषां चापि दोष्णां
दध्नां खण्डैरिवास्थ्नां ततिभिरिह मुहुश्चूर्णितानां च सक्थ्नाम् ।

In Public domain. Digitization Muthulakshmi Research Academy

तूर्णं कीर्णा धरित्री रुधिरझरगभीरान्तराला कराला पश्य
द्विश्चामराल्या अपि भयमददाच्छूलक्षणमक्ष्णामभीक्ष्णम् ।।७५।।

सन्त्रस्ताः केऽपि रामेश्वरनृपतिभुजादण्डशौर्यादवार्या
त्तकृत्तोदन्तदन्तावलधरणिधरोदग्रदुर्गेषु लीनाः।
केचित्तन्मण्डलाग्रक्षतभटपटलीशोणितोदह्रदान्त
र्मग्ना भग्ना विविग्ना मुहुरपि तरलीभूतचित्ताः प्रवृत्ताः ।।७६।।

तावत्प्रोच्चण्डशौर्यस्समरभुवि महावीररामेश्वरेन्द्रः
कृत्वा तं रङ्गराजं प्रहरणचकितं हन्त दुर्वर्णराजम् ।
तस्मिंस्तत्रापयाते समदकरिघटास्तस्य दीर्घाश्शतघ्नी
रादायाथ स्वश्यामतनुत निमिषान्नल्लपल्लीमतल्लीम् ।।७७।।

नासदौंलेश्वरायप्रतिभटविजयं तं निवेद्यादरेण श्रीमान्
रामेश्वरेन्द्रो विजयमुदितया सेनयाऽदूनया द्राक् ।
त्यक्त्वा तां नल्लपल्लीं निजनगरतटीं प्राप्य सुप्तो निशीथे
सेनान्यादीन् समग्रानपि भटनिवहान् प्राह वाक्यं गभीरम् ।।७८।।

गद्यम् ।।

इतश्चेतश्चावधार्यतां किञ्चित्सेनाधिनाथादयो योधा अविप्रकर्ष एव वनपर्तिराजधान्या दिशायां पौरुहूत्यां राजधानी गोपालपेटाभिधाना भूपालैरस्मत्कुलीनैरलीनशौरैरवार्यौदार्यैर्गोपालरायप्रभृतिभिरभिरक्षिता पुरा। चिराय निमित्तान्तरेण केनवा ज्ञातिब्रुवैः कैश्चिदात्मीयत्वेनाक्रान्तेति श्रूयते हि भवद्भिरप्यभिभवद्भिरसुहृद्वर्गानुद्गाढभुजार्गलनिरर्गलप्रताप-

In Public domain. Digitization Muthulakshmi Research Academy

प्रभावं प्रकाश्य किञ्चित्स्ववशे विधातुमुचितोऽयं समयो यदाहि भावैर्हृष्टं पुष्टं मन्येत स्वकीयं बलं विपरीतं च प्रत्यर्थिनस्तदा तं प्रत्यवश्यं प्रयातव्यं राजेन्द्रै रणायेति राजनीतिरियं तदुद्यन्तां विजयध्वजा बद्ध्यन्तां सारसना आस्फोट्यन्तां भुजशिखराण्याहन्यन्तां जयदुन्दुभयस्सन्धुक्ष्यन्तां शतघ्न्य उद्दीप्यन्तां नलका वल्यन्तां सैन्धवाः प्रपञ्च्यन्तां वीरवादाः प्रस्तूयन्तां सिंहनादाः कम्प्यन्तां चन्द्रहासास्सेव्यन्तां वीरपाणा निगृह्यन्तां चर्मफलका आधाव्यन्तां शताङ्गा निरुद्ध्यन्तां गोपालपेटाभ्यर्णदेशा आरुह्यन्तां प्राकाराग्राण्याकृष्यन्तां प्रतिभटाः प्रकाश्यन्तां पराक्रमाः अवभज्यन्तां चर्यागृहगोपुराणि विदार्यन्तां गोपुरकवाटान्याह्रियन्तां धनान्यादीयन्तां वसनानि दूष्यन्तामयनानि पात्यन्तां शतघ्न्यः किं बहुना यावदुदयते भगवान्महोत्पलवन प्राणायामव्रतावकीर्णित्व-प्रदानवैहासिक स्तावदुन्मूल्यन्तां पुरिं निजभुजाग्रसिंहासनमारोपयितुं तदीय लक्ष्मीमभिलाष्यामि तथो स्थातव्यं भवद्भिरचिरादेवेत्याज्ञाप्य साकं तैरेव सेनाभटैस्तस्मिन्नेव निशीथे गाढान्धतमसयमुनाझरतरलतरङ्ग शतप्रतिबिम्बितानेकस्थूलतारकामालिकाशङ्काकरजाज्वल्यमान प्रदीप-रेखाप्रकाश्यमानेन मार्गेणाभ्येत्य तां गोपालरायपेटाभिधानां राजधानीं यथोदितं प्रवर्तयद्भिर्युद्धक्रीडान्तैर्भटैरधिक्षिप्तेषु तत्रत्यराजसैन्येष्व-द्वारेणारुह्य प्राकारं विन्यस्य विद्विषां मूर्धनि वामं पादं द्राघीयस्तर-कृपाणसब्रह्मचारिभुजाग्रो निगृह्य तदधिनाथं गोपालरायाभिधानं राजानं बालं साकं जनन्या केशवाम्बाभिधानया गृहीत्वा जीवग्राहमुदिते च त्रयीमये तेजसि समारुह्य तदीयसिंहासनमभिषिक्तो द्विजनिकुरुम्बैः

In Public domain. Digitization Muthulakshmi Research Academy

प्रवर्तितमङ्गलाशासनः तत्र वितीर्य यथेष्टं मणिकनकमयाभरणवसन परिकरान् विदुषां निजसैन्यानाञ्च समारुह्य दन्तावलाग्रसमेधमानं मणिमण्डपं साकं मेधाविनां शिरोमणिना वेङ्कोबनायकेन महागिरि-शिखरमिव घनाधनस्साकं भानुमता स्तूयमानो जयजयशब्दैः प्रविश्य निजनगरीं निरुद्ध्य तत्र कुत्रचन तं साकं तदीयजनन्या गोपालरायं रक्षन् स्वयमवनीतलमनीनयत्कानिचिद्दिनानि कुतूहलघनानि ॥५॥

रामेश्वरविजयेऽस्मिन् सप्तममुल्लासमतनुत विलासात् ।
श्रीरामकृष्टनृपतेरास्थानकविर्जवेन कृष्णार्यः ॥

इति श्रीमत्प्रत्यग्रदुर्गतातार्यवर्यनन्दनस्य कृष्णकविसार्वभौमस्य कृतिषु रामेश्वरविजये चम्पूप्रबन्धे सङ्गरोल्लास सप्तमः ॥

श्रीमते श्रीनिवासाय परब्रह्मणे नमो नमः ॥

श्रीरस्तु ॥ मङ्गलानि भवन्तु श्रियै नमः ॥

रामेश्वरविजये - ७ - सङ्गरोल्लासः ॥

॥ समाप्तः ॥

In Public domain. Digitization Muthulakshmi Research Academy

श्रीहयग्रीवायनमः ।

रामेश्वरविजये - ८ - सैनापत्योल्लासः

गद्यम् ।।

तत्रान्तरे महत्तर विभवभोग्यभाग्यनगराधिनाथेन नासदौंलावनीन्द्रेण नित्यानुरक्ततया स्थिरारम्भतया प्राज्ञतया महाकुलीनतया गभीरतया राजनयविचक्षणतया सर्वतः प्राप्तबुद्धिनिश्चयतया दूरीकृताष्टादश व्यसनतया धीरप्रकृतितया सारज्ञतया विनीततया च प्रथमे वयसि वर्तमानोऽप्ययं कामप्यपलितमूर्धानं वृद्धतामभिगत स्सर्वोत्तरोऽयमेव नेदृशः पुमान् कश्चिदपि मामकीनराष्ट्रमतिमहदनेकराजकुलगभीरमभिरक्षितुं दक्षिणोऽस्ति कुत्रापीति जातनिश्चयतया सचिवासनाभिषिक्तेन महोदारगम्भीरमधुरहृदयेन लोकोत्तरवस्तुजालावर्जनशीलेन सालावर्जङ्गिति सुगृहीतनाम्ना प्रोद्दामधाम्ना भूपाल सहास्रमौलिलालितशासनभूम्ना महाविक्रमभरनिशमनजनितया दिदृक्षया प्रहितं शासनं मानयन्मूर्ध्ना प्रस्थाय निजनगरादुपेत्य भाग्यनगरं मन्त्रीन्द्रदिदृक्षासमागतकृतप्रतीक्षणक्षितिपालशतवाहिन्यूर्ध्वभागप्रेङ्खदुद्दण्डपुण्डरीकायमाणधवलातपत्रशतसहस्रसम्बाधप्रतिहारचत्वरसत्वरविसृत्वरतदाज्ञानुरूपतत्तत्क्षमापतिसमाहूतिविचक्षणनियोज्यजनसहस्रकरोदञ्चितकनकरजतदण्डप्रभाकिम्मीरितदशदिशावकाशं अन्तर्गतनिजनिजाधिनाथसुखनिर्गमनप्रतीक्षणपरधृतविविधायुध कर्णाटलाटमहाराष्ट्रान्ध्रद्रविडचीनमहाचीनम्लेच्छप्रायजनशतकोटि

In Public domain. Digitization Muthulakshmi Research Academy

निबिडितप्रतिहारभागं प्रविश्य चास्थानं तत्र यथास्थानस्थितैः करतलामलकीकृतानेक जनपदपुर नामधेयतया निजभवनमिव निखिलमपि भुवनं विलोकमानैर्गौरोष्णीषैर्धवलकञ्चुकैश्श्वेतान्तरीयकै श्शुभ्रोत्तरीयैर्घनसारचन्दनचर्चितैर्मल्लीमाल्यकृत शेखरैः पुण्यमयैरिवालिखितानेकराज्यशासनपत्रैरधिकृत पुरुषैर्निष्पन्दशरीरैरागृहीत तत्तद्वाङ्मूलैरतिमनोहरमास्थानमण्डपमध्यमलङ्कुर्वाणमुदग्रं हिरण्मयं सचिवासनमधितिष्ठन्तमुडुनिकरपरिगतसुमेरुशिखराधिरूढमिववलक्षपक्षचन्द्रं मण्डलेन्द्रमन्त्रीन्द्रं तं विलोकमानो दूरादेव प्रणतेन मौलिना उदञ्चितकरतलनिटालतटस्पर्शनप्रणामपूर्वकं सम्मान्य तमानीयमानो मन्दमन्दं परजनैस्समर्प्य कनकभाजनोदञ्चितनिष्कराशिमयीमुपदां पुनर्विरचिततदुचितप्रणामो राजसिंह निषीदेत्युदीरितं निशम्य तदीय शासनं पश्चात्पश्चादेकैकं पदं न्यस्य न्यस्य मन्दं मन्दमपसृत्य निकट एव कस्मिंश्चित्कनकासने निषण्णः क्षणमुत्थाय महाराज मन्त्रीन्द्रनिरीतिकास्सम्प्रति भवद्भुजार्गलकृताभिरक्षास्सर्वे देशा नान्य एवं पालयति राष्ट्रं कश्चिदपि न पूर्वे नापरे च शक्नुवन्ति भवत्तुलामारोढुं किं बहुना यदाज्ञापयत्यस्मान्महाराजस्तदनुष्ठीयतेऽस्माभिरासीत्सम्प्रति लोचनयोरानन्दमयी वृष्टिर्दृष्टे निखिलजगदासेचनके महाराजास्थाने महतीति विज्ञाप्य क्षणं जोषम्भूतस्तेन च किञ्चिदुपजातशङ्केन राजसिंह श्रूयते हि नरपालैस्सुदुस्सहमन्यैस्तव तेज इति तदत्रैव स्थातव्यमस्मद्भवने कानिचिद्वासराणि भवतामहोदग्रप्रतापशोषितसामन्तलोकेनागृहीतशस्त्रेणेत्याज्ञप्तोऽसावलक्षीकृततद्वचनोऽप्युद्दामविक्रमतयाङ्गीकृत्य लौकिकीं वृत्तिमेवमेवमिति निवसन्नेव तद्भवने प्रदाय बहुशो

In Public domain. Digitization Muthulakshmi Research Academy

वृत्तीराश्रितानां विदुषामप्रकाशितपराक्रम एव रजसाच्छन्न इव महामणिर्निनाय तत्र समय प्रतीक्षो वत्सरद्वितयमर्धाधिकं निर्धारित-तत्तत्कालोचितक्रमो रामेश्वरभूमीश्वरः।

पद्यम् ॥

तावत्कैश्चित्समन्तादपि निजविषयं बाध्यमानं विशङ्कं
दुर्वृत्तैर्धूर्तजालैरहमहमिकया चारवाग्भिर्निशम्य ।
सालावर्जङ्गभिख्यस्सचिवकुलमणिर्निग्रहायाथ तेषां
नान्यं रामेश्वरेन्द्रादपि पटुमवनौ चिन्तयन्नध्यगच्छत् ॥१॥

आजुहाव तमिमं स मन्त्रिराडाजिसीम्नि दलितारिदुर्मदम् ।
आदरात्परिजनैस्स तु क्षणादाससाद मुदितोऽथ तत्सभाम् ॥२॥

दूरात्प्रह्वेण तेन क्षितिपतिमणिना प्राभृतं निष्कपूर्णं
मन्त्रीन्द्रोऽप्यर्प्यमाणं प्रमुदितवदनः प्राज्यमादाय मोदात् ।
निश्शस्त्रं तं समीक्ष्य क्व नु नृपवर ते शस्त्रमित्याह सोऽयं
नाज्ञा शस्त्रग्रहे मे भवत इति मया मुक्तमित्यभ्यवोचत् ॥३॥

निशम्य तदिदं वचस्सचिवमौलिरस्मै स्मय
न्निजान्वयजशूरराट्करतलात्तसख्यं चिरात् ।
तटिद्विलसितप्रभं नृपतिमण्डलाग्राञ्चितो
भवानिति हि सूचयन्निव स मण्डलाग्रं ददौ ॥४॥

इतरनृपालदुर्लभममुं करवालवरं
सचिववरेणदत्तमथ वीक्ष्य नृपालमणिः।

 In Public Domain. Digitization Muthulakshmi Research Academy

अथ किममुष्यकृत्यमभिधाय कृपाणमणिं
प्रदिशतु मे भवानिति कृतप्रणतिर्न्यगादीत् ॥५॥

उदितमिदं निशम्य वनपर्तिनृपालमणे-
रवसरयुक्तमात्तबहुविस्मयलोलहृदाम् ।
बत बहुधीरतास्य नृपतेरितरासुलभेत्यखिल
धराभृतां तरलितानि शिरांसि चिरात् ॥६॥

अहमपि विमृश्यैवैतस्य प्रयोजनमुत्कटं
नरपतिमणे तुभ्यं प्रादां कृपाणमिमं निजम् ।
न भवति मया तुभ्यं दत्तं कदापि निरर्थकं
तदिदमनघादत्स्वेत्येनं जगाद स मन्त्रिराट् ॥७॥

सपदि शिरसोपात्तं श्रीमंस्तवाद्भुतशासनं
त्वमिह भवतां सर्वेषां नः प्रमाणमिमाः प्रजाः ।
अवसि सततं यत्नेनेति ब्रुवन्तममुं पुनः
प्रमुदितमना मन्त्रीन्द्रस्तं जगाद गभीरधीः ॥८॥

श्रीमन् सव्वायिराजा बहदरुबहीरीत्यादि जैत्राङ्कशाली
यत्त्वं युक्तं तदेतन्न खलु तव पुमान् कश्चिदस्तीह तुल्यः ।
नैतन्मिथ्या ततस्त्वां कथयति सचिवाधीश्वरः कञ्चिदर्थं
चित्ते दत्तावधानो भव नृपतिमणिश्रेणिमूर्धन्य किञ्चित् ॥९॥

निरर्गलविसृत्वरप्रचुरविक्रमस्त्वं मया
निरुद्ध इह वाजिराडिव महागतेर्निग्रहात् ।

 In Public domain. Digitization Muthulakshmi Research Academy

भवेर्नृपशिखामणे तरलमानसः प्रायशो
मनस्तव परीक्षितं न मयि दोषदृष्टिं कुरु ।।१०।।

आस्तामिदम् ।।

सैनापत्येऽभिषिक्तोऽस्यवनिपतिमणे साम्प्रतं साम्प्रतं
नस्सेनां कृत्वा स्ववश्यामथ मुदिनपुरीं याहि जैत्रार्भटीभिः ।
तत्रास्ते नागनामा नरपतिकुलजः कश्चिदुद्दामशौर्यस्तं
द्रष्टुं वापि नेशाः कतिचन धरणीशाभिधा युद्धसीम्नि ।।११।।

प्रायस्तेन प्रभग्नास्सकलनृपवरा युद्धबद्धान्तरङ्गा
श्शूराणामग्रगण्यो न गणयति मदात्क्वापि वास्मानकस्मात् ।
धत्तेऽसौ प्रातिकूल्यं द्व्यधिकदशमितान्वत्सरान्मत्सराढ्यो
जीवग्राहं ग्रहीष्व प्रतिभटमथवाप्यञ्जसा तं जहि त्वम् ।।१२।।

सैनापत्येन साकं रिपुविजयकृते तेन दत्तां महाज्ञां
मूर्ध्ना सम्मान्य लब्ध्वा बहुमतिमनघां तेन पूर्णां वितीर्णाम् ।
आरुह्योच्चैर्गजेन्द्रं समदगजघटाबृंहितैस्संहिताभि
र्हेषाभिर्घोटकानां मुखरितककुभा सेनया गेहमैषीत् ।।१३।।

गद्यम् ।।

तत्र च चित्रतरकुथास्तरणकिम्मीरिते वासभवने निषण्णः पर्यङ्के गिर्यङ्के सिंह इव राजसिंहः किञ्चिदुच्छ्वस्याहो चिरादारूढा खलून्नत व्यवसायशाखां सैनापत्य कुतूहल कल्पवल्ली प्रायेणातर्कितान्येवापतन्ति भागधेयानि पुंसां यदपेक्षिते समये विफलितमनपेक्षित एककाले समङ्कुरितं मनोरथलाभेनास्तामिदमापातमधुरं दुर्दमविक्रमविशङ्कट-

In Public domain. Digitization Muthulakshmi Research Academy

प्रतिभटकोटिसङ्गरसङ्कटतया सैनापत्यमथाप्यनुष्ठेयान्येव तेषु तेषु समयेषु मनस्विना पुरुषेण तानि तान्यभिजनाचारोचितानि कृत्यानि नासाम्प्रतञ्च मन्ये मम निरन्तररणरङ्गव्यवसायं यदेष भूभुजां परमो धर्मो निग्रहो दुर्दान्तानामिति हि स्मर्यते तिष्ठतु तदेतदिदमन्यदस्ति दुर्भरं कृत्यं यदेवंप्रायरणरङ्गताण्डवपाण्डित्याक्षिप्तचित्ते मयि को नु मदीयं राष्ट्रमहमिव निरीतिकं पालयेदिति दूरप्रहिततरलतरतारकलोचनमालोच्य प्रतिपद्य चेतिकर्तव्यतां तावत्तुल्यसुखदुःखमात्मनो भगवत्प्रसाद समधिगत-सौशील्यधार्मिकतामतिचातुरीवैभवमात्मनोऽप्यधिकतरगुणेन तरुणेनापि दूरीकृतोच्छृङ्खलविषयपिशाचावेशेन महात्मनामग्रगण्येन ब्रह्मण्येन पुण्येनेव मूर्तीभूतेनानुजन्मना वेङ्कोबनायकेन साकमुपागत-मग्रजत्वेन बहुमतं निरन्तरहृदयकमलनर्तितगोविन्दं गोविन्दनायक मवलोक्यात्यादरस्फीत-तरलतरतारकेणोद्गमतानन्दबाष्पान् लोचनयुगलेन विरचिताञ्जलिरार्य विज्ञापयति बालो रामेश्वरस्तवानुजन्माऽसाववधार्यतामिदमतरलहृदयेन तत्र भवता यथाद्याधूलीकेलिमय्यनन्य सुलभं सौहार्दमुन्मेषयामासिथ मयाप्येष न हि तवानुजो ममानुज एवेति क्षणमपि विरहमसहमाने-नाभिरक्षितो निकाममिष्टानुरूपं प्रेमातिरेकात्स्वयं करेणोपहृतैर्भोग्य-वस्तुभिराशैशवाद्वेङ्कोबनायको जाने च त्वां साक्षाद्धर्षीयां समेव प्रशासितारमपथप्रवृत्तानां कदाचिदस्मादृशामपि निरन्तरधर्मैकव्यवसित-मतिं प्रवर्तकं हितानामेव कृत्यानां तदिदं विज्ञाप्यते पुरैव मया जातुचिदस्मन्मनोनुवर्तनानिपुणैर्दुर्भरं राज्यतन्त्रं जनैरविदितराजनयै स्तद्भवाननुमन्यतां सचिव श्रीधुरां निर्वोढुमित्यषट्कर्णमावेदितं स्मरसि कथं तमेतमुदन्तमुद्दिश्यैवाधुनापि प्रार्थये यदि स भवान् स्वायत्तीकरोति

In Public domain. Digitization Muthulakshmi Research Academy

राष्ट्रं तदा निर्भरोऽस्म्यक्लिष्टश्च भविष्यति मदन्तरङ्गमहो नाविनीतेन नाजितेन्द्रियेण नावृद्धोपसेविना नाश्रुतविद्वद्वचनेन नास्थिरेण नाल्पबलेन नाल्पप्रज्ञेन नाधीरेण नादक्षिणेन नाविचक्षणेन नानुदारेण नाकरुणेन नानुचितज्ञेन नासहायेन नानास्वादितराजनयेन नानाद्दतबन्धुवर्गेण न मत्तेन नोन्मत्तेन नादूरदर्शिना नागुणदोषज्ञेन जनेन शक्यमुद्वोढुं महद्राज्यतन्त्रं तत्त्वां समग्रगुणनिधिं काङ्क्षति मन्त्रिणं चित्तवृत्ति-र्ममेत्यभिधाय वास्तवगुणेष्वपि स्वस्य कथितेष्वर्थवाद वचनानि जानानेव धीरोदात्ततया तानि राजोदितानि महाराज किमन्यैस्सहायैर्भवतस्तेज एव रक्षति न केवलं त्वदीयं राष्ट्रमपि तु भाग्यनगरराष्ट्रमखिलमपि मामुद्दिश्यैतावदुक्तिरपि चिरारूढसौहार्दाभिवृद्ध्यै केवलं कतमो नाम तव राष्ट्रमपि रक्षिता जनः अथापि यदाज्ञापयति महाराज स्तदविलम्बेना-चरणीयमेवास्माभिरस्त्वेवमिति तेन नायकेन प्रपञ्चितं निशम्य वचनं समक्षं सालावर्जङ्गभिख्यस्य मन्त्रीन्द्रस्य तद्वचनेनैव प्रदाय निजराष्ट्र-मन्त्रितां तस्मै तं च वनपर्तिपुरं प्रतिकृतप्रस्थानमतनोदतनुना समयेन ।।२।।

आकर्षन्महतीं चमूं रिपुजने शार्दूलविक्रीडितं
सन्तन्वन्निजदोर्बलेन ककुभं प्राचेतसीमुद्दिशन् ।
शश्वद्दोर्युगघट्टनोद्भटभटव्यूहोच्चलत्क्ष्वेलितै
रष्टावुच्चलयन् दिशस्स मुदिनाभिख्यां पुरीमभ्ययात् ।।१४।।

तावद्रामेश्वरेन्द्रो निजपुरमयते योद्धुमित्याशु चारै
रुक्तां श्रुत्वैव वाचं मुदिनपुरपतिर्नागरान्नागराजः ।

In Public domain. Digitization Muthulakshmi Research Academy

रक्षायै योधवर्यान्निजपुरमभितो भासुराणां गिरीणां
दर्यां दर्यां रिपूणामयनमभिदृढं योद्धुमुग्रान्न्ययुङ्क्त ॥१५॥

लोकालोकाचलेन्द्रः क्षितिमिव निवहस्सर्वतः पर्वता
नामिन्धेऽस्मत्पत्तनं तत्प्रतिभटबहिरीराजतेजोऽहिमांशोः ।
नात्रालोकप्रसक्तिर्भवति हि तदपि क्षोणिभृद्वर्गमध्ये
कश्चिन्मार्गोऽस्ति दुर्गो यदि तमभिगताश्शत्र वस्तत्र दण्ड्याः ॥१६॥

इति तदुदीर्णशासनवशाद्युगपन्मिलिताः
प्रतिगिरिकूटमात्तनलकोग्रकृपाणवराः ।
अथ दरदाश्शाकाश्च यवना बहिरीनृपति
प्रवरनिरीक्षणैककुतुकास्सुचिरं न्यवसन् ॥१७॥

तावदेव ॥

विद्युत्कौक्षेयकाढ्यो घनघनकवचस्स्फूर्जदुक्ष्वेलितोग्रः
प्रोच्चण्डैर्वारिधाराशरवरनिकरैश्छन्नकाष्ठान्तरालः।
ग्रीष्माभिख्यं विपक्षं निखिलभुवनसन्तापनं द्राग्विजिग्ये
प्रावृट्कालाख्ययोधो बहदुरुनृपतेस्सूचयन् जैत्रलीलाम् ॥१८॥

विचार्य विजयाजयौ समितिराजनीत्या नृपे
प्रतीक्ष्य च ऋतुत्रयं विरचितासने कुत्रचित् ।
प्रचण्डमरुदाकुलाम्बुधरवर्षधाराहता
विमुक्तगिरयो भटा निजनिजालयांस्तेऽभ्ययुः ॥१९॥

 In Public domain. Digitization Muthulakshmi Research Academy

शत्रूणां व्यसने प्रयाणमुचितं राज्ञामिति प्राक्तनैः
प्रोक्तं राजनयं विविच्य बहिरी रामेश्वरक्ष्मापतिः ।
वर्षाघातविलोडितेषु निलयान्यातेषु हित्वा गिरीन्
वैरिव्यूहभटेषु मोक्थलपुरात्सैन्यैः प्रतस्थे वृतः ॥२०॥

क्रेङ्कारैः काहलीनामथ पटुपटहव्यूहरोहन्निनादै
र्भाङ्कारैर्दुन्दुभीनां घनतरनिनदैर्हूणवाद्यावलीनाम् ।
टाङ्कारैर्घण्टिकानां समदकरटिनां बृंहितैर्घोटकानां
घीङ्कारैश्चापि भिन्दन्निखिलगिरिदरीस्तत्पुरं द्राग्रुरोध ॥२१॥

ये जातास्सालरूपा मुदिनपुरवरं सर्वतः पर्वतेन्द्रा
स्ते सर्वे वीररामेश्वरधरणिपतौ तत्र यातेऽभियोद्धुम् ।
अश्वैरुष्ट्रैर्गजैश्चोद्भटयवनभटैः पप्लवैर्व्याधयोधै
राक्रान्तास्तत्स्वरूपा इव बभुरभवन्नान्तरं द्व्यङ्गुलं वा ॥२२॥

सपदि बहिरीराजेन्द्रस्योद्भटोद्भटवाहिनी
प्रलयजलधौ मग्नं नूनं पुरं मुदिनाभिदम् ।
न खलु विमतिर्नागो जानात्यदो भुजविक्रमं
किमिव भविता पश्यामेत्यब्रुवन्नखिला जनाः ॥२३॥

अस्मच्छत्रोरभिख्यां दधति गतभयं हन्त पातालकोणे
नागा इत्यात्तरोषः किल सपदि स तान् दग्धुमौद्धत्यभारात् ।
खात्वागाधास्सुरङ्गा मुदिनपुरमहासालमूले शतघ्नीस्स-
न्धुक्ष्योद्ध्वस्तरूपां समतनुत पुरीं ताञ्च रामेश्वरेन्द्रः ॥२४॥

In Public domain. Digitization Muthulakshmi Research Academy

तावत्प्रोच्चण्डरोषक्षुभिततरहृदा नागराजेन नुन्ना
विक्रन्ता वीरपाणोत्कटमदलुलिताः प्रोल्लसद्वीरवादाः ।
निर्जग्मुः केऽपि सैन्याः प्रलयजलनिधिप्रेङ्खदुल्लोलमल्ल
क्रीडारम्भप्रचण्डध्वनिपटुपटहक्षुभ्यमाणारिसैन्याः ॥२५॥

युद्धोन्मत्तस्समन्तादपि निजपृतनास्स जयन् दुर्जयोऽसौ
स्फूर्जत्पर्जन्यगर्जा प्रतिभटनिनदैर्दन्तिभिः कुन्तिभिश्च ।
क्रोधोऽग्रो नागराजस्तदनु च बहिरीराजराजं विजेतुं
क्लप्तास्थस्तस्य सैन्यं कबलयितुमरींस्तर्जयन्निर्जगाम ॥२६॥

प्रलयसमयप्रोद्यच्चण्डांशुमण्डलगर्वहृ
त्प्रति भयमुखैर्युद्धक्षोण्यां कदाप्यपराङ्मुखैः ।
मुदिननगरीभूपालस्योद्भटोद्भटहुङ्कृते
र्बहदुरुविभोस्सैन्यं सैन्यैर्निगीर्णमिवाभवत् ॥२७॥

संवर्तोद्धूत्तजञ्झानिलवलयहतिक्षुभ्यमाणोन्नतोर्मि
श्रेणिप्रोच्चण्डनादोद्धतजलधिनिभे वीरयोस्तत्र सैन्ये ।
आन्योन्यं घट्ट्यमाने अविरलनलकप्रोद्गलद्रोलकौघै
रूक्षैः कौक्षेयकैरप्यतिभयजनके ते तदाऽजृम्भिषाताम् ॥२८॥

अश्वैरश्वा गजेन्द्रैरपि गजनिवहाः खड्गिभिः खाड्गिकेन्द्रा
उष्ट्रैरुष्ट्राश्शताङ्गैरपि रथनिवहा कुन्तिभिः कुन्तिनश्च ।
अन्योन्यं बद्धवैरास्समरभुवि भटा वीरयोस्तत्र राज्ञो
स्सेनायुग्मेऽति तिग्मायुधरणनिपुणा द्वन्द्वयुद्धं वितेनुः ॥२९॥

In Public domain. Digitization Muthulakshmi Research Academy

कचाकचि नखानखि प्रचुरसिंहनादोर्मिलं
तलातलि भुजाभुजि क्षुभितचित्तमत्युल्बणम् ।
गदागदि पदापदि प्रशिथिलोत्तमाङ्गं रणं
बभौ परमदारुणं जगति धुर्निरीक्षं क्षणम् ॥३०॥

अथ किल नागराजपृतनाभटबाहुबल
क्षुभितबला मुहूर्तमविलोक्य दिशो रभसात् ।
बत बत हा हता इति भयेन पलायिषत
प्रथनतलाद्भटास्सपदि ते वनपर्तिविभोः ॥३१॥

निजमथ बलं भग्नोद्विग्नं पलायनचातुरी
कृतमुखमयं दृष्ट्वा रुष्टो बहादुरुभूपतिः ।
प्रलयसमयप्रोद्यद्रुद्रावतारडम्बनां
सपदि रचयन् सैन्यैरन्यैरवर्तत तन्मुखम् ॥३२॥

भग्नायामपि रिपुयूथपैर्ध्वजिन्यां निर्भीको रिपुबलमभ्यगात् स राजा।
धूम्यायां प्रबल समीरणैर्धुतायामप्यग्निर्ग्रसति दवं विशङ्कमेव ॥३३॥

क्रोधारक्तान्तनेत्रस्सपदि रिपुचमूमध्यमभ्येत्य राजा
दोर्दण्डोदग्रतेजः प्रसरणशलभान् वैरिणस्तान् वितन्वन् ।
आरादेकैकवारप्रचलदसिलताघाततोऽपीपतद्राङ्मूर्ध्नां
मालास्सहस्त्रादनवरमसुहृत्सैनिकानां किमन्यत् ॥३४॥

आयातान् रिपुवीरवर्यनलकात्तप्तानयोगोलकान्
प्रत्याहत्य करेण वीरनिवहांस्तैरेव तान्निघ्नता ।

In Public domain. Digitization Muthulakshmi Research Academy

श्रीरामेश्वरराजसैन्यपतिना प्रोद्दामधाम्नार्थिता
सेना तत्पुरुषं विनैकमपि सा क्लीबत्वमापाद्भुतम् ॥३५॥

श्रीमद्रामेश्वरेन्द्रक्षितिभृदसिलताखण्डितोट्टङ्कितं द्रा-
ग्व्योमन्युद्वीक्ष्य वक्त्रं विमलमसुहृदः कस्यचिद्देवसुभ्रूः ।
काचित्पद्मभ्रमात्तत्कृतरभसमुपादाय नम्राननाब्जा
घ्रातुं तस्मिंश्च नासां दशति बत बतेत्याः पलायिष्ट दूरात् ॥३६॥

असुहृदभिदां बिभ्रत्येते मदोत्कटचेष्टिता
इति कृतबहूच्चण्डक्रोधारुणारुणदृङ्नृपः।
शतमखकरप्रोद्यद्दिव्यायुधोपमितासिरा
ट्ट्रतिहतिभराद्वेगान्नागान् सहस्रमपातयत् ॥३७॥

चतुरङ्गयुतोऽपि नृपश्चतुरस्स तुरङ्गराजदत्तमनाः ।
अतनुत शताङ्गशतकान्यतनुतराण्यहह तान्यनङ्गानि ॥३८॥

पूर्वापरप्रथममध्यसमानवीरान्
पूर्वं निपात्य स तु लौकिकविग्रहेऽस्मिन् ।
पश्चादथैकपदमप्यनिधाय रेजे
व्यापारयन्प्रचुरपाणिनिरूढशास्त्रम् ॥३९॥

भिन्दन् सैन्धवपङ्क्तीश्शतशः कृतशस्त्रलघुतरभ्रमणः।
प्राचीकशदहितबले विजयाधिक्यं प्रवीरमूर्धन्यः ॥४०॥

सेनां स्वां निर्दहन्तं दवमिव बहिरी राजरामेश्वरं तं
शान्तौजस्कं विधातुं जलधय इव तेऽभ्युद्ययुर्वैरिवर्गाः ।

In Public domain. Digitization Muthulakshmi Research Academy

सोऽपि श्रीमान्महोग्रप्रतिघभरितधीर्हन्त कल्पान्तदृप्य
त्पारावारानि वैतानकबलयदलं प्रोद्भटौर्वाग्निलीलः ॥४१॥

रामेश्वरक्षितिपमन्दरलोडितात्मसेनार्णवोत्थबहुभङ्गविषार्ततेजाः।
भूत्वा क्षणं जयसुधाजननाय कुर्वन्यत्नानमुं परिववार स नागराजः॥४२॥

अभिमुखमापतन्तमतिभीकरवाजिचमू-
कवचितमुद्भटोद्भटघनस्तनितध्वनितम् ।
मुदिनपुराधिनाथमथ वीक्ष्य दधत्कुतुकं
सपदि तमभ्यगात्स बहिरीधरणीन्द्रमणिः ॥४३॥

पश्चादाधावमानान्मुदिनपुरपतेर्दुर्दमान्वीक्ष्य सैन्यान्
वेगात्सन्धुक्ष्यमाणादथ निजनलकाद्गोलकौघौर्गलद्भिः ।
श्रीमद्रामेश्वरेण प्रथनभुवि समुट्टङ्किताश्शीर्षकोट्यो
दीप्ताश्मन्ताग्रकं दुस्फुटितपटपटत्सर्वपौपम्यमैषुः ॥४४॥

बहिरी नृपालमहरीश्वरप्रभं स्फुरितेक्षणस्स पुरतो निरीक्ष्य तम् ।
मुदिनाधिपोऽथ कदनात्तकैतुको वचनं महोग्ररचनं रुषाब्रवीत् ॥४५॥

यदि नाम भाग्यनगराधिनायकप्रतिकूलतामहमकार्षमुद्भटाम् ।
ननु का क्षतिस्तव यथागतं ततः प्रतियाहि साधु मयि मञ्जुभाषिणि ॥४६॥

गदितमिति निशम्य पुष्पिताग्रोद्भटतररोषलतावृतान्तरङ्गः।
बहदुरुबलवन्त राजराजो मुदिनपुरिनरपालमभ्यचष्ट ॥४७॥

नासदौंलावनीन्द्रोत्तमरचितमहाशासनैकान्तरङ्ग
स्सालवर्जङ्गभिख्यस्सचिवकुलमणिर्माद्दशान् शास्ति भूपान् ।

In Public domain. Digitization Muthulakshmi Research Academy

तद्दोर्दण्डाभिगुप्ते रचितवसतिभि राजभिर्देशमध्ये
तस्याज्ञा मूर्ध्नि मान्या तदिह विपथगांस्त्वादृशान् शिक्षयामः ॥४८॥

उदितमिदं निशम्य मुदिनक्षितिराडवद-
द्यदि भुजशौर्यदुर्विधमिदं नरपालकुलम्।
भवदुदिता च भाग्यनगरेन्द्रभुजिष्यत या
स्थिति रुचिता धनं क्षितिभृतां भुजतेज इति ॥४९॥

निशम्य तदिदं वचस्स वनपर्तिपृथ्वीपति
र्जगाद किमरे कियांस्तव भुजप्रतापो भवेत् ।
क्व भाग्यनगरेश्वरस्सकलराजनीराजितः
क्व चैष मशको भवानिह विकत्थते स्वेच्छया ॥५०॥

अहं किल भवादृशप्रचुरदुर्विनीतावली
विनिग्रहकृते महासचिवशेखराज्ञां वहन् ।
चरामि वसुधामिमां यदि तवास्ति शौर्यं
महत्तदेतदुपदर्शय क्व भवितासि रुष्टे मयि ॥५१॥

इति रामेश्वरनरपतिवागङ्कुशवीक्षतस्स नागविभुः ।
मदविलुलितान्तरङ्गो वदति स्म वचः प्रतापगम्भीरम् ॥५२॥

व्यर्थं किन्नु विकत्थसेऽद्य सुमहाश्वव्यूहमध्यङ्गत
स्त्वां सञ्चर्वितुमागतोऽस्मि समरे सोऽयं कुलीनाग्रणीः ।
तादृक्षास्सुगुणा रणे सततं साराश्च मेयाश्च मे
पूज्योऽहं पुरुषेश्वरैरिह सदा न स्यां कथं त्वादृशैः ॥५३॥

In Public domain. Digitization Muthulakshmi Research Academy

वाचं तां विनिशम्य राजबहिरी रामेश्वरक्ष्मापति
र्हासोद्दीपनमन्यदर्थमचिरादुन्मेषयन्तीं गिरम् ।
तद्वाक्योचित माददे कथयितुं सुस्मेरवक्त्राम्बुज
स्तं व्याजस्तुतिफक्किकाभिरहितं नागं तदाधिक्षिपन् ॥५४॥

अन्यत्किं कथनीयमस्ति सुमहाश्वव्यूहमध्यङ्गतो
मां सञ्चर्वसि चेदिदं तव परं कौलेयकस्योचितम् ।
आसीस्तादृशसारमेयगुणभागीदृग्भवान् मादृशैः
पूज्यः किं पुरुषेश्वरैरपि सदा शुन्यायतः पूज्यसे ॥५५॥

निशम्य तद्वहदुरुवीरभाषितं तदुत्तरं शुनकपदार्थगर्भितम् ।
अहो बताद्भुतमतिवैखरी विभोरिति स्फुटं परिजहसुर्भटोत्तमाः ॥५६॥

विरचितपरीहासस्तेनोर्मिलप्रतिघार्णव
स्समुदिनपुरीनाथो वाक्यं जगाद पुनस्तराम् ।
नियतमितरान् भूपम्मन्यानिवैनमवेहि मा
प्रतिभट चमूं नागेन्द्रोऽयं विलोडयिता क्षणात् ॥५७॥

तदिदमुदितं श्रुत्वा राजा पुनस्सरुषागदी
द्यदि च स भवान्नागाधीशो विलोडयते चमूम् ।
कथमयमरे भूभृत्सिंहोऽभवं तमुपेक्षते
गमयति रुषा पातालं वा स्वनाम समस्थलम् ॥५८॥

श्रुत्वा वचस्तृणायैव मत्वा तं वीरशेखरम् ।
अगाधधीरिदं वाक्यं जगाद मुदिनाधिपः ॥५९॥

In Public domain. Digitization Muthulakshmi Research Academy

प्रथनाङ्गणेऽद्वितीयाक्षरराजसभाग्रगण्यनामासौ ।
प्रचिकटयिषति पराक्रममिह भवदग्रेऽतिखरपराक्रमभाक् ॥६०॥

श्रुत्वा वनपर्तिनृपस्तदेवपद्यं खरार्थकं रचयन् ।
प्रत्युत्तरमददादिदमुचितं खरविक्रमस्य भवत इति ॥६१॥

तावत्क्रोधारुणाक्षौ प्रलयजलधरप्रौढगम्भीरनादौ
तावन्योन्योज्जिगीषाकृतघनयतनौदन्तदष्टोष्ठभागौ ।
दूरोन्नीतप्रचण्डभ्रुकुटिकटुनटत्फालभागौ सरागा
वश्रान्तौ सप्तरात्रं प्रथनमनशनौ व्यादधाते स्म रौद्रम् ॥६२॥

गद्यम् ॥

तदनु कदनाङ्गणविजृम्भितगम्भीररौद्रतरोन्निद्ररामेश्वरराज वीर-दोर्दण्डोच्चण्डहिण्डमानाखण्डप्रतापकल्पान्तचण्डभानुमण्डलपरिप्लुष्ट-निजभुजशौर्यातिरेकता प्राप्ततापातिभारप्रशमनार्थसर्वाङ्गीणप्रस्वेद-झरीमध्यनिमज्जनाधिगतजडिमातिशयस्तब्ध इवानुन्मिषितेति कर्तव्यता विचारेक्षणादेव विमुच्य रणरङ्गं पलायमाने साध्वसातिरेक कुटिलतर-पदक्रमतया प्रकटयतीव निजनागराजतां मुदिनपुरनाथे कृत्तकर्णानां लूननासिकानां छिन्नोर्वष्ठीवानां विवृक्णपदष्ठीवानामुट्टङ्किताक्षिभ्रुवाणां दातहस्तानां खण्डितमण्डलाग्राणां विदारितोरस्कानां विभिन्नकङ्कटकाना-मेकहस्तानामेकपादानामेककर्णानामेकनेत्राणां निश्शेषिताङ्गुलीका-नामुन्मूलितशीर्षण्यानामाक्षिप्तहाराणां दूरीकृताङ्गदानां चूर्णितकुण्डलानां पाटितखेटकानां पातितदन्तानां शिथिलितमणिबन्धानां भेदितमुद्गराणां

In Public domain. Digitization Muthulakshmi Research Academy

क्षोदीकृतरथानामेकपार्श्वविधुराणामर्धनासिकाहीनानां फालमात्रफालितानामानाभ्यवशेषितानां हा नाथेति क्रोशतां हा हतास्स्म इति रुदतां नलकघटिकाहतिचालिनीयमानाङ्गानां नवरुधिर कषायरञ्जितचीनाम्बरतया आगृहीत शस्त्रसन्यासानामिव भासमानानां धावमानानां घूर्णमानानां तिष्ठतां पततां स्खलतां च तदीयसेनाजनानां न कश्चिदपि शरणमिति यावन्न दृश्यते तावदेवारोहद्भिः प्राकारानारुजद्भिर्गोपुराणि पातयद्भिर्भवनानि विलोडयद्भिर्निखिलविपणीर्निजसेनायोधैरपहारिततदीय सर्वस्वः स्ववशे विधायतां पुरीं शत्रुपदान्वेषणरचितबहुतररभसस्सेनया परिमितया पुरस्कृत्य सेनाधिनाथं गहनाद्गहनं गिरेर्गिरिं कन्दरात्कन्दरं गुल्माद्गुल्मं देशाद्देशं नगरान्नगरं प्रविश्य प्रविश्य विचिन्वंस्तत इतस्तं नागराजं तावद्दुरुद्धरविक्रमाभिवृद्धकिरातसप्तशतकभुजार्गलाभिगुप्तामल्लूरुनामां पल्लीं निकषा दुर्गमसरण्यामरण्यान्यामाश्रित्य तान् किरातान्निलीनं निशम्य तं प्राप्य च तां पल्लीमल्लूरभिख्यामभिषेणयतस्तान् समुन्नतगिरिदुर्गाग्रभागाद्भिल्लमल्लानतुल्यपराक्रमान् पुरा किल विक्रान्ताग्रगण्येन बालचन्द्रनाम्नापि मासत्रितयमहर्दिवं नियुद्ध्याप्यवशीकृतान् गृहीतविविधायुधान्निरीक्ष्य रामेश्वरोऽहं यदि वश्श्रोत्रपदवीमधिरूढस्तर्हि विविच्य यदि शक्तिर्योद्धव्यं भवद्भिर्नागनामाधमसहायैरिति वदंस्तद्वचननिशमनानुपदमेव राहुप्रतिहतैरिव पिशाचदूषितैरिव तत्तेजोदर्शनतद्वचश्श्रवणमात्रस्यन्दमानशौर्यमदैर्हहेति वदद्भिर्भूतलविन्यस्तसर्वशस्त्रैश्शीर्षण्यकोटिमणिमरीचिचुम्बितभूतलैस्तैरेव भिल्लैः किङ्करास्स्मस्तव वयं सर्वे क्व नु ते जगद्विदितश्चण्डभानुरिव पराक्रमभूमा क्व चास्माकं पलालासारं खद्योतसच्छात्रं शौर्यमित्यभिष्टुतो मा भैष्टेति

In Public domain. Digitization Muthulakshmi Research Academy

तेभ्यः प्रदाय वरमागृहीततदर्पितोपहारस्तदुदन्तनिशमनमात्रादेव हा हतोऽस्म्यत्राप्यागतो राजसिंह इत्यविलोकमानो निम्नमुन्नतं वा प्रदेशमनालोच्य कण्टकानविविच्य प्रस्तरान् अविमृश्य महाप्रवाहान् सिंहाभिद्रुत इव मृगपाशो धावं धावमन्यामरण्यानीमतिदुर्गामाश्रितवति तस्मिन् मुदिनपुरेश्वरे जीवतु कञ्चित्कालमिति विसृज्य दयया तावत्सालावर्जङ्गभिख्यमन्त्रीन्द्राज्ञया निगृह्य राजपुराधिनाथं कञ्चन तत्साहायकप्रवृत्तं भूपालपाशं प्रत्यर्प्य तस्मै भाग्यनगरेन्द्रसचिववराय पुनरपि तदाज्ञया मुदिनपुराधिनाथं तमेव मृगयमाणः कस्मिंश्चिद्गिरिविवरे तनुभृतां दुर्गमेदरदशकयवनप्रायैरुद्दामायुधसहस्रभीषणैर्भटैरभिरक्षितं निरीक्ष्य तं निर्भयेन हृदयेन किमरे विकत्थ्य यथेष्टं पलायितोऽसि क्व नु विमोक्ष्यसे विप्रियमीदृशं विरचय्य भूपालसहस्रकिरीटकोटिघटितमणि-मरीचिकदम्बचुम्बितशासनस्य भाग्यनगरेन्द्रमन्त्रिवर्यस्य सुगृहीतनाम्न-स्सालावर्ज्यङ्गभिख्यस्यापीति वदन् प्रवर्तितायोधनो मुहूर्तमात्रं यथेष्टं धावमानेषु निजकृपाणधारानिकृत्तनासोष्ठकर्णास्यबाहुजानुकटीतटेषु तदीयभटेषु कियदस्त्यमुष्यान्तरङ्गे शौर्यमिति द्रष्टुं प्रहितेन निजभुज-प्रतापशाबकेनेव तत्क्षणोद्दीपितनलकमुखविनिर्गतोत्तप्तकालायसगुडकेन विभिद्य तस्य हृदयं नागराजमपि तं प्रापय्योर्ध्वलोकं प्रकाशयन् गरुडांशजाततामात्मनो महात्मभिश्श्लाघितस्तत्रत्यैर्विजयदुन्दुभिभाङ्कार-परिपूरितदशदिशान्तरालस्समुन्मूल्य मध्येमार्गं भाग्यनगरेन्द्रप्रतिकूल-भूपालाक्रान्तां पुरीं लोकायपल्लीति प्रथितां यमलोकाय तत्र सम्प्रेष्य रणरङ्गे कांश्चन वीरान् विरचय्य तांन्निजवशे अन्तरान्तरापरश्शतानेवं विधान् दुर्दान्तान् भूकान्तान्विजित्य प्रपेदे भाग्यनगरीं गरीयसाहर्षेण विरचितविजयवर्षेण ।।३।।

In Public domain. Digitization Muthulakshmi Research Academy

पद्यम् ॥

सालावर्जङ्गभिख्याञ्चितसचिववरास्थानसीमां समेत्य
श्रीमान्रामेश्वरेन्द्रो मुदिनपुरपतेर्भङ्गमावेद्य सर्वम् ।
धूतां लोकायपल्लीमपि मुदितहृदा तेन राज्ञां सहस्रे
नेत्रैर्निष्पक्षपातैर्मिषति सकुतुकं प्राज्यमश्लाघि राजा ॥६३॥

वीरस्त्वं बुद्धिमांस्त्वं नृपकुलतिलकस्त्वं कृतज्ञस्त्वमेव
श्रीमांस्त्वं त्वं यशस्वी त्वमुचितगुणविद्भर्तृभक्तस्त्वमेव ।
नान्यस्त्वत्तो गुणाढ्यो नरपतिनिवहेष्वेषु कश्चित्किमन्य-
द्ब्रूमो निष्पक्षपातं वयमपि च सदाशास्महेऽदोश्श्रियं ते ॥६४॥

देशा निष्प्रतिकूलराजनिवहास्त्वद्विक्रमप्रक्रमा
त्पुत्रादप्यधिकं सदा वहति मे त्वय्यादरं मानसम् ।
अन्यत्किं कथनीयमेनमिह नः प्रीतिं कुरुष्वादरा
दीदृक्षे ध्वजिनीपतौ ननु कुतो हस्तेन नृत्येज्जयः ॥६५॥

गदितं निशम्य तदिदं नृपतिः प्रमिताक्षरं सममताकलितम् ।
रचिताञ्जलिस्समुचितां तमिमङ्गिरमाह साधु परमाद्विनयात् ॥६६॥

मादृक्षाणां सहस्राण्यनिशमपि तव प्रीतये प्राभृतानि
प्राज्यान्यानीय मूर्ध्ना भवदतिललितापाङ्गमन्वीक्ष्य शश्वत् ।
तिष्ठन्ति प्राङ्गणे ते बत मम दयसे त्वं विचित्रं तदेत
ज्जीवं जीवः क्व चन्द्रः क्व च घनकरुणास्संश्रितौघे महान्तः॥६७॥

त्वद्दोर्दण्डनिरङ्कुशोज्वलमहातेजोऽशुमालिस्फु
रत्तत्तादृक्किरणावलीषु कतमो नामायमेकः करः ।

In Public domain. Digitization Muthulakshmi Research Academy

माद्दक्षक्षितिपालविक्रमभर्तस्वत्तेजसैवाखिला
निर्धूता मुदिनेश्वरादिरिपुभूपालाश्च किं जल्पितैः ॥६८॥

इति वचनं वदन्तममुमाह स मन्त्रिवरो
बहुपरितुष्टमानहृदयं मम ते वचसा ।
नगरमुपेत्य नैजमथ तत्र च राज्यभरं
कलय यदा स्मरामि समुपेहि तदेति मुदा ॥६९॥

इत्थं सादरचित्तभाग्यनगरीमन्त्रीन्द्रसम्मानित
श्श्रीरामेश्वरराजशेखरमणिस्तत्सैन्यनाथो मुदा ।
श्रीराजाबहिरीबहादुरुवर श्रीमन् जयेत्युच्चल
द्वाहाग्रैरथ वन्दिभिस्स्तुतगुणस्स्वीयां पुरीमभ्यगात् ॥७०॥

रामेश्वरविजयेऽस्मिन्नष्टममुल्लासमतिमुदाचष्ट ।
प्रत्यग्रदुर्गकृष्णो मदकविकरिगण्डभेरुण्डः ॥

इति श्रीमच्छ्रीशैल प्रत्यग्र दुर्गतातार्यवर्यनन्दनस्य
कृष्णकविसार्वभौमस्य कृतिषु रामेश्वरविजयाख्ये चम्पूप्रबन्धे
सैनापत्योल्लासोऽष्टमः ॥

श्रीमते श्रीनिवासाय परब्रह्मणे नमः ॥

श्रीरस्तु ॥ मङ्गलानि भवन्तु श्रियै नमः ॥

रामेश्वरविजये - ८ - सैनापत्योल्लासः ॥

॥समाप्तः॥

In Public domain. Digitization Muthulakshmi Research Academy

श्रीहयग्रीवाय नमः ।

रामेश्वरविजये - ९ - अध्वरोल्लासः

गद्यम् ॥

तावदेव राजेन्द्राज्ञानुरूपविचाराचरणैकतानचित्तोऽप्रमत्तो गोविन्दनायको विमृशन् वनपर्तिराष्ट्रकृत्यभारं निजनन्दनस्य स्वानुरूपगुणस्तोमसान्द्रस्य रामचन्द्रनायकस्य प्रवर्तयन् परिणयोत्सवं राजानमानेतुमेव विरचितकुतूहलस्तावन्निशम्य च समुपागतं रामेश्वरेन्द्रं निर्भरसम्मदकवचितान्तरङ्गः पुरस्कृत्य मनीषिनिवहान् वेङ्कोबनायकञ्च साकं सेनया प्रत्युद्गत्य सुदूरं तत्र च कुत्रचिन्निरीक्ष्य वल्गु वल्गद्भिरदभ्रशुभ्र वर्णैरतितूर्णतापूर्णैरुत्तम्भितविचित्रोद्दण्डकेतनदण्डाग्रचलाचल नानावर्ण-पताकिकाशतसहस्रशबलितगगनपथसादिनिवहढौकितैरन्तरो जायमानेन तेजोविशेषेण गर्वद्भिरर्वद्भिर्बहुसहस्रैः परिगतं क्षीरोदधिस्थारोर्मिधारोदित-मिवैरावतं धवलतरशीर्षण्यतनुत्रप्रमुखपरिष्कारं राजाधिराजं तमालिङ्गित-स्तेन सबहुमानमापृष्टः कुशलं स्वयं च विरचित यथोचितयोगक्षेमानु-योगाचारः कच्चिन्निष्प्रत्यूहधर्माणो देशाः कच्चित्सुरक्षिता भूसुराः कच्चिच्छ्रूयन्ते सन्ततं नगरेषु वेदशास्त्रघोषाः कच्चिद्वितीर्यन्ते यथाकालं वेतनान्यधिकृतानां कच्चिदादीयन्ते च यथास्कन्धं राष्ट्रियजनदेयाः कराः कच्चिदण्ड्यन्ते यथायोगं साहसिकाः कच्चित्प्रवर्त्यन्ते यथायोग्यं श्रीरङ्गपुरराजनगरादिसमेधमानदेवतामहोत्सवाः कच्चिद्दीयन्ते यथार्हं दक्षिणा विप्राणां कच्चिद्बहुमान्यन्ते सद्भावन्तस्तत्तद्देशादागताः

In Public domain. Digitization Muthulakshmi Research Academy

कच्चित्प्रशस्यसे दिक्षु दिक्षु धर्मात्मा वनपर्तिराजमन्त्रीति विद्वद्भिः कच्चिच्छ्लाघ्यसे बान्धवैः कच्चिदाद्रियसे मित्रैः कच्चित् कत्थ्यसे न चारणैर्न मद्यपैर्न धूर्तैर्न वेश्यालोलैर्न वैहासिकैर्वा कच्चित्प्रतिष्ठिता यथाप्रदेशं गुल्मे गुल्मे धीराः पुरुषाः कच्चिन्न बाध्यते रन्ध्रान्वेषिभिस्सा-मन्तै राष्ट्रं कच्चित्पूज्यसेऽहमिव त्वमपि सर्वैर्जनैः किं बहुनाविदित-निखिल राजधर्मासि त्वं निसर्गत एव किमनुयोग प्रसक्त्यापीदमन्यदार्य मम ज्यायानेवासि न खल्वन्यस्त्वं यः कश्चित्प्रवर्तन्ते हि प्रायोऽनुजानां श्रेयस्येव ज्यायांसो दयालुशीला धर्मज्ञास्तदलमेव विचारेण किमपि प्रष्टव्यमित्येव पृच्छाम्यपि चैष वेङ्कोबनायको विराजते रूपवतामग्रगण्यो रूपानुरूपमेधाविशेषो मेधानुरूपश्रुतश्श्रुतानुरूपाचारः आचारानुरूपकरुणः करुणानुरूपस्नेहः स्नेहानुरूपवचनः वचनानुरूपरचनः रचनानुरूप फलकल्पनकृतमुखस्सुस्मितमुखो भवतस्साहायकमारचयति तेषु तेषु विचारेषु किमन्यद्दुस्साधं भवत इत्यभिहितं राज्ञा निशम्य वचनं महाराज निखिलमपि भवतस्तेजोविशेषेणैव भविष्यति राज्यकृत्यं केऽमी वयमपि गोपायितुं भवद्भुजार्गलाभिरक्षितं राष्ट्रं महोदारे धर्मज्ञे धीरे शूरे गभीरे चतुरे गुणग्रहणैकताने दयालौ राजति महाराजे कथमपथे प्रवर्तेरन् प्रजाः किं पल्लवितेन दिष्ट्या विजितो दुर्दान्तो दुर्जयो द्वादशवत्सरान् विरचितभाग्यनगरेन्द्रप्रातिकुल्यो महाराजेन मुदिनपुरपतिराशास्महे च महाराजतेजोभिवृद्ध्यै निरन्तरं साम्प्रतमहमेवायुष्मतः परिणयोत्सवहेतो-रानेतुं महाराजं कुतूहलमुदञ्चयामि यावत्तावत्कनकविचिचीषयोत्थितस्य पुरतस्सुमेरुगिरिणेव महाराजेनैवस्थितमस्मन्नयनपथे अहो बत प्रेमातिशयस्य कृत्यमखिलमेतदीदृशे कल्याणसमये समुपस्थिते यदतिवेल

In Public domain. Digitization Muthulakshmi Research Academy

रभसेन स्वयमागतं महाराजेनेति नैवमन्यस्मिन्कस्मिंश्चिदपि राजनि सौलभ्यमहो बत सुकृतमेवैतत्प्रजानां नान्यत्किमपीत्यभिधाय सविनयं तावत्परिणयोत्सवार्थसमागतनानादेशनरपतिबलकलकलबधिरीकृत त्रिभुवनां तत्र तत्र सङ्घीभवद्भूसुरानेक सहस्रभासुरा मुत्तम्भितशातकुम्भ सम्भृतस्तम्भाग्र प्रेङ्खदुद्दाममङ्गलवैजयन्तीसहस्रविसृमरमन्दपवनसेवन-सुखितरतिरभसखिन्नदिविषन्मिथुनशतसहस्राम्। प्रशस्तकस्तूरी घनसार-सुरभिलजलसिक्तविकीर्णनानावर्णकुसुमसमुदयशबलितरथ्यां वनपर्ति-राजधानीमानाय्य इतश्चेतश्च ससम्भ्रमोच्चलित मदबन्धुर सिन्धुरबृन्दसुभगं भावुकप्रान्तैरितरेतरसम्मर्द शिथिलीभवत्पिञ्छातपत्रमण्डलदुस्थैः आदर-प्रसारितभुजध्वजिनीपतिनिर्दिश्यमान नामधेयैस्सम्मुखीनैरत्यादरावनम्र-कोटीरकोटीघटितनूत्नरत्नप्रभाकिम्मीरितभूमिभागैर्भूमिपाल कुमारैरन्यै-श्चान्यैश्च सादरं प्रशस्यमानं रामेश्वरभूमीश्वरं तं प्रवेश्य च सरभस-मङ्गलतूर्यतालवीणावेणुमृदङ्गझणञ्झणङ्कारसङ्कलितं निजनिकेतनं परिजन-सरभससज्जीकृते निषद्य च भद्रासने क्षणमात्रमिव विस्मृतस्वस्वकृत्ये-ष्वाश्चर्यसुदूरविस्फारितलोचनेषु वाचंयमेषु चित्रार्पितेष्विव निष्पन्देषु जनेषु सर्वेषु विलोकमानेषु सादरमाबालवृद्धमेकैकशो निर्दिश्य निर्दिश्य नामधेयानि कुशलं पृच्छन्तं विदुषां निकुरुम्बाणि निर्वृत्ते च परिणयमहोत्सवे सम्मान्य तं लोकोत्तरैर्वस्तुभिरवतार्य रामसागरोपवन-प्रान्तसज्जीकृते पटमण्डपे वितीर्य च स्वच्छन्दं विप्रेभ्यो यथामर्यादं राङ्कवपट्टवसनकनकहाररूप्यादीनि प्रतोष्य विविधान्नदानैर्गोपायति स्म तदाज्ञया यथापुरं वनपर्तिराष्ट्रम् ॥१॥

In Public domain. Digitization Muthulakshmi Research Academy

पद्यम् ॥

रामेश्वरशासनतो रक्षत्यपि नीतिमेदुरे तस्मिन् ।
गोविन्दनायकमणावनीतिराष्ट्रं बभूव चित्रमिदम् ॥१॥

तत्रान्तरे ॥

काणादाध्यात्मविद्याजलधिपरतटीप्राप्तिजङ्घालमेधा
त्सुब्बाशास्त्रिप्रवीणाद्गुणमणिजलधिश्श्रीमदद्वैतभाष्यम्
हर्षोत्कर्षादधीयन् स निगममकुटीचिन्तनैकान्तचित्तो
वित्तैस्सम्पूज्य तं च प्रमदमकलयन्नायकस्यानुजन्मा ॥२॥

मन्दप्रज्ञसुदुर्ग्रहार्थमचिरात्तत्वैकतानाश्रयं
श्रीमद्भागवतं यथावदखिलं मेधाविनामग्रणीः ।
हस्तान्तामलकायितं विरचयन् गीतादिभाष्याण्यपि
स्वायत्तानि विधाय चोपनिषदामर्थेषु चित्तं न्यधात् ॥३॥

आबाल्यादुचितास्वपि भ्रमजुषो यासु प्रवीणा अपि
श्रुत्वैवावगता विधाय स तु ताश्शास्त्रार्थकोटीरलम् ।
पूर्णानन्दमुपेयिवानिति परं नैतद्विचित्रायते
यं ह्यात्यन्तिकशैशवे समनुजग्राह स्वयं भारती ॥४॥

यद्यत्पश्यति शास्त्रतत्त्वमनघं यद्यच्छृणोति प्रियं
तत्तत्तक्षणमेव तस्य हृदये निश्शङ्कमाबिम्बितम्।
नैवाहो मलिनं बभूव समयात्तद्विप्रकृष्टादपि
श्रीवेङ्कोबसमाख्यनायकमणेर्धीमत्त्वमन्यादृशम् ॥५॥

In Public domain. Digitization Muthulakshmi Research Academy

ज्ञात्वायं कञ्चिदर्थं लघुमपि मनुजास्स्युर्दुराराधरूपा
नासीदुत्सिक्तचित्तस्स तु सकलकलासारवेत्तापि धीमान् ।
एकं प्राप्यैव रत्नं भुवि बहुभयदा हन्त दर्वीकरेन्द्रा
रत्नानामाकरोऽपि क्वचिदपि जलधिः किन्नु वात्येति वेलाम् ॥६॥

सुविचारकतकचूर्णैः पङ्कमधःकृत्य निखिलमपि च रसम् ।
निर्मलमलभत नितरां निजमानससीम्नि नायकस्सोऽयम् ॥७॥

न कदाप्यमुष्य तादृशतत्त्वविदग्रेसरस्य धीरस्य ।
परिभवति चित्तवृत्तिं तमश्शरन्निर्मलामिव ज्योत्स्नाम् ॥८॥

तत्त्वविदामग्रसरस्सत्वनिधिः परममर्थमनुनिमिषम् ।
कपिल इव देवहूत्यै राधाम्बायै न्यवेदयन्मात्रे ॥९॥

गद्यम् ॥

अत्रान्तरे निरन्तरसन्तोषसन्ततिदन्तुरितान्तरङ्गः परिपालयन् लीलया धरणीमण्डलं तरणीयमानतेजा राजा निजाभ्यर्थनयाभ्यर्ण-भुवमभ्यागतं श्रीमत्तोताद्रिविष्णुचित्तरामानुजयतीन्द्रसम्प्राप्ततुर्याश्रमं श्रीरामानुजयतीन्द्रं निजाचार्यं सुचर्यं प्रत्युद्गत्य सुदूरं सबहुमानं महता वैभवेन समानीय निजनगरीं तदनुगृहीतसुदर्शनपाञ्चजन्यमन्त्रोपदेश-नामधेयतया प्रख्यापितभगवद्दास्यां निजानुरूपरूपगुण रत्नरत्नाकरायमाणां धर्मपत्नीं यशोभराधरीकृतमृगाङ्कबिम्बां शङ्कराम्बामभिनन्द्याभिवन्द्याचार्यवर्यं परिपूज्य चाचार्यभोगीनै राजभोगीणैश्च लोकोत्तरैर्वस्तुभिः परमभक्तिमे-दुरितान्तरङ्गो विश्वजनीनकीर्ती रामेश्वर चक्रवर्ती प्रस्थाप्य तमादरादात्म-

In Public domain. Digitization Muthulakshmi Research Academy

नीनं सैनापत्यमनुभवन् भाग्यनगरेन्द्रस्य कतिचनदिनान्यधिवसंस्तदाज्ञया मोकल्थाभिधानां सेनानिवेशस्थलीं तावदेव द्वीपान्तरादात्मविक्रमनि-शमनपरितुष्टहृदयया पुत्रिकाधर्मप्राप्तसाम्राज्यया हूणसार्वभौम्या महाराज्ञीजनाग्रगण्ययानेकराजाधिराज शिरोमणिमालालालितशासनया तत्तादृशरणरङ्गेषु सहायमाशास्महे विक्रान्तमूर्धन्य कदाचिद्भवन्तमिति लेखापूर्वकं प्रेषितं जगदेकवीरोचितमधरीकृतशतकोटिचाकचक्यं थलथलितदशदिशावकाशं सान्द्रभासं चन्द्रहासमन्यान्यप्येवंविधानि बहुतराणि पारितोषिकाणि भाग्यनगरेन्द्रसदृशमितरनृपालैरधश्शीर्षमपि कृततपोभिरसुलभानि तत्प्रहितानि मण्डलेन्द्रमन्त्रीन्द्रप्रदत्तान्यात्मने सम्मान्य पक्ष्मलयन्विपक्षमहीक्षितां मात्सर्यं तादृशेन हूणसार्वभौमी-प्रसारितेन बहुमानेन प्रवर्तयन्निजविषयान्तराले श्रीरङ्गनाथराजनगर-रामकृष्णादिदेवदिव्योत्सवा ननु वत्सरं वितरन् यथेष्टं विदुषां विविधवृत्तीस्सम्मानयन्नानादेशेभ्यस्समागतान् कवीन्द्रान्नाङ्कवादिभिर्वा-दान्यकेन गाम्भीर्येण चातुर्येण स्थैर्येण दाक्षिण्येन औचित्येन नयवेत्तृत्वेन शौर्येण धैर्येण कतमेनापि वै कतमेन गुणेनापि नास्य सधर्माहमिति धरणीपतिः कश्चिदपि मस्तकमुदस्यति कदापि कुत्रवापीति श्लाघ्यमानो द्वीपान्तरेष्वपि तत्तदेशेभ्योऽनुक्षणमपि समागता नानाविधलिपिमसृणिता वृत्तान्तलेखास्स्वयमेव विविच्य विलोकयन् करतलबदरीकृतसर्वराष्ट्रविचारो निनाय सुखेन निजविषये कतिचन दिवसानवसादितरिपुमण्डलो वसुन्धराखण्डलः ॥२॥

In Public domain. Digitization Muthulakshmi Research Academy

पद्यम् ॥

तावद्रामेश्वरेन्द्रक्षितिपतिसचिवोऽगण्यपुण्यैकतानो
गोविन्दो नायकेन्द्रस्सुगुणमणिखनिस्स्वानुजन्मानुरोधात् ।
तादृक्कृष्णातरङ्गव्रज शिशिरमरुत्सेव्यमानेऽग्रहारं
यापर्लाख्ये पुरेऽग्र्यं द्विजनिवहकृते निर्ममे शर्म दास्यन् ॥१०॥

गत्वा श्रीवेङ्कटाद्रिं सरसिजनयनं श्रीनिवासं प्रणम्य
श्रीमान् दिव्यामुदारां सुरुचिरमधुरान्तस्य देवस्य मूर्तिम् ।
तस्मादानीय शैलादति विपुलतमं सद्म निर्माय रम्यं
यापर्लान्ताग्रहारेऽभ्य भजत कुतुकं तत्प्रतिष्ठापनाय ॥११॥

किञ्च ॥

विप्राभ्यां युगपत्क्रतुद्वयमयं द्वाभ्यां स तस्मिन् पुरे
श्रीमान् कारयितुं धृतातिकुतुकोऽगण्यानि पुण्येऽहनि ।
चित्राण्यायतनानि दूरविपुलान्यग्राज्ञया यज्ञिये
कारून्कारयति स्म साधुविधिना शाले विशाले अपि ॥१२॥

गद्यम् ॥

तदनु समधिष्ठाय सभां सभासुरां सभूसुरां समीक्ष्य निजानुजन्मानं सन्माननीयकीर्तिं लोकोत्तरतेजःपूर्तिं मनोभवमनोहरमूर्तिं निर्मूलित संश्रितार्तिं दूरीकृतविषयचापलस्फूर्तिं महार्हलक्षणविलक्षणं पुंसां वरेण्यं ब्रह्मण्यमगण्यपुण्यं वेङ्कोबनायकाग्रगण्यं वत्स कथं कथमपि चिराय संसृति चक्रबम्भ्रम्यमाणेषु घटीयन्त्रक्रमेणारोहावरोहाभ्यां जीवेष्वनेकेषु भाग्यान्महतो भगवतः कृपया सुशीतल गम्भीरमधुरया वितीर्णमस्मभ्यं

In Public domain. Digitization Muthulakshmi Research Academy

भरतवर्षेऽस्मिन् भरतखण्डे हीदृशं विद्वत्कुललालनीये महत्यभिजने जन्म तथाच यथोपयोगं विश्राणिता च सम्पत्तिरीदृशेऽपि समये यद्यसाधित परमार्था व्यर्थं यापयामो महान्तं समयं तर्हि नास्मादृशास्सन्ति वराकाः पराकाष्ठैषा श्रेयसां श्रीमतो नारायणस्य प्रीत्यै विताने विप्रेभ्यो वितरणं नाम तदेवमध्वरद्वितयं प्रवर्तनीयं प्रतिष्ठापनीयश्च भगवान्वेङ्कटाचलेन्द्रोऽस्मिन्नग्रहारे प्रदेयानि चामूनि भवनान्यग्रजन्मभ्यः कुटुम्बिभ्यः प्रतिष्ठापितश्चात्र पुरैव रजतगिरिकुटुम्बी महादेवोऽस्माभिर्यदीदमस्मत्प्रपञ्चितं रोचते तव चेतसे तर्ह्यविलम्बितमेव प्रवर्तनीयास्सम्भाराः न खलु विप्राणां जन्मतो ज्यैष्ठ्यं परन्तु ज्ञानेनैवेति स्मरन्ति मन्वादयोऽपि तत्त्वं बुद्धिमान्नीतिमानौचित्यविज्ञाता विज्ञातसकलशास्त्रार्थ इति पृच्छामीत्यभिधाय किमन्यत्तत्र भवते वेदनीयं सर्वज्ञता तावदार्ये नृत्यति कतमो नामाहं निवेदयितुमप्येवं विधेयमिति नहि सहस्रकिरणस्य भगवतो गाढान्धतमसबन्धुरे जगति दीपेनावेद्यते सरणिः प्रस्थातुं न च कर्पूरचन्दनसारैस्सम्पाद्यते शिशिरता शिशिरकिरणस्य नापि कलशोदकैः पूर्यते जगदुज्जीवनो घनाघनः नापीतस्ततो विचित्य प्रक्षिप्तै रत्नैः प्रख्याप्यते रत्नाकरतां सरितां पत्युः नाप्यस्मादृशकर विधृताङ्गुलीयकादिभिर्दत्तैस्सिद्ध्यति सुवर्णमयता रत्नसानोः नापि गोव्रजदुग्धैराप्यायते क्षीरार्णवः नापि मृगमदः परिमलान्तरैस्सुरभीक्रियते नापि चिन्तामणिस्तुष्यतीतरदत्तैर्वित्तैस्तदलं बहुवादेन समग्रमप्यनुष्ठीयते समञ्जसमेव तत्र भवतेति साञ्जलिबन्धं तेन विज्ञापितस्सन्तुष्टहृदयः पुरो निर्दिश्याधिकारिकान् पुरुषान् सम्भ्रियन्तां सम्भाराः परिष्क्रियन्तां वीथीमुखानि क्रियन्तां तत्र तत्रायतनान्याहूयन्तामविप्रकर्षस्थिता भूसुरा

In Public domain. Digitization Muthulakshmi Research Academy

वेदवेदाङ्गभासुरा यथामर्यादं सम्प्रेष्यन्तां विप्रकृष्टानामाहूत्यै भृत्या अनलसकृत्या आमन्त्र्यन्तां राजानः आनीयन्ताम्मुख्या आज्ञाप्यन्तां चावरवर्णजाः भवितव्यञ्च बद्धकटिततैर्भ्रूचलनमात्रकार्यवैज्ञानिकै-र्दूरीकृतालस्यैर्भवद्भिस्सर्वैरध्वरो नाम न सुकरोऽसहायेन पुंसा यावद्याव-न्निजनिजशक्त्या वर्ज्यतां सुकृतं भवद्भिरयं किल विप्रालि पूजनायायं किल राज्ञां माननायायं किल वैश्यजनलालनायायं किल शूद्राणां विचारणायायं हि द्रविणादानायायं हि तत्तदुपाहृत वित्तवसन-सङ्घालेखनायायं हि शाकसम्भारायायं त्वभ्यवहारशालाविचारायायं च विचित्रचेलानयनायायं किल पिष्टातकचन्दनमाल्यताम्बूलवितरणायायं किल तत्तद्राजसेनापरामर्शायायं हि तेषां तेषां स्थानपरिकल्पनायाहं तु विचारयामि सर्वमनुजोऽयं महाभागो वितरीतुं दक्षिणामर्हयितुं विद्वद्बृन्दानि लालयितुं भूपालांश्च किंबहुना यथाहं तथा अयञ्च वत्सो रामचन्द्रनायको रामेश्वरस्यास्मद्राजाधिराजस्यानयनायान्ये च ये ये सन्त्यधिकारिणस्तत्तदुचितेषु कृत्येषु ते ते प्रवर्तन्तां यथेष्टमिति विभज्य निर्दिश्य सर्वेभ्योऽधिकारान् यथोदितं तैस्तैरनलसैर्विरच्यमानेषु कृत्येषु समापतति च तत्तद्देशेभ्यश्चातुर्वर्ण्ये वर्णयितुमगोचरेषु चोपचारेषु प्रवर्त्यमानेषु यथोचितमुपक्रम्यमाणे चाध्वरद्वितये होतापोतानेष्टोद्गातृ-मुखैस्साकं वेदवेदाङ्गपारगैरदूरगैर्वेदिभुवो यथार्हमङ्गीकृताध्वर्यवाभ्यां च विप्रोत्तमाभ्यां सहितेन दीक्षितद्वयेनाभिनन्दन्विलोक्य महाक्रतुयुगल-निरीक्षणनिरन्तरायो जनप्रान्तमिलितमहाजनसङ्घमग्रहारं प्रत्यग्रं प्रतीक्षमाणो महाराजदर्शनं सुखेन दिनानि द्वित्राण्यत्यवीवहत् ॥३॥

In Public domain. Digitization Muthulakshmi Research Academy

पद्यम् ॥

तताज्ञां शिरसा वहन् स धरणीनेतारमत्यादरा
दानेतुं कृतकौतुकः प्रजवीनायानेन राज्ञोऽन्तिकम् ।
अभ्येत्यात्तविनीतिरध्वरकृते सभ्यैर्वचोभिर्नृपं
सम्मन्त्र्याथ च तेन नायकसुतस्सम्मान्यते स्मादरात् ॥१३॥

गद्यम् ॥

अथ किल सिंहासनादुत्थाय सिंहविक्रमो रामेश्वरक्षोणीश्वराध्यक्षस्तत्क्षणमितश्चेतश्च महाराजो निर्गत इति ससम्भ्रममुत्पततां धृतरजतदण्डानां प्रचण्डानां विजयीभव महाराजेत्युद्यम्य भुजदण्डानखण्डान्निर्दिश्य निर्दिश्य निवेदयतां चिराकाङ्क्षितदर्शनप्रणमत्तत्तद्राजनामधेयानि प्रतिहारिणां निकुरुम्बैः प्रदर्श्यमाननिम्नोन्नतसमप्रदेशे मार्गे पञ्चषाणि विन्यस्य पदानि गृहीत्वा जनकानुगुणगुणस्तोमसान्द्रस्य रामचन्द्रस्य नायकस्य हस्तं हस्तेन महागज इव करिकलभस्य सरभससूतसमानीतं हठाच्च्युतमिव गगनतलाद्व्योमयानमनूनं पुष्यरथं हृष्यदन्तरङ्गोऽधिरुह्य साकं तेनातिवेलरभसप्रधावितैरुद्दण्डपताकिकाविभूषैरुदग्रतेजःपोषैर्जृम्भितहेषाघोषैः तुरगविशेषै रन्ध्रदेशमप्यारट्टदेशमिव वितन्वन् किमपि किमपि सल्लपंस्तेन बालेनापि सरसशीलेन सवात्सल्यं सम्प्राप्य सप्ततन्तुशालासन्निकर्षं हर्षोत्कर्षनितान्तलोलान्तरङ्गाभ्यां तावत् प्रत्युद्गच्छद्भ्यां गोविन्दवेङ्कोबनायकाभ्यां कायकान्तितुलित सहस्रकिरणाभ्यां पवित्रान्तःकरणाभ्यां साकमखिलमहाजनैरभ्यर्हितोऽवतारितस्समुदग्रायामुपकार्यायां प्रत्येकं सुत्येऽहनि प्रविश्य यज्ञियशालां

In Public domain. Digitization Muthulakshmi Research Academy

तत्र च सदसि निखिलसूत्रार्थविज्ञातृषु होतृषूच्चैश्शंसत्सु शास्त्राणि क्वचिद्गायत्सु सामान्युद्गातृषु क्वचित्तान्यनुमन्त्रयत्सु ब्रह्मयजमानेषु आश्रावयत्सु श्रौषड्चजये यजामह इति शब्दैरन्तरिते समस्तजन-महाकोलाहले तावदेवमेतदेवमेवैतन्नैवान्यथास्मदुक्तं विचार्यतां साधु-शास्त्रार्थः एवञ्चास्मदुक्तमेवानुसरति भवदुक्तमुच्यतेऽस्माभिश्श्रुत्वा सर्वमनूद्यतामन्तरा किमिति व्यर्थं क्रियते कोलाहलो भवत्वमी तूष्णीं भूतास्मस्सर्वे तिष्ठन्तु मयोच्यते हन्त हन्त नैवावकाशः प्रदीयतेऽमीभिरत्र वाचाटधूर्तैः किमीदृशैश्शास्त्रार्थैरुच्यते चेत्साधूच्यतां नोचेदाश्रीयतां वाचंयमत्वमाश्वास्याश्वास्य वक्तव्यं मा भैष्ट मा भैष्ट नूतना इमे अज्ञात सभामुखाः केवलव्यासङ्गदत्तदृष्टयः कृतमुखा एव गच्छतस्स्खलनं न दोषाय मैवमुच्यतां निशम्यतां निशम्यतां यद्यहं साधु ब्रवीमि तर्हि बुद्धिमानित्युच्यतामित्युद्धूतशिखमुत्कम्पितभ्रुकुटिनिमीलितलोचनमुदञ्चित-दोर्दण्डं प्रदर्शितज्ञानमुद्रं सन्दष्टदशनं व्यावर्तिततर्जनीमध्यमाङ्गुलीद्वयं नहि नहि नहि नहि एवमेवं हा तथा तथा मेधाविनो यूयं सुसूक्ष्मोऽपि शास्त्रार्थः करतलामलकीकृतः क्षणादेव भवद्भिर्विद्वानेव विजानाति विद्वज्जनपरिश्रममहो अस्मिन्वत्सरे राजनगरेऽस्मच्छास्त्रार्थमविचार्यैव महति कोलाहले दत्ता खल्वल्पिष्ठा दक्षिणा नेदानीमपि तथा कार्यं साधु विदितमस्तु हृदयायाहं पाश्चात्य इति विवदमानेषु वादयुद्धप्रधानेषु केषुचित्सद्भावत्सु परस्परजिगीषया केषुचिच्च प्रबलेषु दुर्भलैरुक्तमर्थं श्येनेष्विवामिषमन्यविहङ्गमायत्तमाक्षिपत्सु केषुचिदुक्तमुक्तं व्यर्थं खण्डयत्सु वैतण्डिकेषु केषुचिद्गुणग्रहणैकतानतया सावधानमनूदितान् शास्त्रार्थांस्तैस्तैराददत्सु पश्यत्सु केषुचिदुपर्युपर्यापत्य विलोक्य तं वैभवं

In Public domain. Digitization Muthulakshmi Research Academy

मुदितान्तरङ्गो यावद्यथाप्रदेशं प्रविशति तावत्प्रतिष्ठाप्य शुभेऽहनि शुभतमे मुहूर्ते श्रीनिवासं भगवन्तं तत्प्रीतये वितीर्य च कुटुम्बिभ्यश्श्रोत्रियेभ्यः प्रत्यग्रनिर्मितामग्रहारभवनावलिं सवनार्थं दिनदिनाभिवर्धमाने प्रावृषेण्यभागीरथीप्रवाह इव व्यूहे द्विजानां निर्वृत्ते चावभृथमज्जने सज्जनहृदयङ्गमे महता वैभवेन समर्पिते च तत्फले गोविन्दाय भगवते गोविन्दनायकेनावभृथस्नानार्थमवतीर्णैरनेकजनपदजनजातैर्दन्तुरितान्तरतया दृश्यमानसलिला यावच्चक्षुःप्रसरणं जनमयप्रवाहेव भासमाना चासूर्यास्तं किंबहुना युगसहस्रैरपि सर्वैः कुलाचलैरप्यक्षोभ्य रूपाप्यावितानारम्भं कलुषीकृतजलै वाराजतान्येव तरङ्गिणी कृष्णवेणी ।।४।।

प्रतिदिनञ्च प्रवर्तितेऽभ्यव्यवहारसमारम्भे क्रमात् स्नायं स्नायं कृष्णान्तरङ्गतरङ्गजलैर्विमलैरतिशिशिरैर्नायकमणिकृपासारैरिव दूरीकृतपरितापेष्वापादिताह्निकव्यापारेष्वपारेषु चतुरकूपारान्तरालवास्तव्येषु स्तव्यानुभावं सप्ततुन्तुं प्रशंसत्सु सत्सु यथार्हमासनेषु निषादितेषु बद्धकटितटैर्दीयमानपत्रपुटैरास्तीर्णपर्णैर्न्यस्यमानपत्रामत्रैरप्रमादैस्सप्रमोदैर्विप्रसूदैः कृतेषु करिष्यमाणेषु क्रियमाणेषु च समस्तप्रशस्तवस्तुपरिवेषणेषु इतोऽपि किञ्चिदधिकं परिवेष्यतां किं त्वयोपार्जितं नश्यति वा त्वत्पित्रार्जितं भ्रश्यति वा महाराजः प्रवर्तयति सत्रं किमत्र तव लोभेनानीयतां सूपो यथेष्टं वयमप्यौत्तराहा न दाक्षिणात्या इति जल्पत्सु वियातेषु गोदावरीतीरनिकेतेषु तादृशि महाजनसङ्घसङ्कुले विजृम्भितेऽप्यनवधानतया दीयतां दीयतामिति शब्द एवोन्मस्तकं श्रूयमाणे कुत्रचित्सर्पिस्सर्पिरिति क्वचित्पायसं पायसमिति क्वचिद्भक्ष्याणि

In Public domain. Digitization Muthulakshmi Research Academy

भक्ष्याणीति क्वचिद्दधि दधीति परिवेषयत्सु केषुचित्कोटिशस्सङ्घीभूतानभ्यवहाराय विलोक्य द्विजराजान् द्विजराजनामधेयधारणमात्रजनितदुर्निग्रहचापलस्तत्तादृशसत्रमुखप्रदत्तभक्ष्यभोज्यलेह्यचोष्यवस्तुसहस्ररसश्लाघनमेकरूपेण मया विरचयितुमशक्यमित्यसङ्ख्यान्यवलम्ब्य रूपाणि समागतोऽयं परिपूर्णमण्डलस्सुधाकर एव खण्डलड्डु काव्याजेन न चेदेतासां क्वेदृशी माधुरीति स्वच्छन्दं श्लाघमानेष्वन्योन्यं केषुचित् प्राज्यदध्याज्यदुग्धनदीमातृकायमाणेषु कृष्णापरिसरप्रदेशेषु जग्धार्धकबलानजग्धकबलांश्चर्वितमनोहराननाघ्रातमोदकानस्मृतचित्रान्नानपेक्ष्यमाणाज्र्याकाम्यमानलड्डुकान् परिमृश्यमानजठरभाण्डान् क्रियमाण सुरभिलजलपानानाद्रियमाणसुगन्धितक्रान् स्तूयमानभक्ष्यरुचीन् पठ्यमानभोजनगद्यान् स्वस्त्यस्तु राज्ञे रामेश्वराय श्रेयोऽस्तु तत्सचिवाय गोविन्दनायकाय पूर्णमायुष्यमस्तु तदनुजन्मने वेङ्कोबनायकाय भद्रमस्तु तत्तनुजाय रामचन्द्रनायकायाभिवर्धतां रामेश्वरेन्द्रपरिवाराणां लक्ष्मीर्न वयं निजनिकेतेभ्यस्स्पृहयामहै यच्च श्रुतं रामायणे भरतं प्रति भरद्वाजातिथ्यवैभवं यच्च निशमितं भारते युधिष्ठिरराजसूयाध्वर प्रशंसनं तदेतद्युगान्तरेष्वेव तादृशं कर्म न हि तिष्ये युगे भविता कश्चिदपि पुमानेवं प्रवर्तयितेत्येव निश्चितमियन्तमपि समयमस्माभिरधुना तु पुरातनमहाराजवितानवितरणादिवैभवममूभ्यामध्वराभ्यामद्भुताभ्यां निवेशितमेकपदे पूर्वपक्षकोटौ किंबहुनेति प्रशंसमानान् सुहितहृदयान् सदयान् दर्शं दर्शं हृष्टान्तरङ्गेण मन्दं मन्दमितश्च चन्दनमितश्च कुसुमसरा इतः पटवासका इतश्च कर्पूरचन्दनतैलमितः पुष्कलकसीमगन्ध इतोऽक्षता इतो भोजनदक्षिणा इतस्ताम्बूलानीति ददत्सु परिजनेषु

In Public domain. Digitization Muthulakshmi Research Academy

तद्विरचिताः प्रचुरतरमङ्गलाशिषस्साक्षतास्सङ्गृह्लानेनावनतेन मूर्ध्ना प्रणम्य प्रणम्य बद्धाञ्जलिता ननु ज्ञापयता गोविन्दनायकेन पुरस्कृत्य राजानं साकमनुजन्म तनुजन्म मुकपरिवारैर्निजास्थानविद्वद्भिश्च वितीर्यमाणे यथेष्टमर्थिभ्यो धने सबहुमानं न तत्र कश्चिदप्यनादृतो वा अलालितो वा असन्तुष्टो वा अप्राप्तसर्वमनोरथो वा अधिक्षिप्तो वा अचिकित्सितगदो वा अप्राप्तवसनो वा अनुपार्जितधनो वा क्षुत्परिश्रान्तो वा तृष्णाकुलो वाऽदृश्यत नानाविषयागतचातुर्वर्ण्यजननिकुरुम्बेष्वा-बालवृद्धमापङ्गुकाणान्धमूकमागोपालाविपालं सन्तु सद्भावन्तो दिशि दिशि निसर्गतो विख्याता न तत्पुरस्कारो विस्मयाय किं ब्रूमहे वितरणशूरतां रामेश्वरेन्द्रसचिववरस्य किमन्यद्विजानीमहे वयमयमेव राजा अयमेव सचिवः परस्परसदृशाविमौ नेदृशौ क्वचिदप्युदेष्यते इति ॥५॥

पद्यम् ॥

नैक्षिष्टायमवज्ञया गुणनिधिर्यङ्कंचिदप्यर्थिनं
कालं नाक्षिपदेष सूक्ष्ममपि वा तद्याचितो नायकः ।
नादादल्पमथ व्यकत्थत न चास्मार्षीन्न विश्राणितं
लोकश्लाघ्यमतीष्टमप्यथ कथं तद्दातृतां ब्रूमहे ॥१४॥

विवशितहृदयेऽस्मिन्नर्थिवर्गे यथेष्टं
वितरति सचिवे स्वे वीररामेश्वरेन्द्रः।
सकलजगदनर्घश्लाघ्यवादान्यकेन्द्र
प्रथमगणितनामाप्येष चित्रीयते स्म ॥१५॥

In Public domain. Digitization Muthulakshmi Research Academy

तदानीम् ॥

एकेनैव मयार्पितेन वसुना निर्वर्ततां दक्षिणा
यज्ञस्येति विधाय चेतसि नृपैस्सर्वैर्यदभ्याहृतम् ।
सङ्ख्यातीतमिदं धनं तदखिलं वेङ्कोबनेतुर्महो
दार्याब्धौ सुकुमारशीकरदशामालम्बते स्माद्भुतम् ॥१६॥

ज्ञानवीरमुदीक्ष्यामुं दानवीरं स नायकम् ।
मानवाधीश्वरश्श्रीमान् सानन्दमिदमब्रवीत् ॥१७॥

यज्ञाभ्यां कारिताभ्यां स्वयमपि रचितैर्द्रव्ययज्ञैरजस्रं
स्वाध्याय ज्ञानयज्ञैरपि च स भगवानर्चितोऽद्य प्रसन्नः ।
इष्टं सर्वं प्रयच्छत्यथ किल युवयोरस्म्यहं चेदृशाभ्यां
सुभ्रातृभ्यां चिरायार्जितबहुसुकृतो हन्त कस्मान्न धन्यः ॥१८॥

वेङ्कोबनायकमामन्त्र्य ॥

वत्स त्वं श्लाघ्यकीर्तिर्विपुलवितरणः प्रौढमेधाविशेष-
स्तादृक्षो मेऽनुजन्मा स तु सकलजगद्वन्द्यमाहात्म्यभाग्यः।
गोविन्देन्द्रोऽग्रजश्चेन्मम किमु जगति प्राप्यमन्यन्नितान्तं
मोदाब्धावन्तरङ्गं जलमनुजदशां प्राप्य खेलत्यजस्रम् ॥१९॥

द्वादश्यां व्यध्वगत्या(?) विकलितमनसा येन सञ्चिन्त्यमानो
देवस्सर्वार्धि पूर्णाङ्किल सपदि पुरीं विन्ध्यदुर्गेऽपि यस्य ।
यात्रायां मार्गमध्ये हरिरति कृपया स्वेन निर्माय तेने
चेतस्तोषं स कीदृग्गुण इति गदितुं शक्यतेऽस्माभिरार्यः॥२०॥

In Public domain. Digitization Muthulakshmi Research Academy

गोविन्दनायकमामन्त्र्य ॥

भवता सचिवेन भव्यधाम्ना भवतान्तिप्रतिकूलशीलभूम्ना ।
विजितं भुवनद्वयं मयान्यद्व्रजनीयं किं वास्ति साम्प्रतं मे ॥२१॥

श्रवणपदवीजङ्घालं तद्विधाय वचो विभो-
र्विनतवदनौ मन्दं मन्दं विनीतहृदौ मुदा ।
सचिवतिलकौ राजानन्तं गिरं मृदुलाक्षरां
रुचिररचनां तावब्रूतां प्रयाणकृतोद्यमम् ॥२२॥

यदि खलु महाराजान्यस्त्वं भवेर्नुतिमादरा
द्रचयितुमलं युक्तं स्वीयं स्तुयान्ननु को नरः।
किमितरदिह त्वद्दोर्दण्डामरद्रुमसंश्रितैः
किमु न सुलभं कृत्यं नित्यं दया तव वर्धताम् ॥२३॥

इत्थं तद्वचनं निशम्य नृपतिः प्राप्तप्रमोदोन्नति-
र्विज्ञायोचितमात्मनो गुणनिधिं मन्त्रीन्द्रमेनं मुदा ।
तावापृच्छ्य ततश्चिरादनुगतस्सर्वैर्भटेन्द्रैस्सहा
रूढः पुष्यरथं न्यविक्षित निजां तां राजधानीं जवात् ॥२४॥

यैर्यैर्भूपतिभिर्महाक्रतुकृते रत्नं हिरण्यं पुरा
यावद्यावदुपाहृतं सचिवस्तांस्तान्यथावैभवम् ।
तत्तद्द्वित्रगुणैर्धनैर्मणिभिरप्यातोष्य हृष्यन्मनास्तान्
प्रस्थाप्य निजं पुरं परिजनैस्साकं विवेशाखिलैः ॥२५॥

In Public domain. Digitization Muthulakshmi Research Academy

रामेश्वरेन्द्रविजये नवमं चोल्लासमतनुतानवमम् ।
शठमर्षणवंशमणिः कृष्णः कविगण्डभेरुण्डः ।।

इति श्रीमत्प्रत्यग्रदुर्गतातार्यवर्यद्वैतीयीकनन्दनस्य
कृष्णकविसार्वभौमस्य कृतिषु रामेश्वरविजये चम्पूप्रबन्धे
अध्वरोल्लासो नवमः।।

श्रीमते श्रीनिवासायठपरब्रह्मणे नमो नमः ।।
श्रीरस्तु । मङ्गलानि भवन्तु श्रियै नमः ।।
रामेश्वरविजये - ९ - अध्वरोल्लासः
।। समाप्तः।।

In Public domain. Digitization Muthulakshmi Research Academy

श्रीहयग्रीवाय नमः ।

रामेश्वरविजये - १० - राज्यभारोल्लासः

पद्यम् ॥

शान्ते दान्ते विजितविषये सत्कुलीनेऽत्युदारे
गोविन्दाख्ये सचिवतिलके नित्यमाश्वस्तचित्तः ।
साम्राज्यस्य प्रचुरमखिलं साधु निक्षिप्य भारं
राजा राज्यं स्वयमपि यथाराजनीत्यन्वशासत् ॥१॥

धर्माधर्मौ समीक्ष्य प्रचुरगुणनिधी राजराजो मृदुत्वं
तीक्ष्णत्वं चाभ्युपेत्याभवदखिलजगच्छ्लाघ्यविख्यातिभूमा ।
संयुक्तानां सुखयः प्रदिशति विपुलं चन्द्रमास्सान्द्ररोचि
स्सोऽयं खेदं नितान्तं न जनयतितरां किं वियुक्तावलीनाम् ॥२॥

तत्तत्कृत्येष्वमत्तानचपलधिषणान् ज्ञातनीतींस्तथान्या-
नध्यक्षान् सत्कुलीनान् स्फुटतरवचनानादधे तत्र तत्र ।
निर्वर्तेत स्वकृत्यं निखिलमपि जनैस्साधु यावद्भिरेव
श्रीमान्रामेश्वरेन्द्रो दिशि दिशि चतुरांस्तावतोऽसौ न्ययुङ्क्त ॥३॥

तेषामर्थेऽतिधीराननतिकुशलतरान् धूततन्द्रांश्च भृत्यान्
भीरूनन्तर्निवेशे शुचितरचरितानाकरान्ते नितान्तम् ।
सैन्ये शूरान् प्रचण्डानपि च वनगिरिप्रान्तगुल्मेष्वजाल्मान्
श्लक्ष्णानात्मोपकण्ठे धरणिपति मणिस्संदिदेशाप्रमत्तः ॥४॥

In Public domain. Digitization Muthulakshmi Research Academy

स्वीये राष्ट्रे न्यायवृत्तो नृपालो वैरिव्यूहे तीक्ष्णदण्डोऽतिमात्रम्।
राज्यं शास्ति स्मैष मित्रेष्वजिह्मश्श्रीमान्नित्यं भूसुरेषु क्षमावान् ।।५।।

इष्टप्रदानभरणैरपि शङ्कराम्बारामेश्वरक्षितिपती पितरावभूताम्।
तासां परन्तु पितरो जनिमात्रहेतुभावं तदाह्यदधतातितरां प्रजानाम् ।।६।।

जातु श्रीवनपर्तिनाम्नि नगरे रामेश्वरक्ष्मापते
र्मन्त्रीन्द्रस्स्वनिकेतनाङ्गणभुवि श्रीमन्महात्यद्भुतम् ।
निर्मायातिजवेन दिव्यभवनं शर्मावहं विट्ठलं
देवं तत्र निवेश्य तस्य भजने भावं नितान्तं न्यधात् ।।७।।

श्रीपाण्डुरङ्गदेवं मन्त्री चतुरोऽप्ययं प्रतिष्ठाप्य ।
मणिकनकरजतनिचयं मुदितो बहु हन्त विप्रसाच्चक्रे ।।८।।

प्रत्यग्रस्फुटतरपद्मजैत्रनेत्रं प्रत्युद्यज्जलधरराजिमित्रगात्रम् ।
उद्वीक्ष्य प्रमदभरेण निर्भरोऽसावभ्यष्टौत्सपदि स पाण्डुरङ्गदेवम् ।।९।।

यत्तव लोचनसममिति निगमैः कथितं हि पुण्डरीकमिह ।
तदभिधमपि कञ्चनवरवितरणतोऽपालयस्स भगवंस्त्वम् ।।१०।।

तद्भवतो निरतिशया करुणा शरणागतेषु नलिनाक्ष ।
नावसि कथं नरान् वरमददास्तस्यैव पुण्डरीकस्य ।।११।।

वृत्तिरसङ्गतिरिव तव भगवन् सर्वार्थदानहेतोस्ते ।
अवतारस्तदपि त्वं न कदाचित्त्यजसि पाण्डुरङ्गमपि ।।१२।।

In Public domain. Digitization Muthulakshmi Research Academy

देवेश चन्द्रभागाञ्चितो विधुश्चासि तदपि यद्भगवन् ।
श्रीपुण्डरीकवरदाभिख्यां वहसे तदेतदतिचित्रम् ॥१३॥

किं बहुना ॥

नित्यं भक्तजनावनेन च नृणामालिङ्गनैस्तादृशै
र्भैष्मीकान्तनिपीडितोऽसि न यदि त्वं पाण्डुरङ्गप्रभो ।
श्रोण्यां न्यस्तकरस्सदापि कुरुषे संवाहनं हा कुतः
पाह्यस्मानपि ते विचारयति कश्श्रान्तिं कथं वा वस ॥१४॥

इति स्तुतिवचःक्रमैः प्रतिपदं स्तुवंस्तं भजन्
क्षितीन्द्रसचिवः कृती दृढमतिस्तदङ्घ्रिद्वये ।
घनैः परिजनैस्समं सहभुवं पुरस्कृत्य तं
शशास वनपर्तिभूवलयमाज्ञया भूपतेः ॥१५॥

मित्रेण मन्त्रिणा तद्राज्ञस्तेनाभिवर्धितं क्रमतः ।
उचितकरप्रसरणमथ मण्डलमददान्मुदं तदा जगताम् ॥१६॥

जातु श्रीरङ्गपुर्यां गरुडगिरितटे सद्म निर्माय रम्यं
श्रीमान्रामेश्वरेन्द्रश्शुभतमदिवसे सम्प्रतिष्ठाप्य तत्र ।
नीलां देवीं प्रमोदात्कृततदभिनुतिर्भूसुरेभ्यः प्रदाय
स्वच्छन्दं वित्तजातं रथमपि रुचिरं निर्ममे तत्र तस्यै ॥१७॥

प्रतिशरदं रङ्गपतेः क्षितिनाथः कारयन्महार्घतरान् ।
दिव्योत्सवांश्चिरतरं भव्यान्यादत्त भावयन्विदुषः ॥१८॥

In Public domain. Digitization Muthulakshmi Research Academy

गद्यम् ॥

अतिक्रान्तेषु च कतिपयेषु दिनेषु जनेश्वरोऽसावाह्वायितो मण्डलेन्द्रामात्येन कृत्यविदामग्रणीरव्यग्रनीतिर्निर्वर्तितनिजराज्यकृत्यो निवृत्य भाग्यनगरात्प्रविश्य मोक्थलाभिधाननगरपरिसरपरिस्फुरन्निजशिबिरनिवेशदेशं निशम्य निजाग्रजं गोविन्दनायकमुत्सिसृक्षुं क्षितितलं रचितात्म प्रतीक्षणं तत्क्षणमतितरपरिताप दूयमानान्तरङ्गोऽनुवत्सरं प्रवर्तितनिरवधिकराङ्कवादिवितरणमहावैभवं लोकोत्तरं निजजन्मदिन मङ्गलोत्सवमप्युपस्थितमुपेक्ष्यानुज्ञाय सर्वान् पूर्वाभिमुखो रथमधिरुह्य वेगविजितमानसं दीनसंरक्षणकृतदीक्षो रामेश्वराध्यक्षोऽतीत्य पञ्चापि योजनानि पञ्चषाणीव पदानि वदान्यमूर्धन्यं वनपर्तिपुरे धन्यमनन्यचेतसं धूतसङ्गन्तमेव मन्त्रिवरेण्यं संविष्टं शयनीये दयनीयमूर्तिं निशाम्य निशान्ताभ्यन्तरे शान्ताग्रगण्यं ब्रह्मण्यं किमन्यदिदानीं प्राप्तकालं भगवदनुध्यानाज्जन्मलाभः पुरः पुंसामन्ते नारायणस्मृतिरिति पदे पदे निगद्य भगवन् सर्वलोकशरण्य दीनबन्धो श्रीमन्नारायण पाहि मामिति निरन्तरं कृततदनुध्यानमनतिचिरनिशमितसप्ताहभागवतविचार एव निरन्तरदत्तदृष्टिं परीक्षितमिवास्तमेष्यन्तमिव सवितारं तारं जपन्तमन्तर्हृदयं विदयमिव परिजनं किं किमिति पृच्छन्तमप्युपेक्ष्य परिपूर्ण ब्रह्मानुभवानन्दविवशतया न किमप्यालपन्तं प्रवृष्टजलमूकमिव शारदनीरदं साश्रुकलाकुलाक्षो गद्गदेन स्वरेण आर्य किमिदमत्याहितमतर्कितमापतितमहो बत सङ्कल्पितार्था व्यर्थाः कृता दैवहतकेन कथं च विना त्वया वसेयं धरणीतले किम्मे राज्येनापि प्राज्येन किं जीवितेनाप्यसम्भावितेनास्तामिदमेतर्हि करणीयं च किमित्यापृच्छ्यते न च

In Public domain. Digitization Muthulakshmi Research Academy

महाराज किमन्यदस्ति विदितवेदितव्यस्य उपासितवृद्धस्य भवतो वेदनीयं भगवति पुण्ये च तिष्ठतु भवतोऽन्तरङ्गं किमिदमिदानीमुत्सृज्य निजजन्मदिनोत्सवमप्यखिलजगदासेचनकमीदृशस्य ममावलोकनायागतं महाराजेन दुर्ललितं हि वात्सल्यं यदतिदविष्ठमप्याकर्षति स्वविषय भूमिमचेतितेतरकृत्यमतिरभसेन माभून्महाराजस्य मादृशामेवंविधया दशयान्तरङ्गं परितापविक्लबं कति मादृशा भवत्करुणामपेक्षमाणा न सन्ति जनास्सुलभाः परिजनास्सहस्रशो नेता तु भवादृशो दुर्लभो युगसहस्रैरप्यास्ताम्मयि यावान् करुणा भवतस्तावानायुष्मतीति कथयितुं सिद्धसाधनमिति विरम्यते नान्यदाकाङ्क्षितमन्तरा भवद्दर्शन मामन्त्रये त्वां पुनर्जननान्तरसख्याय यातव्यं च यथापदेशं महाराजेन जवादेव प्रत्यासन्न इव त्वादृशां स्थितेरनुचितोऽयं समय इति लोकमर्यादानुगुणं प्रतिपादितमतिमितं विपुलार्थं निशम्य वचस्सहस्रगुणद्रवीभूतहृदय-स्सदयतयाऽतिक्रान्तमतिक्रान्तं हा बतेति कथयन्नाच्छाद्य सितांशुकेन बाष्पदूषितं वदनं निर्गत्य तत्सदनात्तत्क्षणमेव गतः कथं महाराज इत्यापृच्छ्यानुजनान्मानं वेङ्कोबनायकमोमित्युक्ते च तेन करबदरित-सकलशास्त्रार्थस्य कोऽर्थस्तव सन्देष्टव्योऽवशिष्यत इत्यभिधाय-भाष्पायमाणेन सगद्गदतया किमपि वक्तुमपारयमाणेन तेन महात्मनाहार्य मम मित्र मम सर्वस्व मम बन्धो धूलीकेलिप्रभृति विना मामेकदापि न विहृतं न भुक्तं न पीतं न प्रसाधितं तत्र भवता कथमिवेदानीमीदृशस्याग्रजन्मनो विप्रयोगं सहेयेति करुणकरुण-मभिहितमतिनिर्वेदोर्मिलं निशम्य वचनं वत्स सर्वं खल्विदं ब्रह्म कस्त्वं

In Public domain. Digitization Muthulakshmi Research Academy

कोऽहं को विप्रयोगो न हि त्वादृशोऽपि विज्ञाततत्त्वार्था एवं जल्पितुमर्हन्त्यविज्ञातपरमार्था इव तदलमलमीदृशेन हृदयदौर्बल्येन को विशेषः पलाशिनाङ्कुलाचलानाञ्च चलाचला यदि ते द्वयेऽपि भवेयुर्विसरति मारुते महतीति प्रतिपाद्य तादृशेन तेन वचनेन पुनः पुनस्स्मर्यमाणेन निर्मलीक्रियमाणेनाप्यनुपदमपि निर्भरप्रेमावेशमसृणशोकावेगनिश्वासधूसरितेन दर्पणेनेव मनसा सरभसगतागतघनाघनशतान्तरालप्रतिपददृश्यादृश्यचन्द्रज्योत्स्नापूरे वर्षासमय इव मलिनीभूते निश्वासश्वसनमसृणितां बाष्पधारां निर्मर्यादामुत्सृजत्येव तस्मिन्वेङ्कोबनायके सविधभुवि बाष्पबिन्दुधारासारान्निरर्गलमुद्गिरन्तीं जननीं का गतिर्मम वत्सेत्यतिकरुणं पृच्छन्तीमम्ब तवाधमर्णोऽस्मि हतभागधेयोऽहं नाहं त्वदुदरे कृतजन्मास्म्यापृच्छामि लोकान्तरङ्गन्तुं त्वामयं हि प्रास्थानिकोञ्जलिरनुगृह्णीष्व वत्सलतया मामित्युदीर्य निमीलितनयने विष्णवे नम इत्युच्चार्य समुपसंहृततत्त्वं परस्मिन् ब्रह्मणि निलीने तस्मिन् गोविन्दनायके निर्मर्यादपरिजनपरिदेवितनिशमनविदीर्णहृदयो भृशतरचिन्तार्णवमध्यनिमग्नो रथमारुह्य बहुदूरगतागतपरिश्रान्तोऽप्यशनायितोऽपि दुस्सहतया दुःखस्याप्रतिपन्नमज्जनपानभोजनो भाष्पायमाण एव प्रविवेश तामेव मोक्थलाभिधानां राजधानीम् ॥१॥

पद्यम् ॥

हाहाहन्त कथं कथं स्वयमहं प्राज्यञ्च राज्यं परि
त्रातुं मन्त्रिवरादृते गुणनिधेरेकः कथं शक्नुयाम् ।
धिग्देवं कठिनं फलोद्गमीदशापन्नं रसालद्रुमं
निर्मूलीकुरुते ह्यकाण्डपटुभिर्झञ्झानिलैस्तत्क्षणात् ॥२०॥

In Public domain. Digitization Muthulakshmi Research Academy

न खलु विमृशन् दूराद्दूरादपि क्षितिरक्षणे
कृतमुखमहं पश्याम्येतादृशं कमपि प्रियम् ।
सचिवपदवीनिर्वाहार्हं धिगस्तु शरीरिणां
क्षणिक मधुरां वृत्तिं कस्मै ब्रवीमि दशामिमाम् ॥२१॥

इति चिरतरं चिन्ताश्रान्तस्स बाष्पकलेक्षणः
क्षणमपि मनो नैवाशक्नोद्विनोदयितुं नृपः।
कतिचन दिनान्येवं यातान्यथाह्निचतुर्दशे
सचिवसहजं वेगात्तं चाजुहाव महामतिम् ॥२२॥

गद्यम् ॥

स च महानुभावो महाराजस्य शासनमभ्युपगम्य निर्वर्तिताग्रजौर्वदैहिककृत्यो वितीर्य यथेष्टमतीतसङ्ख्यं वसूनि विप्रेभ्योऽत्यन्तदीप्रेभ्यः प्रत्यग्रत्वादग्रजवियोगस्यापरिमृष्टातङ्को वेङ्कोबनायकोऽप्याशैशवाद्विविधविनोदपरिपोषितोऽपि सानन्दं राज्ञा तमपि द्रष्टुमनुत्कण्ठमानेनैव हृदयेन कथमपि रथमधिरुह्य साकमग्रजनन्दनेन रामचन्द्रनायकेन जवादेवोपेत्य राजनिकटमवरुह्य रथादुपसृत्य मन्दं मन्दं तद्दर्शनद्विगुणितेन पूर्वजवियोगशोकेन धीरस्वभावतयातिप्रयत्ननिरुद्धैरप्युच्छृङ्खलमेवोज्जृम्भमाणैः स्थूलमुक्ताफलशङ्कावदान्यैर्बाष्पैरार्यार्येत्यर्धोक्तिमेव बाष्पगद्गदतया कण्ठस्योच्चरंस्तावत्स्वयमपि तादृशीमेव विक्लबदशामवलम्बमानेनाप्युपेक्षमाणे मय्यतिप्रवृत्तमिदं दुर्निवारम्भवेद्व्यसनमिति सञ्चिन्त्य कथञ्चन निगृहीतशोकेनोपसृत्य जवात्तात मा भैषीः किमिदं मामन्तरेण तवैकस्यैव समुपनतं वैक्लब्यं समानदायौ किलावां सुखस्य

In Public domain. Digitization Muthulakshmi Research Academy

दुःखस्य वा भ्रातुर्यदि भवादृशोऽपि विदितसकलतत्वार्था एवमतिवेल-शोकजडतागृहीतहृदया भवन्ति कावस्था मादृशां को विशेषः कासारपारावारयोर्यद्युभावपि शोष्येते ग्रैष्मोष्णांशुमरीचिनिचयैस्तत्त्वं विचार्य साधु विजहीहि दूरे दूरे मणिरिव मालिन्यं शाणेन ज्ञानेन दैन्यं स्थिते मयि भ्रातरि का भवेत्तव भीतिराश्वसिहि विचारय यथाग्रजस्तथा त्वमेव मन्त्रिपदमधिष्ठाय साम्राज्यमशक्यं खलु महोदयं राज्यतन्त्रं निर्वोढुमितरैः कातरैस्तत्त्वामनुमन्ये मान्यं स्मर्षीश्चेतसीति परिमृज्य बाष्पाविलं वदनं परामृश्य पश्चार्धं शरीरस्य निषाद्य सचिवासने पश्यत्सु सर्वेषु विद्वद्बृन्देष्वधिकृतेषु च सर्वेषु खर्वेतरवात्सल्येन राजचूडामणिना सबहुमानं घनसारचन्दनमूल्यराङ्कवमुक्ताहारमुखैर्विभूष्य परिष्कारैः प्रदाय समर्यादं ताम्बूलमङ्गुलिविन्यस्तसचिवाधिकारमुद्राङ्गुलीयकोऽसाव-निच्छन्नपि बलात्पुनरपि तेन वत्स निशमय तावदियं तमपि समयमाह्लादितं राष्ट्रं चन्द्रेणेव दयासान्द्रेण तत्र भवताग्रजेन गोविन्दनायकेन साम्प्रतं बालाविमौ रामेश्वरवेङ्कोबनायकाविति यथावचनीयतानोन्मिषेत्तथा प्रयतितव्यं निखिलकृत्यजागरूकेण भवतायथा भवन्तमार्यो गोविन्दनायकस्तथामुं रामचन्द्रनायकं बालकमप्यग्रगण्यं मेधाविनां पुरस्कृत्य निर्वहस्व तानि तानि राज्यकृत्यानि विज्ञातसर्वशास्त्रार्थं कुशाग्रीयमतिं भवन्तमनुस्मारये केवलमग्रजाभिमानेन शिक्षाव्याजेन न किमपि वक्तव्यमवशिष्यते तवेत्यनुज्ञातश्च नीत्वा तत्र तं वासरमग्रेसरो मेधाविनां घनकीर्तिर्विनपर्तिपुरीं प्रविश्य तथा शशास राष्ट्रं यथा न केनाप्येवं विरचितं रक्षणं मोघेतरमिति श्लाघेरन् सर्वत्र लोके स्तोकेतरं जनाः प्रमोदघनाः ॥२॥

In Public domain. Digitization Muthulakshmi Research Academy

पद्यम् ।। अथ कदाचित् ।।

नान्यस्मै स्पृहयेत्युदारतिलकाद्रामेश्वरक्ष्मापते
भूपालाय कदाचिदप्यहमिति प्रौढप्रतिज्ञाजुषि ।
सोऽयं श्रीबहिरीक्षमापतिमणिस्तस्यां मनस्सन्दधे
सन्दृष्टा जगृहे कलाश्च निमिषाद्या शङ्कराम्बा स्वसा ।।२३।।

पत्रे भाति यदृच्छयापि लिखिता वर्णालिरग्र्या यया
श्रीमत्यादरतोऽर्पिता मणिगणश्रेणीव वाणी मुदे ।
यच्चेतस्सकलाः कला अपि दधच्चित्रं कलङ्कोज्झितं
वात्सल्यादिगुणैस्सदानुकुरुते या शङ्कराम्बां निजैः ।।२४।।

तामेतां राजपुत्रीं घनगुणमहितां शेषशैलाग्रभागे
श्रीभर्तुस्सन्निधौ श्रीमति शुभसमये शङ्कराम्बास्वसारम् ।
जानक्यम्बाभिधानां मिषति बुधगणे वीररामेश्वरेन्द्रः
पाणौकृत्य स्वमैषीन्नगरमथ तया साकमाकल्पितश्रीः ।।२५।।

धृतरुद्राभिख्या द्या सुकीर्त्यभिख्याऽभवद्द्वितीयापि ।
सहधर्मचरी राज्ञो गरुडांशभवस्य युक्तमिदम् ।।२६।।

जित्वा प्रत्यर्थिपृथ्वीपतिशतकमयं ख्यातिमेत्यातितुङ्गां
कृत्वा सामन्तवर्गानपि बहुकरदान् सम्प्रतिष्ठाप्य देवान् ।
आरामांश्चाभिरामान् कृतिततिमनिशं लालयन् शङ्कराम्बा
जानक्यम्बात्तचित्तश्चिरतरमवनिं साधु गोपायति स्म ।।२७।।

In Public domain. Digitization Muthulakshmi Research Academy

तदानीम् ॥

श्रीमान् सव्वायि राजाबहदरुबहिरीत्यादि जैत्राङ्कपाली
कान्तो नागान्तकर्ता धुतयवनमदो नैकभाषाप्रवीणः ।
तत्ताद्दक्षात्सुरङ्गाविवरवदनतो निर्गतस्स्वर्गिगेयस्सोऽयं
रामेश्वरोऽस्मन्नृप इति मनुजास्तत्कथां सञ्जजल्पुः ॥२८॥

किञ्च ॥

कर्तात्यद्भुतकर्मणां रिपुततेर्हर्तातिधूर्तात्मनस्स्मर्ता
शास्त्रततेर्मनीषिजनतोद्धर्ता च भर्ता क्षितेः।
दाता भूगजवाजिनां दिशि दिशि ख्यातात्मधीरेधतां
श्रीरामेश्वरराजशेखर इति स्फारा अभूवन् कथाः ॥२९॥

मय्येवाभिमुखो भवत्यतितरामित्येव सर्वोऽजनोऽप्या
बालस्थविरादमंस्त सदयं भूपं यथा भास्करम् ।
नासीत्क्वापि विमाननाभिपतति स्रोतस्विनीनां
शते पाथोधेरिव राजशेखरर्जातु प्रजानां शते ॥३०॥

क्वचित्क्रीडारामे क्वचिदमलसौधेऽतिशिशिरे
क्वचित्क्रीडाशैले क्वचिदुचितडोलाग्रफलके ।
मनोभावज्ञाभ्यां सरसहृदयाभ्यां सहचिरं
स ताभ्यां देवीभ्यामभजत सुखं भूपतिमणिः ॥३१॥

गद्यम् ॥

कदाचन वदान्यमणिरुदारविक्रमोऽयं समुपेत्य भाग्यनगरं सम्मानितस्तत्र पूर्वस्मादप्यधिकतमेन सेनाधिपत्याधिकारेण मण्डलेन्द्रेण

In Public domain. Digitization Muthulakshmi Research Academy

सम्प्राप्य निजराष्ट्रसमेधमानं पेद्दगुडाभिधानं परितुष्टेनात्मना प्रदत्तं देव्यै शङ्कराम्बायै ग्राममभिराममारामैस्तत्र रचितवसतिर्जातुचिन्निशायां शयानो दयानिधिं निजकुलदैवतं गरुडगिरिशीर्षण्यनीलरत्नं चिरत्नं पुमांसं मांसलितप्रमोदो वेदोदितविचित्रनिजोदन्तं चिन्तयन्ननन्तरङ्गे रङ्गेश्वरं रामेश्वरभूमीश्वरः परिणतप्रायरूपायां च क्षपायां प्राप्तनिद्रः राजायं मृदुतरकरप्रसारेणाभिनन्द्य कुवलयमहमिवोपशममेष्यत्यचिरादेवेति चिन्तयेव म्लानम्लानरोचिषि शिशिररोचिषि चरमगिरिराजशिखर-रत्नमौलीयमाने लीयमाने समुदेष्यमाणप्रियविप्रयोगचिन्तोदञ्चित-तापाटोपगर्भितरतिरभसा परितुष्टकामिनीजनदीर्घदीर्घ निश्वासातिरेकेणेव म्लानिमवलम्बमाने कौमुदीप्रसरे पुरतः प्रत्यर्पितपदं कालाम्बुदश्यामलं कोमलतरकरतलोदञ्चितसुदर्शनपाञ्चजन्यं निखिल प्रपन्नकुलचिन्ता-सन्तमससन्ततिनिर्धूननाय कोमलकान्तितिरस्कृतनीलोत्पलधाम्नि वक्षस्थलव्योम्नि कृतोदयेन द्युमणिनेव कौस्तुभमणिना तदिष्टार्थवृष्टि-प्रदानपिशुनपरिवेषायमाणेन वैजयन्तीदाम्ना च परिष्कृतं नित्ययुवानं भवानन्दनीयं विभवानन्दनीयं रविभवानन्दनीयं सुरविभवानन्दनीय-मिन्दिराहृदयारविन्दमिलिन्दं सुरभिलशरकल्पं सत्यसङ्कल्पमनल्प-करुणावरुणालयं शरणागतभरणानुरक्तस्वान्तं तमेव भगवतं विलोक्य स्वस्मादपि प्रथममेवाप्रमादेन कृतभगवत्प्रत्युत्थानोपचारैरिव हृषितरूपैस्त-नूरुहैर्भगवत्पादारविन्दयोरादावेव पाद्यमिव समर्पयद्भ्यां सरोरुह-सुन्दराभ्यामानन्दबाष्पबन्धुराभ्यां नयनाभ्यां प्रत्युत्थाय प्रणम्य कोटिशस्सगद्गदं संस्तुत्य साञ्जलिबन्धं तेन च भगवता तात रामेश्वर ममाज्ञयावतीर्णोऽसि राज्ञां कुले खलनागनिग्रहाय विग्रहैस्सादिताश्चान्ये

In Public domain. Digitization Muthulakshmi Research Academy

धरणीभारायमाणा मानवाधीश्वरापशदास्त्वया जानीहि त्वं खलु गरुत्मान् निर्वर्तितानि निखिलान्यप्यवतरणकारणानि कृत्यानि सत्यसन्धोऽसि वदान्योऽसि धन्योऽसि किं बहुना अविलम्बेन विसृज्यतां तावदियं भूमिर्मदाज्ञयैव स्थीयताञ्च नित्यकैङ्कर्ये यथापुरमिदं च तेजोराजकीयं तव बन्धुभावेन स्नुषाया उभयकुलसञ्जीवन्यास्सञ्जीवाम्बाभिधानाया गर्भे निहितं मया जनिष्यते पञ्चषैरेव दिनैर्जनैश्श्लाघ्यभूमा भूमावस्यां नाम्ना भवत्तातस्य समेधिष्यते भवानिव समग्रगुणैरभिरामो भविष्यति भविष्यति चायुष्मान् स एव तव तनुजो राज्यपरिपालनार्हः कतिपयैरेव दिनैस्तावदर्हति गोपायितुमिमां भवद्भुजार्गलाभिरक्षितामियन्तमवधिं क्षितिमण्डलीं भवतस्सहधर्मचरी निष्कलङ्का शङ्काराम्बा परिपूर्णेन धर्मेण शर्मनिर्मिमाणा प्रजानां मातावदस्तु चिन्तादन्तुरं भवदन्तरङ्गं कस्मिंश्चिदपि विषये विषयैषिणामिव रक्षितरि स्थिते मयि किमिव दुस्साधं भवदीयानामित्यभिधाय क्षणादेवान्तर्हिते तस्मिन्विस्मितचेता धूतान्य-चिन्तासन्तानः प्राप्तप्रबोधो वैतालिककुमारस्फुटतरप्रक्रान्तकान्ततर-प्रबोधपद्यविविधमङ्गलतूर्य घोषैरुदतिष्ठत्पर्यङ्काद्धर्यङ्कादिव महासिंहो महीपतिसिंहः।।३।।

उत्थाय च शयनीयाद्दयनीयरूपेण इतस्ततस्सम्भ्रमप्रधावितेन परिजनेन विरचिततादात्विकोपचारो ध्यायंध्यायमुत्तररङ्गेन्द्र सान्द्रभक्तिः प्रणम्य वृद्धानुपाहूय वनपर्तिपुरात्प्रवर्तितसप्ताहभागवतपारायणं नारायण-चरणनलिनैकान्तरङ्गं निजसचिवमुख्यं शुभाभिख्यं वेङ्कोबनायकाभिख्य-मुपागतञ्च तं गृहीत्वा हस्तेन हस्तमुपवेश्य भद्रासने कस्मिंश्चित्स्वय-

In Public domain. Digitization Muthulakshmi Research Academy

मप्यामयग्लानशरीरः कथं च न निषण्णो विषण्णचित्तोऽप्रमत्तो विलोक्य तद्वदनमायुष्मन्नायकमणे हन्त स्वर्गतस्येतो गोविन्दनायकस्य भ्रातुस्सरणिरनतिचिरेणैव मयाप्यनुगम्यत इति भाति चेतसः स्फीतसत्वे नायुष्मता भवितव्यं कच्चिदप्रमत्तेन भवता गोपायिता आस्माकीना जनपदाः कच्चिदाशंसंत्ते राजाभिवृद्धिं प्रजाः कच्चिदारूढनिखिलराज्य-कृत्योऽसि किं बहुना यथा गोविन्दनायकस्तत्रभवांस्तथाहमपि तव भ्रातेत्याशैशवप्राप्तोऽयं सम्बन्धः पालनीयस्सत्यसन्धेन भवता न खलु निपुणं विमृशन्नपि तं विलोकयामि पुमांसं यो ह्यनुदितोपसर्गलेश-मभिरक्षिष्यत्यास्माकीनं राष्ट्रमितश्च लोकान्तरमुपेयुषि राजन्यन्तरा भवन्तं शुभवन्तं किञ्चिच्छ्रवणपदवीमानय मानयस्व मदीयामुक्तिमितश्च रात्रौ भगवता खगराजशिखरिनाथेन रङ्गनाथेनाज्ञप्तोऽस्मि परमपदगमनाय तेजश्च राजकीयं बन्धुभावेन मम स्नुषायास्सञ्जीवाम्बाभिधानाया गर्भे निर्भरमभिरक्ष्यतेऽद्य भगवता तेन त्रैलोक्यजनकेन भविता च पञ्चषैरेव दिनैः कुमारस्स एव खलु मामकीनं गोपायिता राष्ट्रमिदं च तन्मुखारविन्दे नैवाशृणवं तावदालोकये वा न वा तस्य बालस्य वदनं तदिदं वेदितव्यं भवता गते मयि स्थिते वा त्वमेवैनं कुमारं सुकुमारं बालसूर्यमिवोदितं समानीय प्रतिष्ठाप्य रामकृष्णराय इति नामधेय-ममुष्यास्मत्तातपाद सम्बन्धिविविधैरभिरक्ष्य भोगैः प्राप्ततारुण्यं चामुमभिषिञ्चाचञ्चलं सर्वैस्साकमस्मिन्राष्ट्रे तावदिमां देवीं प्रथमां राज्ञीं साकं निजभगिन्या मम द्वितीययाद्वितीययाप्यद्वितीयया सुशीलेति वदान्येति चतुरेति दाक्षिण्यवतीति आश्रितरक्षणस्पृहयालुरिति गुण-ग्रहयालुरिति विषयचापलापतयालुरिति दयालुरिति धर्मविचारा-

In Public domain. Digitization Muthulakshmi Research Academy

निद्रालुरिति राजनीत्यतन्द्रालुरिति धर्मश्रद्धालुरित्युचितज्ञेति शुभभागदेयेति महार्हलक्षणेति राज्याभिरक्षणायार्हामनुमन्ये यावदारूढयौवनोऽयं भविता कुमार इदमितरदस्ति विजितविषयेण महोदारेण राजनीतिचतुरेण ब्रह्मण्येन घनदाक्षिण्येन कृतज्ञेन सत्यप्रतिज्ञेन करुणाकरेण मितभाषणेन आत्मभूषणेन मानधनेन सदाचारेण गभीरेण धीरेण वावदूकेन किं बहुना सुगुणैकतानसीम्ना शुभदाम्ना सुगृहीतनाम्ना भवता यथा पुरं वहता स्नेहभारं निर्वर्तनीयानि राजकृत्यानि तथा प्रयतितव्यं यथा पुनर्योषिदियमनभिज्ञेति न वचनीयतामारोहेद्देवी न चास्मत्कृते भवितव्यं दूनान्तरङ्गैर्भवद्भिरर्जितं यशो मया न धनं रक्षितं चातुर्वर्ण्यं न शरीरं अनुवर्तिता वृद्धानेन्द्रियवर्गा निर्धूताः प्रत्यर्थिनो न मर्यादा अभिलषिताश्च धर्मा न विषया लालिताश्च विद्वांसो न धूर्ताः प्राप्तकालं च प्रस्थास्यते मया तदिदमुपन्यस्तं सर्वमपि यद्यदनुदितं तत्तत्कालेषु यथोचितं क्रियतां न खलु मेधाविनः प्रतीक्षन्ते ह्यन्योपदेशमिति समक्षं देव्या अभिधायाश्रुतपूर्वमीदृशं हृदयदारणं दारुणं श्रोत्रयोर्निशम्य वचनं पिहितकर्णे बाष्पायमाणे किमीदृशानि प्रपञ्च्यन्ते वचनानि महाराजेन शान्तं पापं शान्तं पापमित्यन्तस्सञ्चिन्त्य महाराज किं तावता यदीह वपुषि किञ्चिदुन्मिषितोऽद्यामयविशेषः प्रवर्तिताश्शान्तयो यथेष्टं मया द्वादश साम्प्रतं ब्रह्मवर्चसदीप्रा विप्रा आसप्ताहं पठन्ति श्रीमद्भागवतमभिषिच्यन्ते च तत्र तत्र देवा अर्च्यन्ते च विविधकुसुमैर्मैवं राज्ञो भवत्वन्तरङ्गमतिविह्वलं सम्पादयिता भगवान्कुशलानि नूनमिति वदति नायके पुनरप्यास्तामिदं मम परीक्षित इव भाद्रमासि प्रथमदले

In Public domain. Digitization Muthulakshmi Research Academy

दिनानि सप्त भागवतनिशमनं परं हि साधनं सम्पादितमायुष्मता मम धन्योऽस्मि न हि पश्यामि भवादृशं कञ्चिदपि सखायमीदृशविवेकबन्धुरं पुमांसं यदेवमतिदुर्लभा आपाद्यन्ते सुकृतव्यापारा इत्यभिधाय विधाय दानानि षोडशापि भद्रतरभाद्रमासपौर्णमास्यां प्रतोष्य कनकसिंहाङ्गुलीयकादि भिस्तान् पारायणिकान्नारायणचरणनलिननिरन्तरनिहितहृदयो विसृज्य तं निजभवनाय सञ्चिन्त्य निजविप्रयोगं दूयमानान्तरङ्गं तादात्विकोदितवचननिशमनजनितसाध्वसव्यतिरेकपरिम्लान मुखारविन्दे धर्मपत्न्यौ तत्कालोचितैराश्वासयन्वचोभिर्निनाय दिनानि कानिचित्परमपदगमनचिन्ताघनानि ॥४॥

पद्यम् ॥ तदानीम् ॥

मासे भाद्रेऽन्त्यपक्षे क्षयशरदि दिने पञ्चमे कृत्तिकायां
युग्मे भौमाभिरामे गुरुयुजि मकरे तत्र लग्ने महार्घे ।
उच्चस्थेषुग्रहेषु त्रिषु दितिजगुरौ वृश्चिकस्थे सराहौ कन्यास्थे
भास्करे श्रीनिधिरजनिसुतस्तत्र सञ्जीव देव्याम् ॥३२॥

रामेश्वरनृपतिलके पुरोदिते यादृशं समजनिष्ट ।
तादृशमेव तदानीमुदिते तस्मिन्निमित्तजातमभूत् ॥३३॥

तदानी ॥

प्रसादमापुः ककुभो न केवलं मनांसि चित्रं सुहृदां द्विषामपि।
न केवलं विप्रवराः प्रदक्षिणाश्शिखावितानज्वलनावलेरपि ॥३४॥

In Public domain. Digitization Muthulakshmi Research Academy

उदितं निशम्य तनयं मुदितमतिर्नैजराज्यगोप्तारम् ।
तमिमं निश्चित्य जहावमितां चिन्तां स राजमौलिमणिः ।।३५।।

भास्वति बालेऽभ्युदिते राज्ञि प्रम्लानतेजसि च जीर्णे ।
जगदालम्बिष्ट तदा प्रभातवेला प्रभामचिरकालम् ।।३६।।

रामेश्वरेन्द्रबहिरीनृपतिप्रदीपे
प्रम्लानरोचिषि महार्घरुचिप्ररोहे।
जाते क्षमावनचणे भुवि बालसूर्ये
चिन्तातमांसि न विवेश हि राज्यलक्ष्मीः ।।३७।।

शिथिले प्राक्तनशाखिनि चन्दन इव नूतनोदितश्श्रीमान् ।
बालो राजनि जीर्णे सुगुणो भवितेति तर्क्यते स्म जनैः ।।३८।।

रामेश्वरविजयेऽस्मिन्नुल्लासं दशममतनुत विलासात् प्रत्यग्र
दुर्गकृष्णस्समस्तकविगण्डभेरुण्डः ।।

इति श्रीमच्छ्रीशैलवंशमणितातार्यवर्यनन्दनस्य कृष्णकविसार्वभौमस्य
कृतिषु रामेश्वरविजये चम्पूप्रबन्धे राज्यभारोल्लासो दशमः ।।
श्रीमते श्रीनिवासाय परब्रह्मणे नमः
श्रीरस्तु ।। मङ्गलानि भवन्तु श्रियै नमः ।।
रामेश्वरविजये - १०- राज्यभारोल्लासः ।।
।। समाप्तः ।।

In Public domain. Digitization Muthulakshmi Research Academy

श्रीहयग्रीवाय नमः ।

रामेश्वरविजये - ११ - परमपदोल्लासः

गद्यम् ।।

तावदेव दिवसे कस्मिंश्चिदुपारूढायां गाढायां क्षपायां कृपायामगृहीतहृदयस्समुपसृत्य प्रत्यासन्नभुवि प्रेङ्खयन्तीं तापापनोदनाय चन्दनोदबिन्दुसान्द्रं लामज्जकतालवृन्तं निजवियोगचिन्तादुरन्तनिस्सरन्निश्वासावेगदूषिताधरदलां स्तिमितपक्ष्मतया दुर्विषहदुःखबाष्पोपप्लुतायताक्षं मुखकमलमवनमय्य स्वाभाविकेऽपि महिलानामधीरत्वे कथंचनावलम्ब्य किमपि धैर्यमनुस्मरन्तीं भगवन्तं रमाकान्तं विपदुत्तरणाय निजसहधर्मचरीं देवीं शङ्कराम्बां साकं सोदर्या निरीक्ष्य महीक्षितामध्यक्षो रामेश्वररायः प्रसार्य दोर्दण्डं निषाद्य निजपयङ्के समाश्वास्य किञ्चिद्देवि मास्मैवं विक्लबाभूरनतिचिरप्ररूढोऽपि कदाचन समये विसरति चण्डमारुते विशीर्यत एव महानपि महीरुहः प्राप्तकालमिदं दुर्निवारं देवैरपि किमिह चिन्तयात्यन्तया तदिदमुपादत्स्व मामकीनं किमपि वचनं क्षेमरचनमभिरक्षिता इयन्तमपि समयं सर्वमनोरथैः प्रजा न जानामीतः परं रक्षिष्यामीति तत्त्वं राजपुत्रि यदि मच्चिन्तयैव दूयसे सन्ततं ततश्चाराजकमिव राष्ट्रमिदं विक्षोभ्येत नूनमल्पैरपि न चेदं राजनि राजपत्न्यां राजपुत्रे वा जाग्रत्युपपन्नं परमोऽयं धर्मो राजकुलप्रसूतानां प्रजारक्षणं नाम विषीदेयुस्सर्वाः प्रकृतयस्त्वय्यनाददानायां राज्यभारं न खल्वन्योऽत्र विद्यते वोढुमिमं भारं कथं च पितरि विरमति

In Public domain. Digitization Muthulakshmi Research Academy

जनन्याप्युपेक्षिता जीवेयुः प्रजाः न खल्विदमतिशोकवैक्लब्यं तवास्मदभीष्टं यदि च पातिव्रत्यावष्टम्भस्तव तदा पालनीयमस्मच्छासनं यथा खलु न सीदन्ति धर्माः न क्लिश्यन्ति प्रजाः न निन्दन्ति परे न वञ्चयन्त्यधिकारिणो न हसन्ति परिजना न प्रतारयन्ति भृत्या न द्विषन्ति मन्त्रिणो न माद्यन्ति धूर्ताः न शोचन्ति मनीषिणो न दृप्यन्ति शत्रूपजापकाः नाक्षिपन्ति विषया न दूयन्ते मित्राणि न जृम्भन्ते विद्विषस्तथा क्रियतां महान्यत्नो राज्यरक्षणे तथाचार्ज्यतां यशो यथेयं ललनाप्यतिक्रामति सुगुणै रामेश्वरेन्द्रमिति स्तूयसे जनैरिदमन्यदुपदिशामि प्रायो वृका इव मेषं जोषं नयनयुगमुन्मील्य निमील्य तष्ठिन्तो हरन्ते कदा वा वित्तमाढ्यानां धूर्तास्तत्र भवितव्यमति-सूक्ष्मदृशा भवत्या विपुलाक्ष्यापि केचनान्तरं प्रविश्य मक्षिका इवान्तर्गतमपि क्षणेनैव बहिरपसारयन्ति मन्त्रं न खलु तादृशां मन्त्रकालेषु वान्येषु वावसरेषु प्रवेशो न प्रमादाय भविष्यति किञ्च सहसा सर्वेषां धुरि न प्रकाशनीय आन्तर्हृदयिकोऽभिप्रायो हितजनमन्तरेणापि चेदमवधार्यतामभिमन्त्रितं त्वया साकं मन्त्रिभिर्माभि-धावतां मन्त्रो राष्ट्राद्राष्ट्रमयं च परमो धर्मो यथासमयं प्रवर्त्यन्तां महोत्सवा देवानां वितीर्यन्तां विदुषां वसूनि दीयन्तां यथाकालं प्रदेयानि परिजनेभ्यः किं बहुना न खलु वितरणादन्योऽस्ति गुणो नाम नृपाणां परिष्कृतमपि सर्वगुणैर्विनैकेन वितरणेनान्तरेण सौलभ्यं पल्लवाढ्यमपि कुसुमशोभितमपि फलितमपि सुशीतलच्छायमपि मनोहरदर्शनमपि न खलु श्लाघन्ते चन्दनतरुमिव नराः स्फीतं च राष्ट्रमर्चयितुं देवान् भूदेवांश्च यथायं वितरणाख्यो गुणशिरोमणिर्जनानामानन्दमुन्मीलयति

Public domain. Digitization Muthulakshmi Research Academy

न तथान्यः परमिदं रहस्यं रक्षणीयास्सर्वमनोरथैरास्माकीनानुज रामकृष्णरायादयो नावमान्याश्च जातुचिदपि भवत्या सादितास्सामन्ता आर्जितं यशोदक्षाश्चाधिकारिणो निपुणश्च सचिवः अर्हाश्च भृत्याः योग्याश्च परिजनाः मान्याश्च मनीषिणः उपपन्नमेव सर्वमपि रक्षणीयं हि त्वया पुरस्कृत्य मन्त्रीन्द्रं महानुभावं वेङ्कोबनायकमिमांश्च झङ्कप्रमुखा-नधिकृतपुरुषान्राज्यं यावदुपपन्न तारुण्यो भविता रामकृष्णरायः कुमारस्तदनु च यथामनोरथं कार्यं भवत्या नीतिमती बुद्धिमती विज्ञातनिखिलविचारासि निसर्गत एव न खल्वनुशासनीयमस्ति ते मया तथापि भर्ताहमित्यभिमानेन परमेवमभिहितं कथं करोषि मम प्रियं धर्मतो राज्यपरिपालनेनेत्युदीर्य रङ्गेन्द्रस्मरणदत्तचित्तावधानोऽर्धरात्र-स्तिमित भ्रमरमरालकुलकलकल इव कमलाकरस्तूष्णीमासीत् ।।१।।

निशम्येदञ्च वचनं किमन्यदात्मानमेव नाज्ञासीद्देवी शङ्कराम्बा निर्मर्यादोज्जृम्भमाणशोकसागरतरङ्गोत्क्षिप्यमाणस्थूलमुक्ताफलायमानै-र्बाष्पबिन्दुभिर्ग्रन्थतीव हारमसूत्रं प्रवर्धमाननिश्वासावेगोर्मिलं रुदन्ती निश्शब्दं शून्यशून्यहृदयान्तर्निर्भिण्णाभयावेगेन केसरिगर्जितत्रस्तेव हरिणी यूथपरिध्वस्तेव करिणी न किञ्चिन्निर्वर्णयन्तीव किञ्चिदाकर्णयन्तीव किञ्चिन्निरूपयन्ती न किञ्चिदालपन्ती न कञ्चिदाह्वयन्ती न किञ्चिदा-दिशन्ती क्व जनितास्मि किमर्थमुदीतास्मि क्व साम्प्रतं गच्छामि कम्पश्यामि किमुपक्रान्तं दैवहतकेन कां दिशमाश्रयामि किं करोमीति निमीलितनयना पतिवियोगचिन्तयास्तमेष्यति सवितरि कोरकितनलिनेव नलिनीमनस्यचिन्तयत्किं मे राज्येन पापाया निष्करुणाया यद्येवं

In Public domain. Digitization Muthulakshmi Research Academy

महाराजोऽपीदृशीं दशामवलम्बते हन्त न रक्षितो मम पातिव्रत्येन महाराजो नोज्जीवितश्शीलेन न सम्भावितो विनयेन न चाप्यायितो दाक्षिण्येन न सन्तोषित औचित्येन नाराधितो गाम्भीर्येण नोत्तारितः पुण्येन नोन्मीलितो दयालुतया नोत्तेजितो गौरवेण यथेष्टं धिगिमान् गुणान् धिगिमां मां निर्लज्ज्ञां याऽहमीदृशेऽपि समये सुखेन वर्ते धिगिमां राजपत्नीनां दशां यदीदृशेऽपि समये पालनीयं राज्यमिति पत्युराज्ञोल्लङ्घनभीतिः सम्प्रति दुश्श्रवमिदं कीर्त्यमानमपि राज्यवृत्तं प्रायो धन्यास्साधारणानां स्त्रियः यदेवं विधायां दशायां न तासामीदृशः क्लेश इति स्थूलस्थूलं निश्वस्य यावदियं जाग्रत्येव राजाभिमुखी कुमुदिनीवोत्फुल्लकुमुदा निषीदति तावदुदयमुपगते च भगवति कमलिनीचिन्ताग्निनिर्वापणमणिवरे त्रयी सुरभिलवपुषि तेजसि यथामर्यादमागतेष्वधिकारिषु विलोक्यामन्त्र्य मन्त्रीन्द्रं तात न पारये विलोकयितुं युष्मानन्यामिवावलम्बे दशां किमिदानीमुचितं कर्तुमिति रभसादावेदय विहाय प्रेमजडतां श्रेयस्करं ममेत्यापृच्छ्य तद्वचननिश-मनान्धम्भविष्णुहृदयेन बाष्पायमाणेन प्रियङ्करणशीलेन निश्वासानुत्सृजता निर्मर्यादान् गद्गदिकाक्रान्तस्वरेण कथञ्चिदवलम्ब्य धैर्यं किञ्चिदति प्रयत्नेन तत्कालं शिथिलीकुर्वता प्रेमपाशं महाराज यद्यपि श्रेयस्कर-मेवेदमुदीर्यमाणमथापीदृशे समये अनया रसनया हृदयविदारणं परिजनानां किमित्यावेदयामीति चिन्तयमानोऽप्यावेदयाम्येव जन्मवैय-र्थ्यभिया स्मर्यतां भगवान्धीरेण चित्तेन किमन्यदस्तीतोप्युत्तारकमिति गदितं निशम्याविच्छेदेन कीर्तयन् गोविन्द नन्दनन्दन मुकुन्द मुचुकुन्द

In Public domain. Digitization Muthulakshmi Research Academy

वरदारविन्द लोचनेन्दिरारमण पाहि मामिति श्रीमते नारायणाय नम इति श्रीमते रामानुजाय नम इति चानुसन्दधानः अन्तरान्तरा निज-विप्रयोगशिथिलितहृदयैः परिजनैः कैश्चित्किमस्माकमाज्ञाप्यते का गतिर्न इति प्रार्थ्यमानोऽप्यददान एव तेभ्यः प्रत्युत्तरं भगवन्नाम येन केनचि-दुच्चार्यमाणमप्यनुसन्दधानोनुपदमेव तत्रान्तरे साक्षादुपेत्य द्वितीयायां द्वितीयायां जानक्यम्बाभिधानायां सबाष्पगद्गदं कथञ्चन कथं महाराजस्य वपुषि परिताप इत्यर्धोक्तिमेवाभिदधानायां किमिदं पृच्छसि श्रीवेङ्कटाद्रौ श्रीनिवासस्य भगवतोऽग्रे बद्धाञ्जलिरहं क इदानीमपि परिताप इति भगवन्मयमेव वचनं वदन्पश्यन् साक्षाच्छ्रीनिवासमानन्दबन्धुरो मन्दराद्रि-मथनावसानस्तिमित गम्भीरनिश्शब्द इव दुग्धाम्बुधिः क्षणं तूष्णीं बभूव ।।२।।

पद्यम् ।।

दिङ्नागर्षिक्षमासम्मितशकघटिते तत्र वर्षे क्षयाख्ये
भाद्रे मासेऽन्त्यपक्षे लसति हरिदिने भास्करे कन्यकास्थे ।
श्रीमद्रामानुजार्योत्तमगुरुचरणाम्भोजदत्तान्तरङ्ग-
श्श्रीमान्रामेश्वरेन्द्रः परमपदमगाद्विश्वविख्यातकीर्तिः ।।१।।

हा धिक्कष्टमहो बत प्रतिहतं सर्वेप्सितं नः पुन
र्जीवामः कथमद्य कृच्छ्रमुदितं दैवादिहातर्कितम् ।
हातिक्रन्तमिति स्फुटं परिजना बाष्पाविलाक्षा नृपे
सम्प्राप्ते दशमीं दशां विदधिरे सर्वे विलापान्मुहुः ।।२।।

In Public domain. Digitization Muthulakshmi Research Academy

गद्यम् ।।

तत्क्षणमतर्कितोपनतां तादृशीं राज्ञोऽन्तिमदशां विलोक्य प्राप्तसम्मोहां साकं सोदर्या कथमपि परिजनैराश्वास्यमानां निरर्गल-विजृम्भमाणशोकबाष्पविक्षेपपर्याकुलाक्षीं स्रवन्मरन्दारविन्दामिवार-विन्दिनीं अविदितककुभं हा हन्तहन्तेति मुहुर्मुहूर्महाराज किमिदं विसृज्यानाथां मां क्व यास्यसि प्रसीद किञ्चिदपि वा दर्शय वात्सल्यं किङ्कर जनेऽस्मिन् विलोकय किञ्चिद्व्यावर्त्य वदनं परिपूरयास्मदभीष्टं परितापदूनास्म्यनन्यनाथास्मि बालास्म्यनुरक्तास्मि किमपराद्धं कदा वा मया वामया का वाज्ञा तवोल्लङ्घिता यदद्य कुपित इव न पश्यसि न भाषसे त्वदङ्घ्रिदासजनमिमं प्रियतमा खल्वियं बाला देवी द्वितीया लज्जानिगृहीतकण्ठी विलपति तां वा करुणयावलोकयाहो महाराजेन विरहिताया मम कमनीया अपि न रमणीयास्संवृत्ता इमे देशाः निखिलवस्तु परिपूर्णापि शून्येव वसुन्धरा उन्मील्योन्मील्यविलोकमानाया अपि गाढान्धतमसावृता इव यथा प्रदेशस्थिता अपि क्वापि याता इव दिशो न गोचरीभवन्ति व्यर्थं हि मे धरणीमण्डले सुनिष्पन्नमपि जन्म कं विलोकयामि कं प्रतिबोधयामि कमालपामि कस्मै विस्रम्भं कथयामि किमधुनापि मे जीवितेन परिजनेन राज्येन वा कं पृच्छामि क्व गच्छामि किं दैवतं प्रार्थये को मे वितरतु त्रिलोकी विख्यातं तादृशं दयितरत्नं कथं वा वदनमेवंविधं तातस्य जनन्या वा सोदरीणां वा दर्शयिष्यामि किं कथयामि साहं निष्ठुरा निस्त्रपा निष्प्रयोजनजन्मा निरवलम्बा निस्सुखा हन्ताहो भगवान् प्रावृषेण्यपर्जन्योऽप्यधुना निर्गर्जितजीवन-प्रदाननिपुणो महाराजोऽयमस्मत्तोऽप्यधिकतम ईदृशीमवलम्बते

In Public domain. Digitization Muthulakshmi Research Academy

दशामिति शोकाग्निनेव वैद्युतानलेन तप्यमानान्तरोरसि तापदेशेनाक्रन्दन्नूनं बाष्पधारामुत्सृजति निरर्गलां जलधारासारमिषेण दिशोऽपि सम्प्रति निजाधिनाथांशसम्भूतमहाराजदुर्दशानिर्वर्णनाक्षमतया जलधरनिचयनिचोलितवदना निष्प्रत्यूहविसृत्वरमारुतमिषेण निश्वसन्ति नूनं हन्त चन्द्रमा अपि भगवान्राजनामसाम्याद्विलोकितुमीदृशीमस्य दशामनीश्वरोऽन्तर्जलधरं निलीनो नूनमहं तु वज्रहृदयास्मीत्येवमादि दुस्सहं दुश्श्रवं विलपन्तीं देवीं शङ्कराम्बां विलोक्य सर्वेऽपि परिजनाः कालरात्रीयमानमपश्यन्तो जगदुन्मील्यापि लोचनमशृण्वन्तो वचनानि सतोरपि श्रवसोरगच्छन्तः पदात्पदमपि विद्यमानयोरपि चरणयोरितिकर्तव्यतामुग्धा स्तब्धा इवोन्मत्ता इव प्रमत्ता इव विकलेन्द्रिया इव ग्रहाभिभूता इव किमपि कुर्विति चोदिताः किमपि विदधाना अगच्छेत्युक्ते तूष्णीं तिष्ठन्तस्तिष्ठेत्यभिहिते दूरं प्रधावन्तः निश्वासमयैर्वदनैर्बाष्पमयैर्लोचनैः परिदेवितमयैर्वचनैश्शोकमयैर्हृदयैश्शोषमयैरधरैर्महाराजमयैस्स्मरणैर्दुस्सहरुदितशब्दमयैश्श्रवणैः कम्पमयैस्सर्वावयवैरन्यरूपतामिव वहन्तो हन्त हन्त महाराज ते पराक्रमान्मृत्युरपि बिभियादित्यज्ञासिष्म खलु वयमज्ञाः कथमेकपदे महारथं महोदारं महानुभावं महामतिं महाकाशल्यं महाबाहुं महाधैर्यं महाशौर्यं भवन्तमपि व्यधात्स्ववशे मृत्युर्नातिभारं मन्यामहे कृतान्तस्य हिंस्रतामीदृशीं मृत्युग्राहगृहीते मग्ने त्वयि महागज इव कथमिव करिवरदोऽपि भगवान्निर्घृण इवोपेक्षते हन्त किं कुर्यादस्मत्कर्मणे विषलताप्रतानवद्वर्धमानाय भगवानपि वेति साकं तया देव्या विलपन्तो धिगस्मानीदृशेऽपि कृच्छ्रे अनुपालब्धदेहा अहो बत महत्कष्टमापतितमिति वदन्तः हन्तैवं जातमिति निगदन्तः किमन्यदितः परमस्तीति

In Public domain. Digitization Muthulakshmi Research Academy

जल्पन्तः अतिक्रान्तमतिक्रान्तमिति ब्रुवन्तः निरतिशयाश्रुपातकषायितोदरैर्लोचनैरन्योन्यं मुखं तूष्णीमेव विलोकमानास्सगद्गदस्वरतया किमपि वक्तुमनीशाः क्षणं किमपि करतलं व्यावर्तयन्तोऽधरान् प्रसारयन्तो जना यावदेवं राष्ट्रियाश्शोकोपप्लुता भवन्ति तावदाश्वास्य तत्कालोदितैर्वचनैर्देवीं शङ्कराम्बां निर्वर्तितौर्ध्वदेहिकं विधाय महाराजमतिक्रान्तेषु तेषु दिनेषु युगसहस्रायमाणेषु यथेष्टं वितीर्य विप्रेभ्यः कलशवसन कनकधरणिधेनुरजतमणिमुखदानानि प्रतोष्यानुदिनमन्नदानैर्देव्या महोदाराया बहुदूरदर्शिन्या आज्ञया निरवर्तयन् श्रीवैष्णवसंसत्सनियमारब्धदिव्यप्रबन्धानसन्धानमनोहरमन्ते महता वैभवेन परमपदगमनोत्सवं महाराजमौलिमणे रामेश्वरभूमीश्वरस्य ।।३।।

पद्यम् ।।

सालावर्जङ्गभिख्यस्सचिवकुलमणिस्तन्निशम्येतिवृत्तं
श्रीमद्रामेश्वरस्य प्रशिथिलहृदयो बाष्पपर्याकुलाक्षः।
नासान्यस्ताङ्गुलीकः किमिदमसमये राजसिंहो व्यतीतो
धिग्धिक्कष्टम्बतैतद्धतविधिकलितं तूर्णमित्याह सभ्यान् ।।३।।

सन्त्वन्ये नरपालनामकलितास्सन्त्येव भारायिता
भूमेस्सम्प्रति तैर्भवेत्किमु यदि श्रीमान् गतो द्यामितः ।
शून्या तेन चमूरियं मम घना रामेश्वरेणातुरा वक्त्र -
श्रीरिव नासिकाभिविधुरा कं वा प्रकाशं भजेत् ।।४।।

दिशि दिशि नृपं पश्याम्येनं प्रचण्डपराक्रमं
दिवमपि गतं न श्रद्दध्यां कथञ्चिदपि प्रभुम् ।

In Public domain. Digitization Muthulakshmi Research Academy

किमिव करवै तादृङ्मित्रं चिरादपि दुर्लभं
बत हत विधे किं ते प्राप्तं नृपं हरतो हठात् ॥५॥

स खलु बहिरी भूपालेन्द्रो महार्घपराक्रम-
क्षुभितमुदिनप्रोद्यन्नागादिमाहितसंहतिः।
जयमिह कराम्भोजे चक्रे भुजो मम दक्षिणो
न्यपतदचिरात्क्षोण्यां तादृक्क वास्ति महामनाः ॥६॥

एषा हन्त तदर्थमेव पृतना सन्नाहिता सर्वत-
स्त्रैलोक्यस्तुतिपात्रमास स महान्रामेश्वरक्ष्मापतिः ।
किं कुर्वे तमिमं विनोपचरितं यत्तेन मय्येव त-
ल्लीनं प्रत्युपकर्तुमक्षम ऋणे तस्यैव मज्जाम्यहम् ॥७॥

भवतु तदिदं दैवायत्तं किमत्र करिष्यते
बहदुरुविभोर्यत्साम्राज्यं तदेतदनर्गलम् ।
सपदि खलु तद्देव्यावश्यं विधाय कृतार्थता-
मभिलषति नश्चित्तं प्राप्तुं किमद्य बहूदितैः ॥८॥

इति विनिगदन् मन्त्रीन्द्रोऽयं स्वकीयचमूमुखे
प्रतिदिनमुखं प्रोद्यद्भेर्यादिवाद्यशुभार्भटीम् ।
बहुदुरुविभोर्नाकप्राप्तेर्निषिद्य दिनत्रयं
शुभबहुमतिं देव्यै तस्यै प्रभोः प्रजिघाय सः ॥९॥

तावद्रामेश्वरेन्द्रप्रभुवरललनामौलिमाणिक्यमाला
देवी श्री शङ्कराम्बा नवनवदयितप्राज्यविश्लेषदूना ।

In Public domain. Digitization Muthulakshmi Research Academy

मुक्त्वा तद्ग्रामसीमां रथकरितुरगश्रेणिसम्पूर्णपार्श्वा
द्राक्पेब्बेराभिधानां न्यविशत नगरीं बाष्परुद्धायताक्षी ।।१०।।

तावदेव ।।

उत्तुङ्गैर्द्विरदैरुदग्रतुरगैस्तूर्याभटीप्रोद्धटै
स्साकं तेऽधिकृताश्च भाग्यनगरीमन्त्रीश्वरप्रेषिताः ।
नानामौक्तिकहाररराङ्कवमहारत्नानि यत्नात्पुरीं
तां निन्युर्बहुमाननाय बहिरीराजेन्द्रदेवीमणेः ।।११।।

रामेश्वरविजयेऽस्मिन्नुपदशमुल्लासमतनुत विलासात् ।
षड्भाषाकवनकृती कृष्णः कविगण्डभेरुण्डः ।।

इति श्रीमत्प्रत्यग्रदुर्गतातार्यवर्यद्वैतीयीकनन्दनस्य कृष्णकवि
सार्वभौमस्य कृतिषु रामेश्वरविजये चम्पूप्रबन्धे परमपदोल्लास
एकादशः।।

श्रीमते श्रीनिवासाय परब्रह्मणे नमो नमः ।।

श्रीरस्तु ।। मङ्गलानि भवन्तु ।। श्रियै नमः।।

रामेश्वरविजये - ११ - परमपदोल्लासः ।।

।। समाप्तः ।।

In Public domain. Digitization Muthulakshmi Research Academy

श्रीहयग्रीवाय नमः ।

रामेश्वरविजये - १२ - कुमाराभ्युदयोल्लासः

पद्यम् ॥

अयत्नबहिरीनृपाभिलिखितैकरेखाव्यति-
क्रमेऽप्यनिपुणात्मधीस्तदनु शङ्कराम्बामणिः ।
तदीयवचनं स्मरन्त्युदितमन्वयानन्दनं
विलोकितुमनर्गलामभजताद्दतिं नन्दनम् ॥१॥

राज्ञ्या द्राक्तदनु तयाथ झङ्कनामाप्याज्ञप्तः करितुरगार्भटीमनोज्ञैः।
बालं तं नृपवरलक्षणैर्मनोज्ञं प्राज्ञोऽसौ सपदि बलैस्समानिनाय॥२॥

पादच्छायागृहीतोज्वलतरसमयैस्तान्त्रिकैश्शश्वदूर्ध्वं
दर्शं दर्शं च मेषादिमपरिगणनान्युब्जिताग्राङ्गुलीकैः।
वेगादावेद्यमाने शुभगुणमसृणे सन्मुहूर्ते स धीमान्
दत्वा वित्तं द्विजेभ्यो नृपवरललनासन्निधिं प्रापयत्तम् ॥३॥

तमिमं मनोहरगभीरनिर्मलस्मितगर्भगण्डफलकाननाम्बुजम्
प्रतिबिम्बितं नृपमिवाभिवीक्ष्य सा मुदितापि बाष्पकलितेक्षणाभवत् ॥४॥

हारिद्रोदकपिष्टभाजनकनद्दीपाङ्कुरश्रेणिका
नानावर्णघनान्नभाजनचयांश्चावेष्ट्य तं सर्वतः।
दृग्दोषोद्धतिधूननाय सुदृशो विज्ञाततत्तत्क्रमा
स्तान् दूरे परिहृत्य भूपतिशिशोश्चक्रुर्मुहुर्मङ्गलम् ॥५॥

In Public domain. Digitization Muthulakshmi Research Academy

जन्म क्वास्य क्व सम्पद्वहदरुनृपतेः क्वास्य बाल्यं क्व राज्यं
तत्तादृग्भागधेयं त्वघटनघटनापाटवाढ्यं किमन्यत् ।
अस्मद्रामेश्वरेन्द्रप्रभुवरसदृशस्स्यादयं चात्र वंशे
प्रायो भूपा गुणाढ्या इति निखिलजनास्सञ्जल्पुर्यथेष्टम् ।।६।।

गद्यम् ।।

तस्यां चाश्विनशुक्लदशम्यां शम्याराधनौत्सुक्यससम्भ्रमधावमानानेकराजकबलकलकलरम्यायां सम्यग्वेङ्कोबनायकं पुरस्कृत्याधिकृतपुरुषा अराजके खलु राष्ट्रे न काचिदपि मर्यादा सम्भाव्येत तदेनां महानुभावां राज्ञः प्राथमिकीं देवीं वदान्याग्रगण्यामगण्यानां पुण्यानामेकसीमां रामाणां पातिव्रत्याभिरामाणां मूर्धन्यमणीयमानां मानातीतकरुणास्फुरणान्तःकरणां निष्कलङ्कां शङ्कराम्बामभिनववल्लभवियोग दूषितान्तरङ्गामप्यभ्यर्थयामहै यथाराजाज्ञं साम्राज्यवीक्षणायेति सम्मन्त्र्य मन्त्रविदामग्रेसरास्तत्क्षणमुद्धृतचिन्तामणिमिव महोदधिमपचितफलमिव महातरुमस्तमितचन्द्रमिव यामिनीसमयं तरलमणि विघटितमिव मणिहारं तिलकविधुरमिव वदनं निर्गतसिंहमिव महागिरिकन्दरमस्तङ्गतद्युमणिमिव गगनपथमुद्घाटितकर्णिकमिव महोत्पलमपनीतमौक्तिकमिव शुक्तिसम्पुटं रामेश्वरेन्द्रविरहितं तं राजनिकाय्यं प्रविश्य निष्प्रत्यूहविजृम्भितां बाष्पधारां निग्रहीतुमक्षमा एव समुपसृत्य स्तिमिततरपदन्यासमवनतमूर्धतलश्चकितचकितेक्षणं पुरस्तात्प्रतिहारस्य स्थित्वा स्थित्वा द्वारपालजननासाग्रविन्यस्ताङ्गुलिपल्लवसूचितनिश्शब्दस्थितिसङ्केतेषु मन्दम्मन्दमपसरत्सु तत्र तत्र कर्णे कर्णे बलवदस्वस्था

In Public domain. Digitization Muthulakshmi Research Academy

देवी राजेन्द्रविश्लेषवैक्लब्येन कथं भविष्यति वा राज्यतन्त्रमिति शनैश्शनैर्जल्पं जल्पं वलमानेषु राजकीयजनेषु कथमपि प्रविश्यान्तस्तत्र समासीनामेकदेशे भूम्यामेवानवरतनिपतद्बाष्पबिन्दुधारासारस्तिमितदुकूलोत्तरासङ्गपट्टमुष्णोष्णनिश्वासावेगाहतिम्लानवेपमानाधरपल्लवमप्राप्तबहिर्निस्सरणेन स्फुटतीमिवान्तश्शोकपूरेण अविलोकमानां पुरस्ताच्चरतोऽपि परिजनान् विहाय महाराजं भर्तारमपि कथं स्थाणुरिव निश्चलासीति रोषेण तुदन्तीमिव नखमुखेनालिखन्तीं धरणीं तामुद्वीक्ष्य महाराजधर्मपत्नीं निषण्णा दूरेदूरे यावत्पुरतः कथञ्चिदवलम्बितधैर्याः पञ्चषा एव तावद्विदितपरावरविचारो मूर्धन्यो वाग्विदां निधिर्वैराग्यस्य महोदारधीरगम्भीरप्रकृतिस्तिष्ययुगाननुरूपव्यापारो नन्दनन्दनचरणनलिननिरन्तरध्यानावधानैकाहतान्तरङ्गो निरातङ्को वेङ्कोबनायकस्सोऽयमात्मदर्शनशतगुणाभिवर्धमानशोकसागरबुद्बुद परम्परायमाणबाष्पबिन्दुधारासाराभिषिच्यमानवसुन्धरामण्डलामभ्यर्थयते स्म तत्वमयैर्मधुररचनैर्वचनैः ।।१।।

अम्ब लोकोऽयं क्लेशभीरुः कृतघ्नस्सुखमात्रानुभवलोलुपस्स्नेहोचितमनुष्ठातुं कृत्यमक्षमो वन्ध्येनाश्रुपातनमात्रेण व्यञ्जयन् प्रेम रोदिति भवत्या तु कर्मभिरेव श्रेयोभिराचरन्त्या सकलमपि प्रेमोचितं न किमिवारचितं तद्येन भाष्पायसे नोचितमिदमन्यच्चावधेयमिह शोकोपहतैरपरमार्थवेदिभिर्लोकैर्गरिष्ठे निक्षिप्यते क्लेशे खल्वात्मा तदेतदति निष्फलमविद्वत्क्षुण्णापद्धतिरज्ञानसाहसं स्वर्गतस्य जनस्य न कञ्चिदपि निष्पादयति गुणं न तावत्तस्य दर्शनोपायः न धर्माभिवृद्धिहेतुर्न

In Public domain. Digitization Muthulakshmi Research Academy

च पुनरुज्जीवनौपयिककृत्यं न चोत्तमलोकावाप्तिनिमित्तमितरामेव निजनिजकर्मफलपरिपाकोचितामवश एव नीयते सरणिं दैवेन लोकः। न तावद्भवत्यै न केवलमीदृशमनुभूयते वैक्लब्यं स्मर तावत् कौसल्यां कुन्तीमुत्तराद्या अन्याश्च सुरासुर किम्पुरुषगन्धर्वसिद्धविद्याधरकन्यकाः पतिविधुरास्सहस्रशो लोकपरित्राणहेतोः प्राप्तधैर्या जीवन्तीः। बलवती खलु नियतिर्न खलु शक्यमुच्छ्वसितुमपि स्वेच्छया अतिदुर्ललिता-श्चास्या नितान्तकर्कशस्वभावाया विलासाः न सहन्ते द्राघीयांसं समयमनुपधि मनोहरं परस्परप्रेमाणं प्रायस्संसिद्धित एवाद्राघीयांस्य-काण्डभङ्गुराणि सुखान्यतिदविष्ठरूपाणि दुस्सहानि दुःखानि कथञ्चिदपि जन्मन्येकस्मिन् समागमो जननान्तरशतानि च विश्लेषः प्राणिनां परस्परमतो नोचितमनिन्द्यमात्मानं निन्दितुं स्मरन्ति हि नात्मानमवमन्येत पूर्वाभिरसमृद्धिभिरिति मन्वादयोऽपि भवपथावतीर्णानां हि मनुजानामेवं-विधाः खलु सर्वेषां रीतयः धीरस्वभावास्तरन्ति विपदमतो धैर्येण कथञ्चिदुपार्जितेनाज्ञया पत्युः प्रजानां रक्षणायावलम्ब्यतां तावद्राज्यतन्त्रं यावदेष तनुजन्मा सन्माननीयगुणः प्रभविष्यति स्वातन्त्र्येण पालयितुं राष्ट्रमित्यादिभिर्बहुविधैर्मृदुलैरुपसान्त्वनवादैराश्वास्य देवीं तां कथञ्चन साकं तेन कुमारेण विजयमुहूर्ते महोत्सवपुरस्सरमारोप्य सिंहासनं प्रदाप्य च मण्डलेश्वरप्रणिहितं पारितोषिकं विद्वत्कुलप्रदत्तमङ्गलाशासनाक्षतफलां तां सम्मान्य राजोचितोपचारैः प्राभृतप्रसारणादिभिस्तदनुचोर्जे मासि प्रथमदिने महति शुभमुहूर्ते कुलक्रमागतो वनपर्तिनगरे वासो राज्ञामित्यावेद्य प्रापय्य यथामर्यादं श्रीरङ्गपुरे श्रीमदुत्तररङ्गेन्द्रसन्निधिं तत्र

In Public domain, Digitization Muthulakshmi Research Academy

च यथाक्रमं प्राप्तञ्च शठकोपादिबहुमतिं सरभसमिलत्करितुरगरथ-पदातिसहस्रनिबिडितमुन्मस्तकप्रेङ्खदुद्दामपटहपणव वीणावेणुका-हलनिनदमुखरितदिक्तटं वनपर्तिराजधान्यामन्याहशं निजकुमारीसनाम-तया वात्सल्येन समाश्वासयितुं शङ्करीं देवीमुपागतमिव हिमाचलं चन्द्रमण्डलधवलं कमपि रामेश्वरेन्द्रेण प्रत्यग्रनिर्मापितं रामसागराख्य-सेनानिवेशस्थलीमध्यमध्यासीनमद्भुतं सौधमेतामवतारयामास परिवृतस्सर्वैः परिजनैः ॥२॥

पद्यम् ॥

आगोपालाविपालं प्रचुरतररसैश्शर्करालड्डुकाद्यै
रुद्दामैर्भक्ष्यजातैरमृतरसमयैः पायसाद्यैश्च सर्वान् ।
पौरान् सन्तोष्य तस्मिन्नहनि सविनयं तेन पुत्रेण साकं
देवी भद्रासनस्था कृतिकुलकलिताशीर्भरानग्रहीत् सा ॥७॥

सालावर्जङ्गभिख्यः प्रचुरतरमतिर्मन्त्रिराट् चिन्तयित्वा
तावद्रामेश्वरस्य क्षितिपकुलमणेः प्राज्यराज्याभिगुप्त्यै ।
तन्मन्त्रीन्द्रं गभीरानघसरसमतिद्रागुपाहूय तस्मात्सर्वां
तद्राज्यरीतिं सपदि तदुदितां सावधानोऽभिजज्ञे ॥८॥

बालं प्रत्यग्रजातं बहदुरुविभुना निश्चितं राज्यगुप्त्यै
श्रुत्वा श्रीशङ्कराम्बामथ च तनुभुवा तेन साकं प्रमोदात् ।
आगन्तव्यं जवादित्युदितबहुमतिप्रौढसंहृष्टचित्त
स्स्वस्मै राज्ञे निवेद्यादित इदमखिलं मन्त्रिराडाजुहाव ॥९॥

 In Public domain. Digitization Muthulakshmi Research Academy

तदनु सचिवश्रेष्ठस्याज्ञां गभीरमनोहरां
शिरसि रचयन्त्येषा देवी बहादुरुभूपतेः ।
वसु बहुवितीर्यारादुद्दामसैन्यनिरन्तरा
तमपि तनयं कृत्वोत्सङ्गे तदा नगरं ययौ ॥१०॥

गद्यम् ॥

तत्र च तन्मन्त्रिमुखादुपश्रुत्य भाग्यनगरं समया समुपागतां देवीं शङ्कराम्बां साकं कुलनन्दनेन रामकृष्णरायेण सहोदर्या च सचिवचूडामणिर्निवेद्य महाराजाधिराजमौलिडोलायमानमणिमालाचुम्बिशासनाय नासदौंलावनीन्द्रतनुजन्मने अब्जरद्धौलाभिधानाय भाग्यनगरराष्ट्रसाम्राज्यमभिरक्षते महीक्षिदग्रगण्याय तद्वृत्तं तदाज्ञया यथामर्यादमार्यगुणमिन्द्रजिद्बहदुरभिधानभाग्यनगरेन्द्रास्थानलेखकाग्रगण्यनन्दनं शिवराजबहदुरभिधानं साकं पृतनया प्रत्युद्गमनायानुशास्याकेशवगिरिनामनगरं प्रत्युद्गच्छता तेन च सबहुमानमुदारगभीरशताङ्गमातङ्गतुरङ्गतुङ्गतरमङ्गलतूर्यानिवार्यनिर्घोषबधिरिताष्टलोकपालपौरवर्गेण मार्गेण प्रवेशितां नगराभ्यन्तरविभासुरामुपकार्यां निशम्य तया च विनयमेदुरं तत्क्षणप्रेषितं निष्कमयमुपग्राह्यं प्रावेशिकमुपादाय निश्शङ्कं सादरमहो बत नैवमुपहारः कदापि कस्यापि राज्ञो न गृहीतो निर्विचारमनेन मन्त्रीन्द्रेण प्रतिभासान्द्रेण किमिदमकस्मादनादृत्य विचारान्तरमुपात्तोऽनया शङ्कराम्बया प्रेषितं प्राभृतं प्रायो रामेश्वरेन्द्रे बहुतराभिवृद्धस्य फलमेतत्प्रेम्ण इति प्रशंसमानेष्वन्योन्यं वदनानि विलोक्य विलोक्य भूपालेषु कतिभिश्चिदेव दिनैः प्रतिप्रस्थानाय दीयतेऽस्माभिस्सबहुमानमाज्ञेत्या-

In Public Domain, Digitization Muthulakshmi Research Academy

ज्ञाप्य तस्याश्च तादृशेन दाक्षिण्येन विनयेन शीलेन मधुरालापेन शुचित्वेन प्रशान्तिमत्त्वेन निरभिमानत्वेन महानुभावत्वेन विद्यापारगत्वेन पातिव्रत्येन च श्रूयमाणेनानुदिनमभिवर्धमानप्रमोदः उचितैषा धर्मपत्नी रामेश्वरेन्द्रस्येति प्रशंसमानस्तां विधाय च तत्तत्कृत्यविघातुकानां केषाञ्चित्सपत्नानां यत्नानयत्नादेव वन्ध्यानतिक्रान्तेषु च कतिपयेषु दिनेषूपाहूय साकं वेङ्कोबनायकेन महानुभावेन संसिद्धिविनीतेन मन्त्रिवरेण बालं रामेश्वरेन्द्रतनयं रामकृष्णरायमपरिपूर्णैकवत्सरमपरिमित-बलकलकलमसृणितेन पथा समुपागतं तत्तत्प्रदेशनिश्शब्दावस्थिताधि-कारिककोटिनिबिडितं निजास्थानं वेङ्कोबनायकपुरःप्रसारितनिष्क-परिपूर्णकोमलकमलशिशूदररुचिरतरसुकुमाराञ्जलिं लोललोललोचनं बालं तमुद्वीक्ष्य तदात्वोदितमिव दिनमणिं प्रफुल्लाभ्यां लोचनारविन्दाभ्यां मरन्दधारामिवानन्दभाष्पधारामुत्सृजन्नाश्लिष्य तमुपवेश्य निजाङ्के चिरमाघ्राय मूर्ध्नि सङ्क्रीडमानं सिंहासने यथेष्टमतिशैशवादनुपजात-साध्वसं महत्यप्यास्थाने निसर्गधीरप्रकृतिं विलोक्य विलोक्यासेचनकं लोचनयोस्स्मेराननस्साधु राजनन्दन साधु महाराजोऽसि त्वं सदृश एव जातोऽसि रामेश्वररायस्य तनुजो न खलु जायते रत्नसानुसानुनि महामणिमन्तरा यः कश्चित्प्रस्तरो विस्तरेण किमिति विलोक्य सर्वानयं किल बालको भविष्यति महाप्रभावोऽतिशेते च रामेश्वररायं गुणैर्महोदारै-र्नूनमिति पुनरुपादाय प्रदाय परिजनकरे दर्शयित्वा चान्तःपुराणां तैश्चोपलाल्य चिरमभिभूष्यातुल्यैस्तैस्तैर्वस्तुभिरादरेण प्रेषितमादाय पुनरङ्के निधाय मणिमयशेखरहार केयूरकटकाङ्गुलीयकादिभिरभिभूष्यभूषणे-

 In Public domain. Digitization Muthulakshmi Research Academy

स्स्वयमेव चित्रीयमाणस्तस्य राजबालस्य जन्मसिद्धयात्यन्तधीरतया सम्मान्यान्यराजदुर्लभैः पारितोषिकैरभिभूष्य च वेङ्कोबनायकप्रभृतीन् यथामर्यादं राङ्कवाद्यैर्वस्तुभिः राजत्वबोधकमुद्राङ्कितं प्रदाय शासनपत्रमयं खल्वद्य प्रभृति सवै राजाबलवन्तबहिरीबहदुरित्यादिबिरुदाभिरामो वनपर्तिराज्यलक्ष्मीशिरोमणिरप्रमत्तेन च भवितव्यं भवता मेधावता-मग्रगण्येन रामकृष्णरायराज्याभिगुप्त्यै किं बहुनेति वेङ्कोबनायकमाज्ञाप्य तथाभूतेन च तस्य तत्तत्कालोचितोत्तरोत्तरसुयुक्तियुक्तोत्तरप्रदान-कृतमुखत्वेन विनीतिमत्त्वेन मनोहरालपत्वेन चाह्लादितोऽनवधिकं कल्पितोऽसौ भवद्भी राज्यरक्षणार्हो महाराजो नयन्त्वस्मत्सेनान्यमन्यं न वीक्षामहे रामेश्वरेन्द्रसदृशं क्वापीति विक्लबाक्षरमभिधाय वचनं क्षणं जोषम्भूतोऽनन्तरञ्च सम्प्रेष्य शङ्कराम्बायै जानक्यम्बायै च पारितोषिकाभरणानि महार्घाण्यनुजज्ञे च कुम्भीन्द्र सम्भृत-कनकमण्डपारोहणपूर्वकं महोत्सवेन निजराष्ट्रं प्रतिगन्तुमादरादगृहीतोप-ग्राह्यमेव प्रादत्त राज्यमस्मै कुमाराय मन्त्रीश्वरोऽयं न खल्वन्येन केनापि भूपालेन सुलभमधश्शीर्षं कृततपसाप्येवंविधबहुमानावलम्बनं चिरागता वयं प्रतीक्षमाणास्तद्दर्शनाय नाद्यापि वीक्षामहे पारङ्कृत्यानामयं तु ह्यो वा परह्यो वा समागतः पश्यतामस्माकमसम्पूर्णैकवत्सरो रामेश्वरराजसिंह-बालो बहुमानितो निश्शङ्कं मन्यामहे च बहिरीराजविक्रमपरितोष विवशोऽयं महाराजेन्द्रसचिव इति भागधेयं हि तादृशं वनपर्तिमहाराजानां किं कुर्मो वयमयमेव खल्वागर्भश्रीमच्छब्दवाच्यो राजशिशुर्निजतात-मनुहरते सर्वैरपि क्रमैरिति वदत्सु तेषु तेषु भूपालेष्वाश्चर्यलोलेषु ॥३॥

In Public domain. Digitization Muthulakshmi Research Academy

पद्यम् ॥

बालचन्द्रं वलक्षच्छद इव नृपतेर्नन्दनं प्राप्तराज्यं
मन्त्री वेङ्कोबनेता समदकरिवरं तं समारोप्य पश्चात् ।
तस्यैवासौ निषण्णः प्रचलति च बलेऽथोत्किरन् रूप्यबृन्दा
न्यानिन्ये शङ्कराम्बासविधभुवमतिस्मेरचित्तोऽप्रमत्तः ॥११॥

तदनु निशम्य पत्र मुखतो वनपर्तिपुरे
तमिममुदन्तमात्तकुतुका बहुशोऽधिकृताः ।
अभिनवजां सुकीर्तिमिव राजसुतस्य सितां
शकटिभिरास्वराष्ट्रमभितो व्यतरन् मधुराम् ॥१२॥

धन्योऽसौ राजपुत्रो बहदुरुबहिरीशब्दभाङ्मण्डलेन्द्रा-
न्नूनं श्रीशङ्कराम्बा प्रचुरतरलसद्भागधेयैकसीमा ।
या दुष्प्रापां चिरायाप्यधिगतयतनैर्भूमिपानां सहस्रैस्सर्व-
श्लाघ्यां प्रपेदे बहुमतिमचिरात्तां किमन्यद्वदामः ॥१३॥

देवीमानेतुकामाः कतिचन तुरगा दन्तिनस्स्यन्दनाश्च
प्रत्युद्याता जवेन प्रतिनगरमथान्ये च तस्यास्सदेशात् ।
एते प्राप्तास्तुरङ्गा अधिकृतपुरुषास्सर्वतोऽखर्वहर्षा
भृत्याः प्रत्यागताद्राङ्नगरपथपरिष्कारहेतोस्त्वरन्ते ॥१४॥

प्रायो द्वित्रैर्दिनैर्वा त्रिचतुरदिवसैः पञ्चषैर्वापि घस्रै-
रद्य श्वो वापि देवी सहसुतसचिवानन्दयेल्लोचने नः।
इत्येवं तत्र तत्र प्रतिपदमिलिता हन्त पौराः कथञ्चि
त्तन्मार्गं वीक्षमाणाः कतिचन दिवसान्निन्यिरेऽनन्यचित्ताः ॥१५॥

In Public domain. Digitization Muthulakshmi Research Academy

गद्यम् ॥

एवं प्रतीक्षमाणेषु प्रतिक्षणं कृतक्षणेषु निजराष्ट्रियजनेषु हृष्टमानसेषु तत्र तत्रेन्द्रजिद्बहदुरुप्रमुखाध्यक्षजनसम्मान्यमानेन प्रतिदिनं जगदानन्दनेन निजनन्दनेन सह पुरस्कृत्य श्रेयस्करजननायकं वेङ्कोब-नायकं प्रस्थाय संस्थायिना मनसा घनसाभिलाषहृदयैस्तत्रत्य-जनसमुदयैरभिप्रशस्यमानसुगुणगणभाग्याभाग्यनगरादगरीयसा समयेन हर्षरसमयेनारुह्यान्दोलिकां प्रत्युप्तरत्नपालिकां मरालिकाबालिकाकाय-कान्तिभङ्गदायकामलधामराजिताभिश्चामरावलीभिरभिवीज्यमाना प्राज्यमानार्हमनीषिजनेषितार्थप्रदाननिदानचित्तवृत्तिरुत्तरोत्तरोत्तरङ्गित-नृत्तमत्तहस्तिदृप्तसप्त्युदात्तपत्तिनिबिडितोपान्त सुरपथातिगरथावलिशतो-दञ्चितमहाकोलाहलजालातिबधिरीकृतलोकपालपुरलोकजाला समुल्लसच्चन्द्रकशतसान्द्रेण बर्हिबर्हातपत्रविशेषेण परिष्क्रियमाणोर्ध्वभागा विजयस्व चिरं सुखं जीव सहपुत्रेति जनैराशास्यमानवृद्धिर्वृद्धैरनुद्धत-रूपाकोपाटोपावलेपातिदवीयसी निजराष्ट्राभिमुख्योन्मस्तककुतूहलाश्ववार सहस्रातिरभसप्रधावितासङ्ख्येयतुरङ्गबलखुरपुटतलाहतिविलोडितधरामण्डल-निबिडोत्पतद्धूसरतर धूलिपालिप्रावृषेण्यमहानदीप्रत्यग्रजलप्रवाहोर्ध्वभाग-प्लवमानेन्दीवरायितनिर्मलगगनतला यावद्धनपर्तिराजधानी सम्मुखीना भवति शुभतरसम्पत्कदम्बा शङ्कराम्बा तावत्परिष्कृतनगरैरापञ्चषयोजन-मात्रिभागमार्गमाद्वित्रयोजनमायोजनं वा यथाकुतूहलं प्रत्युज्जग्मुरुपदा-हेतोरुदञ्चित मणिहारा उत्तानिताङ्गुलीयकाः प्रसारितनिष्काञ्जलयः प्रदर्शितरूप्यराशयः आवर्जितकुसुममालास्सम्भृतविविधफला गृहीत-शर्कराः उपात्तसुगन्धिचन्दनास्सज्जीकृतनिर्मोकपरिलघुचीनाम्बरा-

In Public domain. Digitization Muthulakshmi Research Academy

स्सम्पन्नवेषा उत्कूलिततोषाः आबालवृद्धं रामचन्द्रनायकप्रमुखा आसन्दर्शनमधिकृतजना घनाः।

पद्यम् ॥

दूरादेव विनम्रमौलिशिखरैरङ्गीकृतप्रश्रयै
स्तैस्तैरर्पितमादरादतितरोत्फुल्लेक्षणोपायनम् ।
आदायाथ सनन्दना तदुचितं सम्मान्य राज्ञीमणि
स्तान् पुत्रान् जननीपवत्सलतया प्रेमार्द्रमभ्यैक्षत ॥१६॥

दधिफलकुसुमाज्यमुख्यवस्तून्युपहरतोप्यवमंस्त नैव देवी।
धनिनि तदितरेऽपि वा सवित्री भवति जगत्यविशेषवत्सलैव ॥१७॥

एवं सा तत्र तत्र प्रतिपदमधिकं सम्मिलद्भिर्जनौघै
रुत्तानाक्षैरुदञ्चद्बहुतरकुतकैर्हर्षबाष्पायमाणैः।
ग्रामीणैर्नागरैरप्यतिरभसवशप्रोच्चलद्दण्डकेतु
व्यूहो ग्रोद्यत्पताकैस्सह तुरगबलैस्स्वां पुरीमाससाद ॥१८॥

गद्यम् ॥

अथ तत्र यथाप्रदेशस्थापितगुल्माभिरक्षणशिक्षितदोर्दण्डमूलोद्दण्ड-गृहीतनलकसशिरस्त्राणयामिकजनयथासमयाघट्यमानकालपरिच्छेदक-कांस्ययन्त्रमांसलसमुद्बुद्धदीर्घदीर्घटाङ्कारनिशमनावसरसङ्ख्यागणनन्युब्जी-कृताङ्गुलिदैवज्ञजननिवेद्यमानसुमुहूर्तसमया देवी शङ्कराम्बा समारूढा-न्दोलिका साकं वेङ्कोबरामचन्द्रनायकाभ्यामधिरूढगन्धसिन्धुराग्रसुन्दर-कनकमण्डपं द्वयोरपि रामकृष्णयोरभिधानमनेनैकेनैव राजनन्दनेन

In Public domain. Digitization Muthulakshmi Research Academy

विधृतमित्याश्चर्येण स्वयमपि जवेन तदवतंसतामवलम्बितुमात्त-कुतूहलतयेव शिरोभागाधिरूढेन च्छत्रविशेषरूपेण पिञ्छनिचयेन समुल्लसन्तं वीज्यमानञ्च मृणालसूत्रैरिव निर्मिताभ्यां चामराभ्यामुद्दण्ड रजतदण्डधरप्रतिहारपालजनप्रतिक्षणनिर्दिश्यमानप्रणमत्तत्तदध्यक्षनामधेय-श्रवणदत्तावधानकुतूहलं भुजानुद्यम्योद्यम्य पठद्भिर्विजयस्व महाराजपुत्रेति बिरुदपद्यानि वन्दिभिरभिष्टूयमानं सर्वतो ध्रियमाणसमुदग्रकुन्ताग्र-प्रफुल्लानां दिनमणिकिरणगणप्रतिफलनथलथलायमानानां वज्रायुध-शकलैरिव विरचितानां प्रत्यग्रशाणोल्लिखितानां कालायसरचितानां फलककन्दलानां दिशि दिशि विसरन्तीभिः प्रभाभिर्विद्युल्लतास्फुरितमिव दिङ्मण्डलं विदधानैर्भटैः पङ्क्तीभूतैरन्वीयमानं पूर्वं हि रामकृष्णाभ्यां निर्धूतोऽस्मत्कुलकूटस्थ इदानीं तु धृततदुभयनामायं राजबालः किङ्करोति वेति भिया प्रसादनाय मिलितानामिवादावेव कालयवन-कुलीनानामलीनशौर्याणामुद्दण्डहुङ्कारसहचरढक्कानिनादानां महागजाना-मिव कौतुकादवलम्बितमनुजविग्रहाणामुद्दीपितचटुलनलकपटलपट-पटात्कारत्रुटितदिक्सन्धिबन्धानां मदान्धानामञ्जनाचलशिखराणामिव जङ्गमानां दर्पोद्भटानां भटानां सहस्रैरावृतपूर्वपश्चिमोत्तरदक्षिणदिग्भागं पुरस्कृत्य सुकुमारं कुमारं रामकृष्णरायं प्रविश्य वनपर्तिनगरमध्यं तत्र तत्र सौधाग्रमारोहन्तीनामरूढानाञ्च परित्यक्तसकलगृहव्यापाराणामपार-कुतूहलानामन्योन्यस्कन्धाग्रनिवेशित वदनचन्द्रबिम्बतया परस्पर कपोलद्विगुणितकुण्डलकर्णपत्रादिविभूषणानां नीलोत्पलमालिका इवोपहरन्तीनामपाङ्गमरीचिनिचयैरियं किलास्मदम्बा शङ्काम्बा चिरादुपागता यया विना युगसहस्रमिव निमिषमप्यपश्याम पश्यतेतश्च

In Public domain. Digitization Muthulakshmi Research Academy

नायकाविमौ शरत्समयशुक्लपक्षाविव कुमुद्वतीबन्धुकन्दलं राजनन्दनं बहदुरुबहिरीबलवन्त बिरुदाभिरामं रामकृष्णरायं पुरस्कुर्वन्तौ गुणवन्तौ किरन्तौ यथेष्टं भिक्षुकेभ्यो लक्षाधिकानि रूप्याणि शिशिरयेते अन्तरङ्गं पश्यतां जनानामनयोश्चाग्रतोऽतिबालस्यापि लोकपालांशनिर्मिततया निश्शङ्कं करिवराग्रकनकमण्डपे निषण्णस्य सस्मितं तांस्तान्यथाक्रमं विलोकमानस्य विदिततत्तदुचितकृत्यस्येव राजनन्दनस्य सौवर्णशीर्षण्ये प्रतिबद्धो महार्घोभाग्यनगरेन्द्रेण प्रदत्तो वज्रावतंसः कुमारोऽयं तारकजयीयशसाभिवर्धत इति वात्सल्यवलिततया मूर्धानमाजिघ्रन् कृत्तिकातारकापुञ्जगुलुच्छ इव शोभते अपि चास्य विराजते वदनकमले अभिवर्धिष्यमाणवीररसमहीरुहाङ्कुर इव तप्तस्वर्णश्श्रीचूर्णतिलकः पुनस्तरामितश्च पश्यतैनं तत्पश्चाद्वेङ्कोबनायकं महोदारगम्भीरशीलं सरसजनलोलं राधाम्बाबालं पालितविद्वज्जालं अयमेव खलु मन्त्रीति व्यपदेशमर्हति किमन्यैर्धन्यम्मन्यैर्यदेष सपत्नानामितरजनदुर्निग्रहान् दुष्प्रतिबन्धानुत्सार्यलीलयैव मेधाविनामग्रणीरावर्ज्य स्वगुणैर्मण्डलेन्द्र-सचिवेन्द्रदयामनितरसुलभां रामेश्वरेन्द्रादपि द्विगुणाभ्यधिकां प्रतिष्ठा-पयत्यमुं राजबालकं साम्राज्ये नूतनेन खल्वपश्याम पश्यामो द्रक्ष्यामो वा जगति कृतज्ञशिखामणिमीदृशं य एष महाराजेनानुज इति पोषितस्तदनुरूपमेव राज्यभारं निर्वहति मन्यामहे चोदरभेदेन जनितं केनापि कारणेन भ्रातरं साक्षाद्राजेन्द्रस्यामुं साधु विरचितममुना साहसं रामकृष्णेन्द्रसाम्राज्योद्धाराय किं बहुना सुगुणनिधयेऽमुष्मै सतत-माशास्महेऽत्यन्तशुभानि प्रतिपदं भूयासुरिति चिरादेधतामयं रामकृष्णरायमभिरञ्जयन् साचिव्यसाम्राज्ये किं पल्लवितेन धन्यो

In Public domain. Digitization Muthulakshmi Research Academy

रामेश्वरेन्द्रराष्ट्रजनः यदेवं विधा तद्देवी दयालुहृदया तन्नन्दनश्चायं दर्शनीयो भूष्णुः तत्सचिवश्चायं महोदारो जनक इव निरन्तरब्रह्मविद्या विचारनिर्वृतान्तःकरणो भगवद्दिव्यगुणचन्द्रिकानुभवद्रवीभूतहृदय-चन्द्रकान्तः कान्ततररूपो निर्धूततापो दूरीकृतकोपोऽस्पृष्टपापोऽस्मृता-वलेपो नित्यमानन्दयति भुवनमित्यादि बहुविधं परस्परं सल्लपन्तीनां कान्तानां सहास्त्रैरभिवृष्यमाणे लाजकुसुमवर्षे उचितैषा धर्मपत्नी रामेश्वरेन्द्रस्य युक्तोऽयं कुमारश्च अर्हत्तमोऽयं सचिवश्चेति तरलितशीर्षं श्लाघमानाभिरिव मन्दानिलान्दोलितशिखाभिर्दीपमालिकाभिर्दर्शनी-यासु प्रतिगृहप्रतिहारभूमिषु रम्भास्तम्भवन्दनमालिकाविभूषितासु शरीरपूरणावशेषितलावण्यखण्डानिव विद्युल्लताद्युतीन् दीपाङ्कुरान् हिरण्मय भाजनान्तरालेषु विन्यस्य सुस्वरं गायन्तीभी रमणीभिः क्रियमाणासु मङ्गलनीराजनासु परिचक्राम क्रमेण पुरवीथीषु वैभवेन महता समुल्लसता ॥६॥

पद्यम् ॥

अथ किल निजसौधप्राप्तिदत्तान्तरङ्गा
भवति नृपतिदेवी शङ्कराम्बापि यावत् ।
सकुतुक परिकीर्णाः किं भुवा किन्नुदिग्भ्य
स्तदभिमुखमपारास्तावदश्वाः प्रचेलुः ॥१९॥

अभितः प्ररूढदूर्वाचिकुरान्तं भासुरेण वसुमत्याः ।
सीमन्तेनेव पथा महता ऋजुनाभिसौधमवलत सा ॥२०॥

In Public domain. Digitization Muthulakshmi Research Academy

निर्मलनिस्तलसौधे सितकरबिम्बभ्रमात्समवतीर्णम् ।
परितः परिवेषमिव प्राकारं विमलमविशदम्बा सा ॥२१॥

तदोद्धुक्षितानां शतघ्नीशतानां घनानां निनादा जनानां समन्तात् ।
सहस्राणि हृष्टानि चित्रं वितेनुः प्रविष्टे प्रहृष्टे पुरं तत्कुमारे ॥२२॥

अपरिमितकरितुरगरथनिबिडिता सा
धरणिपतिमणितनुजवरविपुलसेना।
पुरवरणमुखमविशदचिरमथ जह्नो
र्वदनमिव विबुधसरिदुदितबहुनादा ॥२३॥

गद्यम् ॥

अवतीर्य चान्दोलिकाया मन्दं मन्दं देवी शङ्कराम्बा शनैश्शनैर्हास्तिपकन्युब्जीकृतादाकुञ्चितपूर्वपदान्नीचीकृतशरीर पश्चार्थादुदारान्मदावलादवतारितेन सह मन्त्रिवरेण कुमारेण रामकृष्णरायेण साकं महाजनकदम्बनिभपारावारमध्यरिङ्खत्तुरङ्गतरङ्गपरस्परास्फालनोत्क्षिप्तमहारत्नसन्देह सन्दायिप्रदीपरेखाप्रभासरस्वतीमिलितविबुध तरङ्गिणी संशयवदान्यायां ज्योत्स्नायामुच्चैरावेदयत्सु सावधानपादविन्यासं किङ्करेषूद्धूयमानचामराभ्यां सर्वतो नीराजयन्तीषु सुस्वरं कलकण्ठीषु धृतदीपाङ्कुराभिरामकनकभाजनास्वम्बुजलोचनास्वारुह्य सोपानमार्गेण मन्दं मन्दं तदद्भुतमपरिमितमत्युदारमतिगभीरमतिमनोहरमतिधवलतया चन्द्रमण्डलादिव विगलितं स्फटिकाचलादिवोत्कीर्णं क्षीरार्णवेनेवोत्क्षिप्तं गङ्गयेव प्रसूतं पुण्डरीकैरिव निर्मितं मल्लिकाभिरिव ग्रथितं शारदनीरदैरिव कल्पितं कर्पूरपरागराशिभिरिवोदञ्चितं श्रीचन्दनपङ्कैरिव चर्चितं

In Public domain. Digitization Muthulakshmi Research Academy

अमृतेनेवाभ्यक्तं वज्रानिव विद्राव्य रचितं सकललोकपुण्यराशिमिवैकत्र मूर्तीभूयावस्थितं ऐरावतमिव हठाच्युतं गगनतलाद्रामेश्वरेन्द्रदोर्दण्ड-निगृहीतानेकदुर्दान्तसामन्तराजसहस्रसैन्यतया लघूकृते धरणीभारे साश्चर्यं द्रष्टुं तत्पुरीमुद्गतमिव निर्भिद्य धरणितलं फणाभृदधिराजं किं बहुनान्तः प्रविष्टानां श्वेतद्वीपप्रविष्टा वयमिति मतिमङ्कूरयन्तं एकदेशजागरूक यामिकजनानुपदपरस्परनिवेद्यमाननिजनिजयामव्यायामपरिवर्तन विचारं क्वचित्ताद्दशगभीरवीणावेणुमृदङ्गदुन्दुभितूर्यझङ्कारनिशमनसमुद्बुद्धक्रीडा-मयूरशुककपोतमनोहररसितविलसितं महोत्सव विलुलोकिषा समागत-तटिल्लतासच्छात्रकान्तिसुरकन्यकाशताधिष्ठित विचित्रकिङ्किणीघटित-वज्रविमानशङ्कावदान्यैर्निर्भरसमेधमानदीपकलिकागर्भैर्नानावर्णस्फटिक-घटिकागुलुच्छपरिगतै स्फटिकदीपभाजनविशेषैरन्यैश्चान्यैश्च नानावर्णै स्स्फाटिकवृक्ष विशेषैः थलथलित दिङ्मण्डलम् आस्तीर्णविविधविचित्ररत्ना-स्तरणमारोपितरत्नदीपशतसहस्रं सर्वतस्समुद्घाटितानेककवाटतया चिरादुपागतां सह कुमारेण सह सचिवेनात्मानं सादरं विस्फार्य लोचनानीव विलोकमानं एकदेशोपक्रान्तहूणनिर्मित रागमालिकागभीरललित-निनादमनोहरं प्रतिमुक्तनानाविध चित्रप्रतिमाभिस्सजीवाभिरिवाश्चर्य-स्तब्धाभिर्निर्निमेषं विलोक्यमानं किमति वादैस्सकललोकाश्चर्यराशि-मिवैकत्र मिलितं प्रत्यग्रनिर्मापितं रामेश्वरराजशेखरमणिना दिव्यं प्रासादमासाद्य निषण्णा चाद्भुतनिर्मलभद्रासने साकं कुमारेण विद्वज्जन-विरचितमङ्गलाशासना साञ्जलिबन्धं विसृज्य सर्वांस्तान्यथोचितमन्यांश्च सम्मान्यात्यवीवहत्तां यामिनीं भामिनीमणिः ।।७।।

In Public domain. Digitization Muthulakshmi Research Academy

पद्यम् ॥

सर्वाशा महता धनेन यशसाप्यापूरयन् सन्ततं
संरक्षन्महतीं नयेन विनयेनापि क्षमां भूपतेः।
पुत्रोऽवर्धत रामकृष्णनृपतिश्श्रीशङ्करांबाह्वत-
श्शुक्तेर्गर्भ इवैष मौक्तिकमणिस्तस्मिन्महीक्षत्कुले ॥२५॥

प्रभवशरदि तस्यामाश्विने मासि हर्षा
दथ विजयदशम्यां रत्नपीठे तमेनम् ।
नृपसुतमुपवेश्य स्वच्छगङ्गादितीर्थै
रभिषिषिचुरुदारा वेदविन्मन्त्रिपौराः ॥२६॥

गद्यम् ॥

आरूढे च तस्मिन् कुलक्रमागतं साम्राज्यसिंहासनं रामेश्वरेन्द्र-कुलनन्दने रामकृष्णराये तद्भुजाग्रपीठीं वसुधा तन्मूर्धानं मणिमयमकुटी ताश्च द्विजकुलकलितमङ्गलाशासनाक्षताः कुतूहलभरश्च शङ्कराम्बाहृदयम् आनन्दबाष्पश्च पौरजनलोचनानि अभिनवरागरञ्जिता तन्मुद्रा च शासनपत्रशिरांसि आज्ञा च तस्य सामन्तराजमौलिवलभीशिखराणि तन्मित्रमनोरथाः परं पारं तत्साचिव्यभारश्च वेङ्कोबनायकोत्तमाङ्गन्तर्य-शांसि दिक्कान्तामकुटीतटानि तद्गुणाः सहृदयजनमनस्सौधांस्तद्विर्ण(?) पारितोषिकराङ्कवहारसहस्राणि विद्वदधिकृतकदम्बशरीराणि तद्विपक्षाश्च वनगिरिशिखरदुर्गाणि युगपदेवारुह्य खेलन्ति स्म सन्ततम् ॥८॥

In Public domain. Digitization Muthulakshmi Research Academy

पद्यम् ॥

श्रीरामेश्वरराजवंशतिलकश्श्रीशङ्कराम्बात्मज
श्श्रीवेङ्कोबसमाख्यनायकमणौ स्वं राज्यलक्ष्मीभरम् ।
विन्यस्य प्रमदेन मन्त्रिणि घनं श्रीरामकृष्णप्रभु
र्गोपायन्वनपर्तिनाम्नि नगरे भूमीं चिरादेधते ॥२७॥

सह परिवाराय पुनस्सह राष्ट्राय क्षमापतीन्द्राय ।
सह सचिवायामुष्मै स्वस्त्यस्तु खगाद्रिनाथहरिकृपया ॥२८॥

गरुडगिरिशिखरधाम्नो धाम्नो दयया समेधमानस्य ।
श्रीरामकृष्णनेतुश्श्रेयांसि चिराद्बहूनि वर्धन्ताम् ॥२९॥

इति निजभक्तशिखामणिराजेन्द्रचरित्रवर्णनेन परम् ।
उत्तररङ्गाधीशः प्रियतां भगवान् श्रिया सह चिराय ॥३०॥

श्रीवासब्रह्मतन्त्रादिमपदकलिजिद्देशिकेन्द्रानघाङ्घ्रि
द्वन्द्वाब्जानुग्रहात्तप्रतिपदविविधग्रन्थनिर्माणशक्तिः।
हर्षाच्छ्रीरामकृष्णावनिपतितिलकास्थानकव्यग्रगण्य-
श्श्रीमत्प्रत्यग्रदुर्गस्थितिरिममतनोत्कृष्णनामा प्रबन्धम् ॥३१॥

यं वासरमभिषिक्तश्श्रीमान् राज्ये स रामकृष्णेन्द्रः ।
तं वासरमेव जवाद्ग्रथितो रामेश्वरेन्द्रविजयोऽयम् ॥३१॥

रचयामि मस्तकेऽञ्जलिमचमत्कृतिरपि कृतिर्मम मुखोत्था ।
त्रिचतुरगुणहीनापि च सुचतुरमतिभिर्विलोक्य तां कृतिभिः॥३३॥

In Public domain. Digitization Muthulakshmi Research Academy

प्राचीनमेव कवनं मधुरं न नवीनमिति कृतिप्रवराः।
भवतां हृदि मा भवतादभिनवमपि मधु कथं न मधुरं स्यात् ॥३४॥

किं पल्लवितेन ॥

न प्राचीनत्वं वा नव्यत्वं वापि रम्यता हेतुः ।
गुण एवैको ग्रन्थं गुणिनो निष्पक्षपातमीक्षध्वम् ॥३५॥

जयतु भुवि वदान्यश्रेणिमूर्धन्यलक्ष्मी
र्जयतु जयतु वाचां सौरभी सत्कवीनाम् ।
जयतु जयतु विद्यापक्षपातो जनानां
जयतु च वृषशैले वैभवैश्श्रीनिवासः ॥३६॥

रामेश्वरविजयेऽस्मिन् द्वादशमुल्लासमतनुत विलासात् ॥
प्रत्यग्रदुर्गकृष्णस्समस्तकविगण्डभेरुण्डः ...

इति श्रीशैलकुलतिलकप्रत्यग्रदुर्गतातार्यवर्यद्वैतीयीकनन्दनस्य कृष्णाम्बागर्भशुक्तिमुक्ताफलस्य कृष्णकविसार्वभौमस्य कृतिषु रामेश्वरविजये चम्पूप्रबन्धे सप्तदशे कुमाराभ्युदयोल्लासो द्वादशः ....

समाप्तोऽयं कृष्णकविकृतस्सप्तदशः प्रबन्धः

श्रीमते श्रीनिवासब्रह्मतन्त्रपरकालमहादेशिकाय नमः ॥

श्रीमते श्रीनिवासाय परब्रह्मणे नमो नमः ॥

श्रीरस्तु ॥ मङ्गलानि भवन्तु ॥ श्रियै नमः ॥

रामेश्वरविजये - १२ - कुमाराभ्युदयोल्लासः ॥

॥ समाप्तः ॥

In Public domain. Digitization Muthulakshmi Research Academy

अक्षरक्रमानुगतश्लोकसूची

श्लोकः	वृत्तम्	श्लोकसङ्ख्या	पुटसङ्ख्या
रामेश्वरविजयाख्यश्चम्पूप्रबन्धः ॥			
अथापि ग्रन्थेऽस्मिन् गरुड	शिखरिणी	१३	3
अम्भोजव्रजदर्पडम्बरममू	शार्दूलविक्रीडितम्	१	1
कान्तां रमां यस्य समग्र	इन्द्रवज्रा	२९	8
काप्यागच्छति मामकीनभवनं	शार्दूलविक्रीडितम्	४	1
कृष्णागोदावरीसंवलयित	स्रग्धरा	१९	7
गिरिं हस्ते धत्तां धरतु	शिखरिणी	८	2
चतुराननोऽपि यस्मिन्नेकां	आर्या	२१	7
जघन्यां जायां मामभिदधति	शिखरिणी	३९	11
तटाकान्निर्माय क्षितिपतिरसौ	शिखरिणी	३३	10
तपस्तप्त्वा यस्मिन् सुचिरमथ	शिखरिणी	२२	7
तावच्चिन्तयते नृपाय भविता	शार्दूलविक्रीडितम्	४४	14
नागान्तकगिरिरयमिति भियास्य	आर्या	२३	7
नितान्तं ज्योतिष्मानपि	शिखरिणी	४८	16
निरवर्तत तुरगगतः पुरमभिगन्तुं	द्रुतविलम्बितम्	५३	17
निर्व्याघातसुधामुखाम्बुलहरी	शार्दूलविक्रीडितम्	२६	3
न जातोऽस्मद्गर्भे शिशुरिति	शिखरिणी	४३	14
नृपतिस्तुतिकृत्कृतिकुलनिन्द	आर्या	११	3
पुरमथ प्रतिपद्य महामनाश्चिरमयं	द्रुतविलम्बितम्	५४	17
प्रजानां सन्तन्वन्विभवमधिकं	शिखरिणी	३६	11
प्रत्येकं परिगृह्य तत्तदुदिताभि	स्रग्धरा	३५	11
प्रबुद्धोऽसौ दध्यौ	शिखरिणी	४०	13
प्राक्तनकृतेर्निशमनादपि	आर्या	१४	3
प्राचीनानलधर्मजार्जुनमुखा	शार्दूलविक्रीडितम्	९	2
बहुमुखरिपुबाणकरप्रजलवन	आर्या	३१	10

Public domain Digitization Muthulakshmi Research Academy

श्लोकः	वृत्तम्	श्लोकसङ्ख्या	पुटसङ्ख्या
भूतभविष्यत्कालौ न्यविशेतां	आर्या	३७	11
यथात्थ श्रीमंस्त्वं धरणिपतिमूर्धन्य	शिखरिणी	४७	16
युक्तमयङ्गरुडाख्यस्सुशोभनखराजि	आर्या	२५	8
यद्वस्तु यत्र भव्यं तत्तत्रैव	शार्दूलविक्रीडितम्	५०	16
रमणाम्बपिचभूमीरमण	आर्या	४५	15
रसं रसज्ञस्सरसेक्षुखण्ड	उपेन्द्रवज्रा	१७	3
लेभे देशानलब्धानतिचतुरमतिः	स्रग्धरा	३२	10
लसदरिचक्रां गरुतस्सेनां	आर्या	२०	7
वयमेव रामकृष्णावनिपाल	आर्या	५१	16
वयं धन्या नूनं बत	शिखरिणी	४१	13
वर्षासम्जृम्भमाणानिलवलय	स्रग्धरा	५	2
वादाः कुदृशां शमिता	आर्या	६	2
विचित्रं जानीते चरितमिह	शिखरिणी	४२	13
शिशिरान्तरङ्गरीतिं बिभ्राणास्तै	आर्या	३४	10
शेमुष्याचूष्य भाष्यं	स्रग्धरा	७	2
श्रीमन्तः परिपूर्णसद्गुणगणा	शार्दूलविक्रीडितम्	१०	2
श्रुत्वा तद्वचनमथ प्रहर्षिणीं	प्रहर्षिणी	५२	16
सकलभुवनभारवाहशीर्षं	पुष्पिताग्रा	३	1
सच्चक्राणां प्रमोदं कलयति	स्रग्धरा	३०	10
सच्चरितदत्तहृदयानाचारम्ब्येमुष्य	आर्या	३८	11
स्पष्टं भगवद्वदितं हन्त नराणां	आर्या	१२	3
सरसकवितासारास्वादा	हरिणी	१६	3
सरसकविवचन परिमल	आर्या	१५	3
साञ्जलिबन्धा वचनैर्मञ्जुतरैस्सा	आर्या	४६	15
सिन्धुक्षारजलावसन्नरसनस्ता	शार्दूलविक्रीडितम्	२८	8
सिन्धुमिवास्मद्ग्रथं मन्थानेनेव	आर्या	१८	7

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	वृत्तम्	श्लोकसङ्ख्या	पुटसङ्ख्या
सोऽयं सदाशुकविराजितशाखिबृन्द	वसन्ततिलका	२४	7
सोऽयं सद्मनि मादृशां	शार्दूलविक्रीडितम्	४९	16
हरिं नीलं रत्नं गिरिशिरसि	शिखरिणी	२७	8
हृदये हि राजभासुरमञ्चमुदारं	आर्या	२	1

रामेश्वरविजये - २ - प्रादुर्भावोल्लासः

श्लोकः	वृत्तम्	श्लोकसङ्ख्या	पुटसङ्ख्या
अत्यर्थोदग्ररामेश्वरबल	स्रग्धरा	५७	31
अदो भुजच्छायसमाश्रयाद्भवेत्सदा	वंशस्थम्	१२	19
अतिहृद्यः कृतविद्यो	आर्या	४२	23
अमुष्य दोर्दण्डबलेन निर्भयं	वंशस्थम्	११	19
आक्रान्ता राजहंसैर्धरणि	स्रग्धरा	३३	22
आत्ममनोरथलतिकास्सफला	आर्या	१५	20
आदौ पदानि मन्दंमन्दं	आर्या	३०	22
आमोदयति स्म परं	आर्या	२६	21
उद्भासिधेनुकोटिप्रदानमय	आर्या	२२	21
कर्णे कर्णे ब्रुवत्यः किमपि	स्रग्धरा	१६	20
कीदृक्षं नृपबालशौर्यमिति	शार्दूलविक्रीडितम्	४८	27
कृत्वाप्येतेऽतनुश्रीहरणमिह	स्रग्धरा	५४	29
को वायं राज्यमापेत्य हह	स्रग्धरा	२०	20
गुणास्तस्मिन् सर्वेऽप्यहम	शिखरिणी	४५	24
जगति सलिले प्रसन्ने	स्रग्धरा	९	19
जातस्सम्प्रति बालको	शार्दूलविक्रीडितम्	८	19
जानुभ्यामथ सञ्चरन्तमवनी	शार्दूलविक्रीडितम्	२८	22
तच्छासनेन सैन्यैराच्छाद्य	आर्या	४९	27
तस्मिन्वनपर्तिपुरे विस्मयविवशा	आर्या	१८	20
तनुजमथ जातमात्रं मात्रा	आर्या	१७	20

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	वृत्तम्	श्लोकसङ्ख्या	पुटसङ्ख्या
तस्याश्शरदो गर्भे	आर्या	३२	22
तेजस्वी कृतविद्यो	आर्या	४४	24
द्विरदालसगमनानां	आर्या	१	18
धनुर्धरशिखामणिर्जगति	पृथिवी	२	18
धरापतौ तत्र निवर्तितक्रिये	वंशस्थम्	३४	23
न किमपि निष्फलमासी	आर्या	३९	23
नरपतिरभिरामत्वाद्बालस्या	आर्या	२३	21
निजकान्तिजवहरं रविरथमिव	आर्या	५६	29
निजांशोऽस्मिन् गेहेऽवतरति	शिखरिणी	६	18
निर्धूय तत्र भूपं यत्तं	आर्या	५०	27
पञ्चहायनमियं नृपात्मजं	रथोद्धता	३५	23
पूर्वाह्णेतनपङ्कजप्रतिभट	शार्दूलविक्रीडितम्	२१	21
पूर्वं रामेण धूतोऽभवमव	स्रग्धरा	५३	28
प्राग्जन्मन्येष कस्स्यादिति	स्रग्धरा	१९	20
प्रावृषि जलक्ष्ममुक्ते	आर्या	५	18
बाल्येऽप्यस्याचख्यौ	आर्या	४१	23
बालो नाचारम्बरामाम्बभ्यां	आर्या	२५	21
भ्रमयति हि तेजसारीन्	आर्या	१३	20
मदकलनाकखेलदमृत	नर्कुटकम्	३	18
मत्तनुजावनदक्षिणरामाख्यामादितो	आर्या	१४	20
राजसुते गुरुगदितं तेजिष्ठं	आर्या	४०	23
रामेश्वरधरणीपतीरथमारुह्यात्म	आर्या	५१	27
रुचिगर्जितरूपैर्निजरिप	आर्या	४	18
रूढ्यै लिखितान् वर्णान्	आर्या	३६	23
विनिशम्य भाग्यनगरा	आर्या	५२	27
विनयपदार्थस्तस्मिन्	आर्या	४३	23

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	वृत्तम्	श्लोकसङ्ख्या	पुटसङ्ख्या
श्रेष्ठास्संयति रामकृष्णनृपती	शार्दूलविक्रीडितम्	४६	26
स पुरैव लब्धवर्णो	आर्या	३८	23
सकृदुदितमेव जगृहे स किल	आर्या	३७	23
सलिलं प्रसन्नमखिलं	आर्या	१०	19
समवर्धिष्ट स बलः	आर्या	२७	21
सर्वोऽब्दोऽपि च	शार्दूलविक्रीडितम्	३१	22
सुतजन्मनि नृपतिमणिर्वित्तं	आर्या	२४	21
सोऽयं वैभवभोग्यभाग्य	शार्दूलविक्रीडितम्	४७	26
सौवीराधिपतेः पुरास्मदभि	शार्दूलविक्रीडितम्	५५	29
क्षणाद्विन्दानोऽयं	शिखरिणी	२९	22
त्रेतासिन्धुक्षमाभृत्सित	स्रग्धरा	७	19

रामेश्वरविजये ३ - विजयोल्लासः

अथ यद्यमुं न मुञ्चसि	आर्या	३४	42
अथाग्रतो वीक्ष्य स रङ्गराजं	उपेन्द्रवज्रा	३१	42
अश्रान्तोद्भटतावकीनसुमहादोर्दण्ड	शार्दूलविक्रीडितम्	१४	39
अस्मन्मण्डलमध्ये विस्मयनीयात्म	आर्या	११	39
अस्मन्मण्डलवर्तिनं नरपतिं	शार्दूलविक्रीडितम्	१८	40
अह ह कुवर्णं वहसे	आर्या	३५	43
अहो धैर्यं शौर्यं निखिल	शिखरिणी	५	38
आदौ प्रकाशयतु	वसन्ततिलका	२	35
इत्थं सम्भाषमाणं सविनयमधुरं	स्रग्धरा	१६	39
इति चिन्तयन् हृदन्ते	आर्या	७	38
इति वचनं वदन्	नर्कुटकम्	३६	43
इति वदति तत्र नृपतौ	आर्या	१३	39
उद्भटखड्गनिकृत्तैः प्रतिभटशीर्षै	आर्या	२०	40

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	वृत्तम्	श्लोकसङ्ख्या	पुटसङ्ख्या
केचित्तुङ्गांस्तुरङ्गान् कतिचन	स्रग्धरा	२५	41
घनाघनघटोद्भटस्तनितगर्व	पृथ्वी	३०	42
घोटकखुरपाटितभूधूलीपालीभरे	आर्या	२६	41
चटुलतटिल्लता प्रतिभटोद्भट	पृथिवी	२९	42
चञ्चत्सौवर्णकोणाहत	स्रग्धरा	२७	41
जगन्नाथोऽमुष्मिन् सततमपि	शिखरिणी	६	38
जृम्भयन्तो मुहुः काहलीनां	स्रग्विणी	३८	43
तेजस्वी दुष्टोऽपि प्रायेण	आर्या	३	35
ध्वजिनीनस्सन्ततमपि रजनी	आर्या	१२	39
निश्शङ्कं शरणङ्गतमेष	आर्या	३५	43
नीत्वा तत्र दिनानि	शार्दूलविक्रीडितम्	२४	41
प्रादादस्मत्सनाम्ने मणिवरमनघं	स्रग्धरा	१	35
मण्डलाधीशितुर्मानयन् शासनं	स्रग्विणी	३२	42
मदबन्धुरमथ सिन्धुरमतिसुन्दर	आर्या	२२	40
यत्तेन्द्रमुख्य नृपतींस्त्वमयत्त	वसन्ततिलका	१०	39
यद्भवता वर्णितमिह रिपुजेतासीति	आर्या	१५	39
यद्दीक्षां प्रार्थयन्ते	स्रग्धरा	२३	41
राजाबहादुरिति ते हि	वसन्ततिलका	१७	40
रुद्धं संश्रुत्य नैजं	स्रग्धरा	२८	41
रूढ्या पार्थिवशब्दमेत्य	शार्दूलविक्रीडितम्	९	38
वदत्येवैतस्मिन्नथ सपदि	शिखरिणी	१९	40
वीररससारमिव तं विलोक्य	आर्या	४	38
शेषायुषि रचितादरमायातं	आर्या	३३	42
स द्राग्विद्राव्य सेनां बहदरु	स्रग्धरा	३९	43
साधु क्ष्मापालसिंहेत्यनघमणि	स्रग्धरा	२१	40
स्फूर्जत्पर्जन्यमध्यस्फुरदमलतटि	स्रग्धरा	३७	43
हे भूपाल मृगेन्द्रशाब	शार्दूलविक्रीडितम्	८	38

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	वृत्तम्	श्लोकसङ्ख्या	पुटसङ्ख्या
रामेश्वरविजये ४ - यात्रोल्लासः			
अपहसितानीव वने	आर्या	२	46
आभा प्राभाकराणां	स्रग्धरा	३५	59
इति संस्तुवन्तमवनीन्द्रमणिं	प्रमिताक्षरा	३९	60
इह यदि वसेत्	हरिणी	२०	52
उद्यद्वसन्ततिलकोत्कलिका	वसन्ततिलका	२६	53
कदाचिदत्यर्थमुदारमञ्जुषट्पदा	वंशस्थम्	१	46
कर्षन् कामान्धचेतो दिशिदिशि	स्रग्धरा	४	46
केचित्सम्पतयालुजीर्णविरला	शार्दूलविक्रीडितम्	१०	47
केसरचया अभीष्टाः	आर्या	९	47
किं शुकविकासकृद्दिनमित्यनु	आर्या	८	47
किं सादयसि नृशंसानस्मान्	आर्या	१४	50
गुणानास्माकीनान्यदि हृदि	शिखरिणी	१५	50
चिरान्नस्सौभाग्यं फलितमिह	शिखरिणी	१३	50
चिराय फलितं मनोरथ	पृथिवी	३२	59
जय दितिसुतपति विचकित	दण्डकम्	१७	52
तादृशरोषेऽपि हरे	आर्या	२१	52
त्वं स्तम्भभेदपूर्वकमुदितो	आर्या	१९	52
दाक्षिण्यं करुणा	शार्दूलविक्रीडितम्	३६	60
दूरस्थस्यापि जनैर्गदितास्सुगुणा	आर्या	४३	61
दृष्टोऽस्यधुना राजंस्तुष्टस्ते	आर्या	४४	61
धूर्तोऽयं किमिति	आर्या	२४	53
निर्विष्कम्भमहो वहस्व	शार्दूलविक्रीडितम्	४०	60
निर्नामं विधुरेक एव हते	शार्दूलविक्रीडितम्	३	46
निर्वीर्या बैद्धचर्याः	स्रग्धरा	३४	59
न गुणा मम तादृक्षा	आर्या	२३	53

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	वृत्तम्	श्लोकसङ्ख्या	पुटसङ्ख्या
परितः प्रबभौ वनभुवि	आर्या	६	46
पुष्पवती तव मल्लीकान्तेति	आर्या	५	46
प्रतिपाद्य भूरिवित्तं	आर्या	२८	55
बहुभावग्रहकलितस्सुशुभोदन्त	आर्या	३०	56
भगवन्निगमान्त्युगीरमणी	आर्या	१२	50
मेषारूढोऽपि रविस्सर्वोच्चस्थ	आर्या	७	47
यत्कान्ताघनगीतसंश्रवणतः	शार्दूलविक्रीडितम्	३१	57
यत्र स्त्रीणां मध्यमं	शालिनी	२९	56
रिपुखण्डनसमयादप्यधिकं	आर्या	२२	53
वरीयांस्त्वं नित्यं	शिखरिणी	४२	61
विचारणसुचारुभिर्गगननिर्ग	पृथिवी	३३	59
वेदान्ताभरणे श्रयामि	शार्दूलविक्रीडितम्	१६	51
सन्तु सगुणास्सहस्राण्यस्य	आर्या	३७	60
सौभाग्यैकनिधीं सुशीलजलधिं	शार्दूलविक्रीडितम्	४१	61
सुरतरुसूर्यसूनुशशिनोऽमि	नर्कुटकम्	३८	60
स्तुत्त्वैवं नृपतिमणिः	आर्या	२५	53
स्फूर्जत्पर्जन्यगर्जाप्रसरणरभ	स्रग्धरा	१८	52
स्मारं स्मारं यदुगिरिशिरोभूषणं	मन्दाक्रान्ता	४५	61
स्वदीप्तिहारीणि वसन्ति	उपेन्द्रवज्रा	२७	53
स्नात्वा कल्याणतीर्थे	स्रग्धरा	११	49
रामेश्वरविजये ५ - सुरङ्गानिर्गमोल्लासः			
अथ स्वप्ने श्रीमत्खग	शिखरिणी	५६	80
अथापि चित्ते विनियम्य	उपजातिः	१६	72
अथाप्येतद्राज्ञां बत	शिखरिणी	३०	75
अपि प्रसन्नस्य बहिर्हृदन्त	उपजातिः	१७	72

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	वृत्तम्	श्लोकसङ्ख्या	पुटसङ्ख्या
अनासाद्यं किं वा	शिखरिणी	२८	75
आचोदयादाचरमावनीध्रादासेतु	उपेन्द्रवज्रा	६५	88
आजन्मनः पवनतूलमृदौ	वसन्ततिलका	५१	80
आत्मीयेष्वपि विषमाः	आर्या	३	68
आदावेव तदीयबाहुयुगल	शार्दूलविक्रीडितम्	१५	72
आदावेव हि विश्वरक्षणविधौ	शार्दूलविक्रीडितम्	५२	80
आमूलाग्रं वीक्ष्य	प्रहर्षिणी	६१	87
आरक्तान्तविलोचनं	शार्दूलविक्रीडितम्	३२	75
आद्योपायत्रितयं मिलितममिलितं	आर्या	४०	78
इति कृतिपतितसन्नुत	आर्या	७३	93
इति चन्तियन् स	आर्या	३१	75
इति प्रति प्रशस्तैनं	अनुष्टुप्	४६	79
इत्युक्त्वा सन्त्रासक्षुभित	आर्या	११	71
इत्युदीरितमिदं महार्थ	रतोद्धता	४३	79
इन्दुकरादपि चन्दनमन्दार	आर्या	७०	90
उद्धर भगवन्नस्मान्	आर्या	५५	80
एनमधिगत्य रुद्धं	आर्या	२३	74
कस्यायं कुत्र याति	स्रग्धरा	२५	74
किमपकृतं रामेश्वरधरणी	आर्या	४	68
कियद्राज्यं के वा	शिखरिणी	२९	75
केचित्तेषां महोग्रप्रथन	स्रग्धरा	५८	87
कः कुत्र वा प्रयातु	आर्या	५०	80
गाम्भीर्यच्युतिभीतितः	शार्दूलविक्रीडितम्	६३	87
चित्रं यादृच्छिकमपि	आर्या	५९	87
जगदगदङ्कारदये भवति	आर्या	६७	89
जगद्भयदचण्डदोर्नरकदान	पृथ्वी	७१	93

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	वृत्तम्	श्लोकसङ्ख्या	पुटसङ्ख्या
जलदोदयाग्रजृम्भित	आर्या	६०	87
तावत्सन्नद्धकक्षैर्द्रुततर	स्रग्धरा	७	70
तावद्रामेश्वरेन्द्रग्रहणकुतु	स्रग्धरा	५७	86
त्वदनुग्रहनिग्रहयोर्न किमपि	आर्या	६६	89
त्वया मन्त्रीन्द्रेणोर्जित	शिखरिणी	१०	71
दुर्निग्रहनिद्रोऽसि	वसन्ततिलका	४८	79
धिगस्मान् दुर्दान्ता	शिखरिणी	२७	74
ध्यायं ध्यायं हृदये	आर्या	६	68
निशम्य तन्निर्भरशौर्यगर्भितं	वंशस्थम्	३३	78
नैतच्चित्रं विजाने त्वदनघ	स्रग्धरा	६९	90
परिम्लानं दूनं	शिखरिणी	४७	79
परदुस्सहतेजा अपि जातु	आर्या	३७	78
प्रचुरप्रतिघोऽपि नृपो	आर्या	२२	74
प्रायः प्रचुराः पुरुषाश्श्रेय	आर्या	५	68
प्रायो निर्गुण एव	आर्या	२४	74
भूप यथामति चातुरिकदन	आर्या	४१	78
भूपालेन्द्रसहस्रमौलि	शार्दूलविक्रीडितम्	६२	87
मा शङ्किष्ठा विचारेऽस्मिन्	अनुष्टुप्	४२	79
मूक इव शत्रुपक्षे प्रबले	आर्या	३५	78
यत्सञ्जीवयसे महौषधभरै	शार्दूलविक्रीडितम्	४५	79
यदि राजराजपूतना हृदि	आर्या	१३	71
यद्यपि स भवान् वीरो	आर्या	३९	78
या कृष्णता नाम्नि पुरा	इन्द्रवज्रा	१	68
यावत्कालविपर्ययममित्रनिवहं	आर्या	३६	78
याष्टीकैरेकदेशे कवचितमधिकं	स्रग्धरा	८	71
युक्तं राजन् भाषसे	शालिनी	३४	78

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	वृत्तम्	श्लोकसङ्ख्या	पुटसङ्ख्या
येनाकस्मिकलेखनीविलिखितां	शार्दूलविक्रीडितम्	६४	88
रक्षति भगवानस्मान्न	आर्या	३८	78
राजानं नाद्राक्षीत्	आर्या	२६	74
रामेश्वर महावीर	अनुष्टुप्	२०	72
रामेश्वरधरणिपते राजेन्द्रं	आर्या	२	68
वाल्मीकिः किमिति	शार्दूलविक्रीडितम्	४९	79
विदधुर्निरोधमात्रं जेतुं	आर्या	२१	74
शौर्यावष्टम्भगम्भीरं	अनुष्टुप्	१४	72
श्रीभूम्योस्स्पर्धायां तनुजोऽयं	आर्या	६८	89
श्रीमद्भारत एव मानवपते	शार्दूलविक्रीडितम्	७२	93
सत्यं राजेन्द्रमणे रामेश्वर	आर्या	१९	72
सदयमपि विगतकरुणं	शिखरिणी	५३	80
साधु साधु गदितं भवतेदं	स्वागता	४४	79
स्मारं स्मारं राजमणेस्तस्य	प्रहर्षिणी	१८	72
स्वामिन् रङ्गेश मया	आर्या	५४	80
क्षमापतिस्समानीतः	पञ्चचामरम्	९	71
क्षितिनाथमौलिमणिना	आर्या	१२	71

रामेश्वरविजये ६ - कल्याणोल्लासः

अविद्यान्धध्वान्ते चिरमिह	शार्दूलविक्रीडितम्	११	102
उत्तररङ्गधरित्रीनिस्तुलक	आर्या	७	100
घनतिमिरप्रतिसीरामुत्सार्य	आर्या	४	99
चक्राब्दाङ्कितमिह भुजयुगमिति	आर्या	१९	103
चिरादाविर्भूतं सुकृतमतिमात्रं	शिखरिणी	८	101
तदनुगृहीतं पुण्ड्रं तदनुच	आर्या	२०	103
तदनुविधिना दीप्ते वह्नौ	नर्कुटकम्	१५	103
तन्नामघटकवर्णद्वयवाच्यमिति	आर्या	१७	103

In Public Domain. Digitization Muthulakshmi Research Academy

श्लोकः	वृत्तम्	श्लोकसङ्ख्या	पुटसङ्ख्या
तापमुपयाति यस्मिन्	आर्या	१६	103
तावद्धिरचितनियमाप्लावश्चक्राङ्क	आर्या	६	99
दयालूनां रीतिर्जगति	शार्दूलविक्रीडितम्	१०	102
नैतच्चित्रं गुरुवरकृपयैष	आर्या	१८	103
नैतच्चित्रं राजा यदमुं	आर्या	३	96
पञ्चषदिनेषु यातेष्वञ्चित	आर्या	१	94
प्रपन्नं पादाब्जे निज इति	शार्दूलविक्रीडितम्	१२	102
बहुसरनिवहं प्रादान्नृप एष	आर्या	१३	102
रामेश्वरराजमणेः कर एव	आर्या	१४	102
विना श्रीमद्युष्मत्पदक	शार्दूलविक्रीडितम्	९	102
श्रुत्वा यान्तमनन्तरं	शार्दूलविक्रीडितम्	२	96
स्वकरेण तप्तचक्रोद्धरणं	आर्या	५	99

रामेश्वरविजये - ७ - सङ्गरोल्लासः

श्लोकः	वृत्तम्	श्लोकसङ्ख्या	पुटसङ्ख्या
अताडयन्त दुन्दुभीननादयन्त	पञ्चचामरम्	७०	128
अन्योन्योद्वीक्षणोत्थप्रतिघ	स्रग्धरा	१७	113
आप्याराद‍ाज्ञया मे	स्रग्धरा	६३	126
आबल्यादेष धीमानिह	स्रग्धरा	६१	126
इत्थं सैनिकवाग्भरेण	शार्दूलविक्रीडितम्	४	108
इत्यन्योन्योद्भटपटुमहावीर	मन्दाक्रान्ता	५२	119
इति रचितप्रशासनमनेन	नर्कुटकम्	८	109
इति वचनं निशम्य	नर्कुटकम्	४७	118
उग्रं पश्याघनेरम्मदनिभ	पञ्चचामरम्	७१	128
उत्कृत्तानाञ्च मूर्ध्नां	स्रग्धरा	७५	128
उत्क्षिप्यं तां पताकाः	स्रग्धरा	५	108
उल्लोलकल्लोलमतल्लिकाभि	इन्द्रवज्रा	६५	127

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	वृत्तम्	श्लोकसङ्ख्या	पुटसङ्ख्या
उद्दीपितोग्रनलकानन	वसन्ततिलका	३७	117
उद्धृत्यैकैकवारं थलथलिततमं	स्रग्धरा	४४	118
उद्भटयोर्वाहिन्योः	आर्या	६९	127
एकं बलाधिकमभूत्क्षण	वसन्ततिलका	२२	114
एकत्रोच्चण्डदर्पस्फुटघटित	स्रग्धरा	३३	116
एते नासाच्छिन्नदर्पस्फुटपट	स्रग्धरा	७	109
एष श्रीमानुदारः पटुमति	स्रग्धरा	६०	126
खड्गाखड्गि विजृम्भि	शार्दूलविक्रीडितम्	५४	120
गजकरवालखण्डनकृते	नर्कुटकम्	२७	115
गन्धर्वा इति नाम चेद्भवतु	शार्दूलविक्रीडितम्	११	110
घनतरदन्तकुन्तयुगदन्ति	नर्कुटकम्	९	109
चिरं समानो रिपुणा	उपेन्द्रवज्रा	४१	117
ज्वालारक्तं शतघ्नीशिखर	स्रग्धरा	३४	116
तदनुविरचिताज्ञो	मालिनी	६४	127
तत्ताद्दग्रणरङ्गशारिफलके	शार्दूलविक्रीडितम्	५३	119
तत्रान्योन्योज्झिगीषा	स्रग्धरा	३८	117
ताश्च प्रत्यर्थिसेनातति	स्रग्धरा	७३	128
तावत्कल्पान्तदृप्यत्प्रमथपति	स्रग्धरा	४५	118
तावत्प्रोच्चण्डशौर्यस्समरभुवि	स्रग्धरा	७७	129
तावत्सर्वैस्तुरङ्गैस्सरभ	स्रग्धरा	४३	118
तावद्ब्रह्माण्डभाण्डोद्दलन	स्रग्धरा	१६	111
तावत्ते यवनाश्च भाग्यनगरे	शार्दूलविक्रीडितम्	१	108
तावद्रामेश्वराज्ञोद्भट	स्रग्धरा	३२	116
दिशो दक्षिणस्या उदीचीं	भुजङ्गप्रयातम्	२४	114
धिक्कृत्यैवं तदानीं	स्रग्धरा	६२	126
धैर्येणास्मान् जिगाय	स्रग्धरा	१३	110

In Public Domain. Digitization Muthulakshmi Research Academy

श्लोकः	वृत्तम्	श्लोकसङ्ख्या	पुटसङ्ख्या
नासदौर्लेश्वरायप्रतिभटविजयं	स्रग्धरा	७८	129
निजबलमविज्ञाय	नर्कुटकम्	४८	119
निष्क्रान्तो नहि मूषिकेव	शार्दूलविक्रीडितम्	४९	119
पेलवान् खादसि भटान्	अनुष्टुप्	५१	119
पुन्नागौघकरावमृष्टम	शार्दूलविक्रीडितम्	४०	117
प्रचण्डतर विक्रमक्रमभरं	पृथ्वी	२३	114
प्रवृत्ते तयोस्सेनयोस्तत्रयुद्धे	भुजङ्गप्रयातम्	२०	114
भङ्गं प्रददौ राजा तुङ्गतरं	आर्या	७४	128
भिन्दन्नत्युग्रशौर्यः पटुकरटिघटाः	स्रग्धरा	४२	117
भेरी स्त्रीत्वात्सलज्ञा किल	स्रग्धरा	५५	120
मदावलैर्मदावलास्तुरङ्गि	पञ्चचामरम्	२१	114
या काचिन्मूषिकेव	स्रग्धरा	४६	118
यावत्तद्वनपर्तिसंज्ञनगर	शार्दूलविक्रीडितम्	१४	110
यावद्रामेश्वराख्यक्षितिपति	स्रग्धरा	६	109
युद्धप्रेक्षाभिलाषप्रमिलित	स्रग्धरा	१८	113
ये प्राक्कर्णेऽप्यविद्धास्समरभुवि	स्रग्धरा	५६	123
रथाङ्गक्रेङ्कारैरथ समिति	शिखरिणी	२५	114
रुन्धानस्य मुहुर्विलोचनपथं	शार्दूलविक्रीडितम्	२६	114
रुद्धेऽत्र क्षितिपालकेसरिशिशौ	शार्दूलविक्रीडितम्	३	108
रुद्धं श्रुत्वाथ रामेश्वरनृप	स्रग्धरा	६७	127
वनपर्तिग्राष्टमग्रे यं प्राप्य	आर्या	२	108
विचित्रधाराकलिते मयि	वंशस्थम्	३९	117
विपक्षपृतनामुखं चलति	पृथ्वी	६८	127
विहतरथिकसूतो	मालिनी	३१	115
शूरस्त्वं चेत्तदानीं क्व नु	स्रग्धरा	५०	119
श्रीमद्रामेश्वरेन्द्रोद्भटपटुतर	स्रग्धरा	५७	123

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	वृत्तम्	श्लोकसङ्ख्या	पुटसङ्ख्या
श्रीमद्रामेश्वरेन्द्रोद्भटभुज	स्रग्धरा	५९	126
श्रीरामेश्वरराजवैरिनिवहा	शार्दूलविक्रीडितम्	१९	113
सङ्ग्रामेऽत्युग्ररामेश्वर	स्रग्धरा	२८	115
सन्त्रस्ताः केऽपि	स्रग्धरा	७६	129
समुच्चलत्पट्टसघट्टनेन	उपजातिः	२९	115
सञ्जातेऽत्युग्रयुद्धे	स्रग्धरा	७२	128
सरभसभुजास्फालोद्धे	हरिणी	१०	109
सुसारथिकशाहतिक्षुभित	पृथ्वी	१२	110
स्तुत्वा सर्वं सहेति प्रतिपद	स्रग्धरा	६६	127
स्फुरिततटिल्लताशतहता	नर्कुटकम्	१५	110
स्वर्गस्त्रीपरिरम्भमङ्गलकृते	शार्दूलविक्रीडितम्	३६	116
संरक्षन्निजराष्ट्रमेष	शार्दूलविक्रीडितम्	५८	123
हतहयमास्थितं रथवरं	नर्कुटकम्	३०	115
ह्रदैस्सपदि पूरितैः प्रथनसीम्नि	पृथ्वी	३५	116

रामेश्वरविजये - ८ - सैनापत्योल्लासः

श्लोकः	वृत्तम्	श्लोकसङ्ख्या	पुटसङ्ख्या
अथ किल नागराजपृतनाभट	नर्कुटकम्	३१	142
अभिमुखमापतन्तमति	नर्कुटकम्	४३	144
अन्यत्किं कथनीयमस्ति	शार्दूलविक्रीडितम्	५५	146
अश्वैरश्वा गजेन्द्रैरपि गजनिवहाः	स्रग्धरा	२९	141
अस्मच्छत्रोरभिख्यां दधति	स्रग्धरा	२४	140
असुहृदभिदां बिभ्रत्येते	हरिणी	३७	143
अहमपि विमृश्यैवैतस्य	हरिणी	७	135
अहं किल भवादृशप्रचुर	पृथ्वी	५१	145
आकर्षन्महतीं चमूं रिपुजने	शार्दूलविक्रीडितम्	१४	138
आजुहाव तमिमं	रथोद्धता	२	134

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	वृत्तम्	श्लोकसङ्ख्या	पुटसङ्ख्या
आयातान् रिपुवीरवर्यनल	शार्दूलविक्रीडितम्	३५	142
इत्थं सादरचित्तभाग्यनगरी	शार्दूलविक्रीडितम्	७०	151
इतरनृपालदुर्लभममुं	नर्कुटकम्	५	134
इति तदुदीर्णशास	नर्कुटकम्	१७	139
इति रामेश्वरनरपतिवागङ्कुश	आर्या	५२	145
इति वचनं वदन्तममुमाह	नर्कुटकम्	६९	151
उदितमिदं निशम्य वनपतिं	नर्कुटकम्	६	135
उदितमिदं निशम्य	नर्कुटकम्	४९	145
कचाकचि नखानखि	पृथ्वी	३०	142
क्रेङ्कारैः काहलीनामथ	स्रग्धरा	२१	140
क्रोधारक्तान्तनेत्रस्सपदि	स्रग्धरा	३४	142
गदितमिति निशम्य	पुष्पिताग्रा	४७	144
गदितं निशम्य तदिदं नृपतिः	प्रमिताक्षरा	६६	150
चतुरङ्गयुतोऽपि नृपश्चतुरस्स	आर्या	३८	143
तदिदमुदितं श्रुत्वा राजा	हरिणी	५८	146
तावत्कैश्चित्समन्तादपि	स्रग्धरा	१	134
तावत्क्रोधारुणाक्षौ प्रलयजल	स्रग्धरा	६२	147
तावत्प्रोच्चण्डरोषक्षुभिततरहृदा	स्रग्धरा	२५	141
तावद्रामेश्वरेन्द्रो निजपुरमयते	स्रग्धरा	१५	138
त्वद्दोर्दण्डनिरङ्कुशोज्वलमहा	शार्दूलविक्रीडितम्	६८	150
देशा निष्प्रतिकूलराजनिव	शार्दूलविक्रीडितम्	६५	150
दूरात्प्रह्वेण तेन	स्रग्धरा	३	134
नासर्दौलावनीन्द्रोत्तमरचित	स्रग्धरा	४८	144
निजमथ बलं भग्नोद्विग्नं	हरिणी	३२	142
निरर्गलविसृत्वरप्रचुर	पृथ्वी	१०	135
निशम्य तदिदं	पृथ्वी	४	134

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	वृत्तम्	श्लोकसङ्ख्या	पुटसङ्ख्या
निशम्य तदिदं वचस्स	पृथ्वी	५०	145
निशम्य तद्बहदुरुवीरभाषितं	मञ्जुभाषिणी	५६	146
पश्चादाधावमानान्मुदिन	स्रग्धरा	४४	144
पूर्वापरप्रथममध्यसमानवीरान्	वसन्ततिलका	३९	143
प्रथनाङ्गणेऽद्वितीयाक्षरराज	आर्या	६०	147
प्रलयसमयप्रोद्यच्चण्डांशु	हरिणी	२७	141
प्रायस्तेन प्रभग्नास्सकलनृपवरा	स्रग्धरा	१२	136
बहिरी नृपालमहरीश्वरप्रभं	मञ्जुभाषिणी	४५	144
भग्नायामपि रिपुयूथपैर्ध्वजिन्यां	प्रहर्षिणी	३३	142
भिन्दन् सैन्धवपङ्क्तीश्शतशः	आर्या	४०	143
मन्दप्रज्ञसुदुर्ग्रहार्थमचिरात्तत्वैक	शार्दूलविक्रीडितम्	३	134
माहक्षाणां सहस्राण्यनिशमपि	स्रग्धरा	६७	150
यदि नाम भाग्यनगराधि	मञ्जुभाषिणी	४६	144
ये जातास्सालरूपा मुदिनपुरवरं	स्रग्धरा	२२	140
युद्धोन्मत्तस्समन्तादपि	स्रग्धरा	२६	141
रामेश्वरक्षितिपमन्दरलोडितात्म	वसन्ततिलका	४२	144
लोकालोकाचलेन्द्रः	स्रग्धरा	१६	139
वाचं तां विनिशम्य राजबहिरी	शार्दूलविक्रीडितम्	५४	146
विचार्य विजयाजयौ	पृथ्वी	१९	139
विरचितपरीहासस्तेनोर्मिल	हरिणी	५७	146
विद्युत्कौक्षेयकाढ्यो	स्रग्धरा	१८	139
वीरस्त्वं बुद्धिमांस्त्वं नृपकुल	स्रग्धरा	६४	150
व्यर्थं किन्नु विकत्थसेऽद्य	शार्दूलविक्रीडितम्	५३	145
शत्रूणां व्यसने प्रयाणमुचितं	शार्दूलविक्रीडितम्	२०	140
श्रीमन् सव्वायिराजा	स्रग्धरा	९	135
श्रीमद्रामेश्वरेन्द्रक्षितिभृद	स्रग्धरा	३६	143

In Public domain Digitization Muthulakshmi Research Academy

श्लोकः	वृत्तम्	श्लोकसङ्ख्या	पुटसङ्ख्या
श्रुत्वा वचस्तृणायैव मत्वा	अनुष्टुप्	५९	146
श्रुत्वा वनपर्तिनृपस्तदेवपद्यं	अनुष्टुप्	६१	147
सालावर्जङ्गभिख्याञ्चितसचिव	स्रग्धरा	६३	150
सेनां स्वां निर्दहन्तं दवमिव	स्रग्धरा	४१	143
सैनापत्येऽभिषिक्तोऽस्य	स्रग्धरा	११	136
सैनापत्येन साकं रिपुविजयकृते	स्रग्धरा	१३	136
सपदि शिरसोपात्तं	हरिणी	८	135
सपदि बहिरीराजेन्द्रस्यो	हरिणी	२३	140
संवर्तोद्धृत्तजञ्झानिलवलयहति	स्रग्धरा	२८	141

रामेश्वरविजये - ९ - अध्वरोल्लासः

श्लोकः	वृत्तम्	श्लोकसङ्ख्या	पुटसङ्ख्या
आबल्यादुचितास्वपि	शार्दूलविक्रीडितम्	४	155
इत्थं तद्वचनं निशम्य नृपतिः	शार्दूलविक्रीडितम्	२४	167
एकेनैव मयार्पितेन	शार्दूलविक्रीडितम्	१६	166
काणादाध्यात्मविद्याजलधि	स्रग्धरा	२	155
गत्वा श्रीवेङ्कटाद्रिं सरसिजनयनं	स्रग्धरा	११	158
तत्त्वविदामग्रसरस्सत्वनिधिः	आर्या	९	156
ताताज्ञां शिरसा वहन्	शार्दूलविक्रीडितम्	१३	161
तावद्रामेश्वरेन्द्रक्षितिपति	स्रग्धरा	१०	158
द्वादश्यां व्यध्वगत्या	स्रग्धरा	२०	166
न कदाप्यमुष्य तादृशतत्त्व	आर्या	८	156
नैक्षिष्टायमवज्ञया गुणनिधिर्यङ्कं	शार्दूलविक्रीडितम्	१४	165
भवता सचिवेन भव्यधाम्ना	वियोगिनी	२१	167
मन्दप्रज्ञसुदुर्ग्रहार्थमचिरात्त	शार्दूलविक्रीडितम्	३	155
यज्ञाभ्यां कारिताभ्यां	स्रग्धरा	१८	166
यदि खलु महाराजान्यस्त्वं	हरिणी	२३	167

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	वृत्तम्	श्लोकसङ्ख्या	पुटसङ्ख्या
यैर्यैर्भूपतिभिर्महाक्रतुकृते	शार्दूलविक्रीडितम्	२५	167
यद्यत्पश्यति शास्त्रतत्त्वमनघं	शार्दूलविक्रीडितम्	५	155
रामेश्वरशासनतो रक्षत्यपि	आर्या	१	155
वत्स त्वं श्लाघ्यकीर्तिर्विपुल	स्रग्धरा	१९	166
विप्राभ्यां युगपत्क्रतुद्वयमयं	शार्दूलविक्रीडितम्	१२	158
विवशितहृदयेऽस्मिन्नर्थिवर्गे	मालिनी	१५	165
श्रवणपदवीजङ्गालं तद्विधाय	हरिणी	२२	167
सुविचारकतकचूर्णैः पङ्कमधः	आर्या	७	156
ज्ञात्वायं कश्चिदर्थं लघुमपि	स्रग्धरा	६	156
ज्ञानवीरमुदीक्ष्यामुं दानवीरं	अनुष्टुप्	१७	166

रामेश्वरविजये - १० - राज्यभारोल्लासः

श्लोकः	वृत्तम्	श्लोकसङ्ख्या	पुटसङ्ख्या
इति चिरतरं चिन्ताश्रान्तस्स	हरिणी	२२	175
इति स्तुतिवचःक्रमैः प्रतिपदं	पृथ्वी	१५	171
इष्टप्रदानभरणैरपि	वसन्ततिलका	६	170
उदितं निशम्य तनयं	आर्या	३५	184
कर्तात्यद्भुतकर्मणां	स्रग्धरा	२९	178
क्वचित्क्रीडारामे क्वचिदमलसौधेऽति	शिखरिणी	३१	178
जातु श्रीरङ्गपुर्यां गरुडगिरितटे	स्रग्धरा	१७	171
जातु श्रीवनपर्तिनाम्नि	शार्दूलविक्रीडितम्	७	170
जित्वा प्रत्यर्थिपृथ्वीपति	स्रग्धरा	२७	177
तत्तत्कृत्येष्वमत्तानचपल	स्रग्धरा	३	169
तद्भवतो निरतिशया करुणा	आर्या	११	170
तामेतां राजपुत्रीं घनगुणमहितां	स्रग्धरा	२५	177
तेषामर्थेऽतिधीरानतिकुशलतरान्	स्रग्धरा	४	169
देवेश चन्द्रभागाञ्चितो	आर्या	१३	171

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	वृत्तम्	श्लोकसङ्ख्या	पुटसङ्ख्या
धर्माधर्मौ समीक्ष्य	स्रग्धरा	२	169
धृतरुद्राभिख्या द्या	आर्या	२६	177
न खलु विमृशन्	हरिणी	२१	175
नान्यस्मै स्पृहयेत्युदार	शार्दूलविक्रीडितम्	२३	177
नित्यं भक्तजनावनेन च	शार्दूलविक्रीडितम्	१४	171
पत्रे भाति यदृच्छयापि	शार्दूलविक्रीडितम्	२४	177
प्रत्यग्रस्फुटतरपद्मजैत्रनेत्रं	प्रहर्षिणी	९	170
प्रतिशरदं रङ्गपतेः क्षितिनाथः	आर्या	१८	171
प्रसादमापुः ककुभो न	वंशस्थम्	३४	183
भास्वति बालेऽभ्युदिते राज्ञि	आर्या	३६	184
मय्येवाभिमुखो भवत्यति	शार्दूलविक्रीडितम्	३०	178
मासे भाद्रेऽन्त्यपक्षे क्षयशरदि	स्रग्धरा	३२	183
मित्रेण मन्त्रिणा तद्राज्ञस्ते	आर्या	१६	171
यत्तव लोचनसममिति निगमैः	आर्या	१०	170
रामेश्वरेन्द्रबहिरीनृपतिप्रदीपे	वसन्ततिलका	३७	184
रामेश्वरनृपतिलके पुरोदिते	आर्या	३३	183
वृत्तिरसङ्गतिरिव तव भगवन्	आर्या	१२	170
शान्ते दान्ते विजितविषये	मन्दाक्रान्ता	१	169
शिथिले प्राक्तनशाखिनि	आर्या	३८	184
श्रीपाण्डुरङ्गदेवं मन्त्री	आर्या	८	170
श्रीमान् सव्वायि	स्रग्धरा	२८	178
स्वीये राष्ट्रे न्यायवृत्तो	शालिनी	५	170
हाहाहन्त कथं कथं स्वयमहं	शार्दूलविक्रीडितम्	२०	174

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	वृत्तम्	श्लोकसङ्ख्या	पुटसङ्ख्या
रामेश्वरविजये - ११ - परमपदोल्लासः			
इति विनिगदन् मन्त्रीन्द्रोऽयं	हरिणी	९	193
उत्तुङ्गैर्द्विरदैरुदग्रतुरगैस्तूर्यार्भटी	शार्दूलविक्रीडितम्	११	194
एषा हन्त तदर्थमेव	शार्दूलविक्रीडितम्	७	193
तावद्रामेश्वरेन्द्रप्रभुवरललना	स्रग्धरा	१०	193
दिङ्नागर्षिक्षमासम्मितशकघटिते	स्रग्धरा	१	189
दिशि दिशि नृपं	हरिणी	५	192
भवतु तदिदं दैवायत्तं	हरिणी	८	193
स खलु बहिरी	हरिणी	६	193
सन्त्वन्ये नरपालनामकलिता	शार्दूलविक्रीडितम्	४	192
सालावर्जङ्गभिख्यस्सचिव	स्रग्धरा	३	192
हा धिक्कष्टमहो बत प्रतिहतं	शार्दूलविक्रीडितम्	२	189
रामेश्वरविजये - १२ - कुमाराभ्युदयोल्लासः			
अथ किल निजसौधप्राप्ति	मालिनी	१९	208
अभितः प्ररूढदूर्वाचिकुरान्तं	आर्या	२०	208
अपरिमितकरितुरगरथनिबिडिता		२३	209
अयत्नबहिरीनृपाभिलिखितै	पृथ्वी	१	195
आगोपालाविपालं प्रचुरतररसै	स्रग्धरा	७	199
इति निजभक्तशिखामणि	आर्या	३०	212
एवं सा तत्र तत्र	स्रग्धरा	१८	205
गरुडगिरिशिखरधाम्नो धाम्नो	आर्या	२९	212
जन्म क्वास्य क्व सम्पद्बहदरु	स्रग्धरा	६	196
जयतु भुवि वदान्यश्रेणि	मालिनी	३६	213
तदनु निशम्य पत्र मुखतो	नर्कुटकम्	१२	203
तदनु सचिवश्रेष्ठस्याज्ञां	हरिणी	१०	200

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	वृत्तम्	श्लोकसङ्ख्या	पुटसङ्ख्या
तदोद्धुक्षितानां शतघ्नीशतानां	भुजङ्गप्रयातम्	२२	209
तमिमं मनोहरगभीरनिर्मल	मञ्जुभाषिणी	४	195
दधिफलकुसुमाज्यमुख्य	पुष्पिताग्रा	१७	205
देवीमानेतुकामाः कतिचन	स्रग्धरा	१४	203
दूरादेव विनम्रमौलिशिखरै	शार्दूलविक्रीडितम्	१६	205
धन्योऽसौ राजपुत्रो	स्रग्धरा	१३	203
न प्राचीनत्वं वा नव्यत्वं	आर्या	३५	213
निर्मलनिस्तलसौधे	आर्या	२१	209
पादच्छायागृहीतोज्वलतर	स्रग्धरा	३	195
प्रभवशरदि तस्यामाश्विने	मालिनी	२६	211
प्राचीनमेव कवनं मधुरं	आर्या	३४	213
प्रायो द्वित्रैर्दिनैर्वा त्रिचतुरदिवसैः	स्रग्धरा	१५	203
बालचन्द्रं वलक्षच्छद इव	स्रग्धरा	११	203
बालं प्रत्यग्रजातं बहदुरुविभुना	स्रग्धरा	९	199
यं वासरमभिषिक्तश्श्रीमान्	आर्या	३२	212
रचयामि मस्तकेञ्जलिमच	आर्या	३३	212
राज्ञ्या द्राक्तदनु तयाथ	प्रहर्षिणी	२	195
श्रीरामेश्वरराजवंशतिलक	शार्दूलविक्रीडितम्	२७	212
श्रीवासब्रह्मतन्त्रादिमपद	स्रग्धरा	३१	212
सर्वाशा महता धनेन	शार्दूलविक्रीडितम्	२५	211
सह परिवाराय पुनस्सह	आर्या	२८	212
सालावर्जङ्गभिख्यः	स्रग्धरा	८	199
हारिद्रोदकपिष्टभाजनक	शार्दूलविक्रीडितम्	५	195

In Public domain. Digitization Muthulakshmi Research Academy

राजवंशरत्नावली

प्राक्कथनम्

कृतिकर्त्ता

राजवंशरत्नावलीति कृतिः होसदुर्गं कृष्णमाचार्येण विरचितेति अन्तिमश्लोकानुशीलनेन ज्ञायते। तस्य कवेः कृतिषु एषा सप्तविंशः इत्यपि ज्ञायते।

इति श्री मच्छ्रीशैलकुलतिलकश्रीम
त्प्रत्यग्रदुर्गतातार्यवर्यनन्दनस्य
श्रीकृष्णकविसार्वभौमस्य कृतिषु
राजवंशरत्नावलिर्नाम प्रबन्धस्सप्तविंशः ॥

कृतिकालः

कृतेरन्ते कविः रचनाकालं निर्दिशति। तदनुसारं 4984 कलियुगाब्दे क्रि.श. 1883 तमे वर्षे व्यरचयत्।

चतुरधिकाशीत्युत्तरनवशतकाधिकचतुस्सहस्रमिते ।
कलिवर्षगणे याते ग्रथितेयं राजवंशरत्नावली ॥ 55 ॥

कृतिभर्त्ता

क्रि.श. 1865-66 - रामकृष्णरायः (II) शङ्कराम्बाराज्यशासनम्
रामकृष्णरायः (II) कलियुगाब्दे 4966 क्रिस्ताब्दे 1865-66 तमे वर्षे राज्याभिषिक्तः। तस्य शैशवात् शङ्कराम्बैव राज्यं शशास।

षट्षष्ट्युत्तरनवशतशेखरितचतुस्सहस्रसङ्ख्येषु ।
कलिवर्षेषु गतेषु प्राप्तं श्रीशङ्कराम्बया राज्यम् ॥ 49 ॥

इदमेव रामकृष्णक्षितिपालोत्तंसराज्यभारदिनम् ।
बाल्यादमुष्य सैषा स्वयमेव बभार सकलराज्यधुराम् ॥ 50 ॥

किन्तु षोडशवर्षदेशीयः रामकृष्णरायः (II) अश्वात् प्रमादवशात् पतित्वा पञ्चत्वं गतः।

In Public domain. Digitization Muthulakshmi Research Academy

श्री रामकृष्णनृपतेरन्यः को नाम बाल एव भुवि ॥
अभिमन्योरिव शैशव एवायुर्म्लानतामगात्कष्टम् ॥ रा.र. 43,45

रामेश्वररायस्य (II) शासनकालः क्रि.श. 1880

रामेश्वररायः कलियुगाब्दे 4981 क्रिस्ताब्दे 1880 तमे वर्षे राज्यं प्राप्नोत्। कविः 22-39 श्लोकेषु शङ्करम्बायाः औदार्यं प्रशशंस। अतः कृष्णकविः शङ्करम्बायाः प्रार्थनया रामेश्वररायस्य (II) शासनकाले क्रि.श. 1883 तमे वर्षे राजवंशरत्नावलीं रचयामासेति वक्तुं शक्यते।

एकाशीत्युत्तरनवशताधिकचतुस्सहस्रकलिवर्षेषु ।
यातेषु विक्रमाब्दे रामेश्वरराय एष राज्यं प्रापत् ॥ 51 ॥

कृतिविषयः

शताधिकग्रन्थकृत् नवदुर्गं कृष्णकवेः कृतिरेषा राजवंशरत्नावली वनपर्तिसंस्थानस्य राजवंशीयानां वंशवृक्षं वर्णयति। विशिष्य शङ्करम्बायाः गुणगणस्तुतिं चकार कविः।

सर्वेऽमी विक्रान्तास्सर्वे श्रीरङ्गनाथदास्यधनाः ।
सर्वे धर्मप्रवणास्सर्वे कुशलाः कुलेऽत्र भूपालाः ॥ 53 ॥

कृतिविश्लेषणम्

लघुकृतिरियं सप्ताधिकपञ्चाशता श्लोकैः विरचिता। आर्या इन्द्रवज्रा अनुष्टुप् शार्दूलविक्रीडितं स्रग्धरा वसन्ततिलका मालिनी इत्यादिभिः वृत्तैः श्लोकाः गुम्फिताः। 14 राज्ञां वर्णनमुपलभ्यते। सर्वेषां शासकानाम् अपेक्षया शैशवकारणात् पुत्रस्य पौत्रस्य च स्थाने राज्यं शाशितवत्याः शङ्करम्बायाः दातृत्वादिगुणगणाः कविना भृशं प्रशंसिताः इति लक्ष्यते।

मङ्गलश्लोकः

कविः हयग्रीवं रामानुजञ्च नत्वा राजवंशरत्नावलीं प्रारभते। मङ्गलश्लोके हरिं स्तौति। हरिः वनपर्त्तिराजानां श्रेयः विदधातु इति कविः

In Public domain. Digitization Muthulakshmi Research Academy

आशास्ते। तदनु वनपर्तिसंस्थानं शासितवत्याः रामेश्वरप्रभोः धर्मपत्न्याः शङ्कराम्बायाः स्तुतिं चकार कविः।

सूगूरुसंस्थानम्– वनपर्तिसंस्थानम्

वनपर्तिराजराजानां श्रेयः विदधातु हरेः अपाङ्गाः इत्यस्मिन् प्रथमे मङ्गलश्लोके कविः वनपर्त्तिरिति उल्लिखितवान्।

ततः कृष्णातटे विराजमानां सूगूरुनगरीं स्तौति।

कृष्णातटेऽस्ति.....सूगूरुनामनगरी गरीयसी....। रा.र.श्लो.5

यतः संस्थानस्य प्राक्तनराजधानी सूगूरु आसीत्। संस्थानपालकेषु अन्यतमः रामकृष्णरायः (प्रथमः) सूगूरुतः राजधान्याः स्थानान्तरीकरणं कृत्वा वनपर्तिं राजधानीत्वेन प्रतिष्ठापितवान्। महबूबनगरमण्डले अन्तर्भवतीदं संस्थानम्। 124 ग्रामाः संस्थाने अन्तर्भवन्ति स्म।

मूलपूरुषः –

जनुंपल्लि वीरकृष्णारेड्डि (क्रि.श.1510-1550) – 6 श्लोकः

तत्रासीन्निजविक्रमवित्रासितविविधवैरिनृपचेताः......वीरकृष्णभूप इति॥ रा.र.श्लो.6 इत्यस्मिन् श्लोके कृष्णकविः वंशस्यास्य मूलपुरुषस्य वीरकृष्णारेड्डिः अथवा श्रीवीरकृष्णभूपतिः इत्यस्य स्तुतिं चकार। एषः पेनुबालगोत्रोद्भवः। कर्नूलुमण्डलान्तर्गतायां नन्द्यालतालुकायां जनुंपल्लिग्रामवास्तव्योऽयं वीरकृष्णारेड्डिः इति। अत एव संस्थानपालकानां गृहनाम अस्ति जनुंपल्लि। मोटाटिशाखायाम् अन्तर्भवन्ति एते रेड्डिपालकाः। कर्नूलुमण्डलस्य मार्कापुरतालुकायां 'मोटवाड' इति स्थानम् अन्तर्भवति। मोट्टवाडि इति प्राचीनान्ध्रकर्णाटशासनेषु दृश्यते। प्रागुटूरिशासकस्य बिज्जुलतिम्मभूपालस्य अनर्घराघवकृतेः अवतारिकायां मोटवाड इति पदं प्रयुक्तमिति। मोटाटि इति विकृतपदमस्ति। विजयनगरसाम्राज्यस्य सामन्तप्रभुरासीदिति वीरकृष्णभूपतिः। ततः एषः पातपल्लि इति ग्रामे स्थिरवासं चकार। पातपल्लीति ग्रामः वनपर्तौ अन्तर्भवति। क्रमशः बलोपेतस्सन् वीरकृष्णारेड्डिः पातपल्लिग्रामं

In Public domain. Digitization Muthulakshmi Research Academy

क्रीत्वा तदनु परितः प्रदेशान् वशीकृत्य सूगूरुपत्तनं राजधानीत्वेन विधाय सशास।

इम्मडि वेङ्कटरेड्डी चतुर्थः पूरुषः

अयं वेङ्कटरेड्डी (हिजरि 1052) क्रि.श. 1633-34 तमे वर्षे सैनिकानां दश सहस्रम् आदाय नेल्लूरु उदयगिरिदुर्गञ्च वशीकर्तुं कुतुब्षाशासकस्य साहय्यं चकार। एषः क्रि.श. 1642 तमे वर्षे पञ्चत्वं गतः।

अष्टभाषाकविः राजा बहिरी गोपालरायः पञ्चमः पूरुषः

वेङ्कटरेड्डिपुत्रः गोपालरायः समराङ्गणविजयी इत्यतः बहिरीति षड्विधप्राकृतभाषाप्रकारेषु संस्कृतान्ध्रभाषयोश्च निष्णात इत्यतः अष्टभाषाकविरिति बिरुदाञ्चितः। अष्टभाषागोपालराय इति प्रख्यातिं गतोऽयं पालकः (हिजरि 1056) क्रि.श. 1637 तमे वर्षे दिवङ्गतः। गोलकोण्डकवुल-सञ्चिकायां क्रि.श. 1650 कालः अस्य जीवनकालः इति सूचितम्। सुरवरं प्रतापरेड्डिवर्यलेखानुसारं क्रि.श. 1668 वर्षे दिवङ्गतोऽयं राजा। दक्षिणदेश-यात्राः विधाय तिरुपतिकञ्चिश्रीरङ्गादितीर्थक्षेत्राणां दर्शनं कृत्वा तत्रत्यान् पण्डितप्रकाण्डान् आहूय स्वस्थाने आश्रयं कल्पयामास अयं कविपण्डित-पोषकः। संस्थाने श्रीरङ्गपुरमिति नाम्ना देवालयं रङ्गसमुद्रञ्चेति तटाकराजमपि विनिर्ममे। तटाकदेवालयादीनां निर्माणेन लोकोपकारञ्च चकार।

रचनाः –

गोपालरायेण रामचन्द्रोदयः इति यमककाव्यं श्रृङ्गारमञ्जरीति भाणः संस्कृतेन रचिताः। आन्ध्रकृतयः अलभ्याः।

सवै वेङ्कटरेड्डिः

राजायं जानपदगीतेषु बहुधा विश्रुतः। होसदुर्गं कृष्णमाचार्यस्य वंशवृक्षानुसारम् अयं सवैवेङ्कटरेड्डिः अष्टभाषाकवेः गोपालरायस्य पौत्रः अस्ति।

In Public domain. Digitization Muthulakshmi Research Academy

किन्तु सुरवरं प्रतापरेड्डिवर्यस्य **'निजामुराष्ट्रमुलोनि आन्ध्रसंस्थानमुल चरित्र'** इति **लेखे 'वनपर्तिसंस्थानम् तेलुगुसाहित्यसेवा'** (पिहेच् डि. सिद्धान्तग्रन्थः डाँ. ए. मोहनरेड्डिविरचितः) इति ग्रन्थस्य वनपर्तिराजवंशावलौ च **दत्तपुत्र इति अभिवर्णितः।** सवै वेङ्कटरेड्डिः यदा शास्ति स्म तदा धनाभावात् निजामसर्वकाराय देयं करधनं नार्पितम् इति हेतोः गोपालरायस्य पत्नी जानम्मा वर्षकालं यावत् निर्बन्धे स्थापिता इति। ययोः दत्तपुत्रः तयोः नाम्ना वेङ्कटरेड्डिः जानंपेटाभिधं ग्रामं गोपालपेटाभिधं ग्रामञ्च निर्मितवान्। गोपालपेट एव गोपालसंस्थानमिति विश्रुतमस्ति। तस्य पालनाय स्वानुजं रङ्गारेड्डिं नियुक्तवान्। फर्रुखनगरमिति दुर्गं निर्मितवान्। भार्यायाः नाम्ना केशंपेटग्रामं निर्मितवान्। अत्र उत्सवाः प्रचलन्ति स्म।

व्ययसाध्यानि कार्याणि कर्तुं धनमपेक्षितम्। अतः धनार्थं सामन्तप्रभून् पीडयति स्म। भाग्यनगराधीशः एतं दण्डयितुं केचन नवाबाख्याः समादिष्टाः। एते ससैन्यं फर्रुखनगरं गत्वा युद्धे वेङ्कटरेड्डिहस्ते पराजिताः। युद्धे अजेय एष इति निश्चित्य भेदोपायेन तं पराजेतुं कपटोपायं चिन्तितवन्तः वेङ्कटरेड्डिशत्रवः। तस्य सर्दाराख्येषु योधाग्रेसरेषु विभेदं कल्पयित्वा पुनः आक्रमणं कृतवन्तः। वेङ्कटरेड्डिवर्यस्य अनुजः तिरुमलरावः युद्धे हतः। वेङ्कटरेड्डिः पराजितः। शत्रुहस्तं गतश्चेत् अवश्यं मां हन्तीति धिया वेङ्कटरेड्डिः आत्मघातं चकार। दक्कनप्रान्तसुबेदाराख्यः अधिकारी इरादतखानभिख्यः दिल्लीपादुषाख्याय निवेदितवान् एनमुदन्तम्। दिल्लीशासकात् "सवै" इति बिरुदम् वेङ्कटरेड्डिकालादेव प्राप्तम्। सवै वेङ्कटरेड्डिः हिजरी 1130 क्रि.श. 1712 तमे वर्षे दिवङ्गतः।

गोपालरायः

सवै वेङ्कटरेड्डिपुत्रः गोपालरायः यदा संस्थानं शास्ति स्म तदा स्ववंशजः गोपालपेटशासकः प्रजाकण्टकः आसीदित्यतः सर्वकाराज्ञया तं

In Public domain. Digitization Muthulakshmi Research Academy

निगृहीतवान्। अस्य राजधानी सूगूरु आसीत्। सूगूरुसंस्थाने सूगूरुसिक्का इति मुद्राविशेषस्य निर्माणं प्रचलति स्म।

सवायि वेङ्कटरेड्डिः

अस्य शासनकाले नास्ति कोऽपि विशेषः।

गोपालरायः

अस्यापि शासनकाले नास्ति कोऽपि विशेषः।

रामकृष्णारायः (प्रथमः)

बाल्ये एव अस्य पिता दिवङ्गतः। अतः अल्पे वयसि एव राज्यभारं स्वीचकार। संस्थानस्य आयः चत्वारिंशत्सहस्राधिकं लक्षं रूप्यकाणि। सर्वकाराय चत्वारिंशत्सहस्रं रूप्यकाणि अर्पणीयानि। राज्यनिर्वहणं कष्टाय कल्पते स्म। हिजरी 1205 क्रि.श. 1787 तमे वर्षे गोलकोण्डसुलतानः मृगयाविनोदार्थं वनपर्तिपरिसरारण्यान्याम् आगतः। गोपालपेटसंस्थानस्य पूर्वशासकः दायादः रामकृष्णरायस्य शत्रुः सुलतानस्य कर्णेजापं चकार। क्रुद्धः सुलतानः रामकृष्णं गोलकोण्डकारावासे वर्षत्रयं यावत् स्थापितवान्। कालान्तरे सुलतानस्य अनुग्रहपात्रतां गतः। कारागारात् मुक्तश्च। शत्रोः दमनाय गोपालपेटं निकषा वस्तुम् इच्छति स्म रामकृष्णरायः। अतः सूगूरुं त्यक्त्वा वनपर्तिं राजधानीं विधाय राज्यं परिपालयति स्म। अस्य शासनकाले एव हिजरी 1235 क्रिस्ताब्दे 1817 तमे वर्षे सूगूरुनगरे सिक्कानिर्माणाय (मुद्रा) निजामसर्वकारात् आज्ञा प्राप्ता। सर्वाः सिक्काख्यमुद्राः सूगूरुसिक्काख्यमुद्रा अतिशेते स्म।

हिजरी 1235 क्रिस्ताब्दे 1818 तमे वर्षे रामकृष्णरायाय बहदरु इति बिरुदेन सम्मानितः। हिजरी 1238 क्रिस्ताब्दे 1820 तमे वर्षे कीर्तिकायः सञ्जातः। अस्य दत्तपुत्रः राजा रामेश्वररायः। रामेश्वरविजयचम्पूप्रबन्धः रामकृष्णरायस्य वर्णनेनैव आरभ्यते।

In Public domain. Digitization Muthulakshmi Research Academy

राजा रामेश्वररायः (प्रथमः) रामेश्वरविजयचम्पूप्रबन्धनायकः क्रि.श. 1820/1822-1866

फारसीतमिलाङ्ग्लभाषानिष्णातोऽयं राजा राजनगरम् इति ग्रामे प्रतिष्ठितस्य श्रीरामकृष्णस्वामिदेवस्य प्रतिवर्षं कार्तिकपूर्णिमायां ब्रह्मोत्सवं निर्वहन् वेदशास्त्रपण्डितानां गोष्ठीः निर्वहति स्म। तथैव प्रतिवर्षं फाल्गुणपूर्णिमायां श्रीरङ्गपुरे विराजमानस्य श्रीरङ्गनायकस्वामिब्रह्मोत्सवेषु कविगायकादिसम्मेलनानि निर्वहति स्म। इत्थं पालकोऽयं कविपण्डित-गायकानां पोषकः आसीत्। अमरचिन्त रामचन्द्रकविः (1840-1905) गोलकोण्डकवुलसञ्चिकायां राजानं रामोश्वररायं (प्रथमं) स्तुवन् तोलुगुपद्यानि अलिखत्।

कृष्णकविविरचितः रामेश्वरविजयचम्पूप्रबन्धः राजा रामेश्वररायं प्रबन्धनायकं विधाय तज्जीवनचरित्रं महत्त्वपूर्णं तेलङ्गाणाराज्येतिहासञ्च वर्णयति।

राजा रामकृष्णरायः (द्वितीयः)

रामेश्वररायस्य दत्तपुत्रोऽयम् अकालमृत्युग्रस्तः। षोडशवर्षदेशीयः अश्वात् पतित्वा पञ्चत्वं गतः।

राजा रामेश्वररायः (द्वितीयः) (क्रि.श. 1870)

शङ्करम्बायाः पौत्रोऽयमपि भाषापोषकः कविपण्डितान् सत्करोति स्म। 1870 तमे वर्षे ब्रह्मविद्याविलासमुद्राक्षरशाला इति मुद्रणशालां व्यवस्थाप्य नैकान् ग्रन्थान् मुद्रापयामास।

राज्ञीशङ्करम्बा

इयं वनपर्तिराजस्य रामेश्वररायस्य (प्रथमः) धर्मपत्नी। अस्याः प्रार्थनयैव होसदुर्गं कृष्णमाचार्यः राजवंशरत्नावलीं रामेश्वरविजयचम्पूञ्च व्यरचयत्। एतस्याः प्रशंसापरकाः श्लोकाः एव अधिकतया राजवंशरत्नावल्यां सन्ति। बुधनुतमहिमा राजनीतिप्रगल्भा पातिव्रत्यैकसीमा श्रुतविविधपुराणे-

In Public domain. Digitization Muthulakshmi Research Academy

तिहासार्थतत्त्वा ब्रह्मज्ञा सत्यवादिनी अतिविमलयशा निर्मितानेकसत्रा राजमूर्धन्यरत्नम् इति तस्याः गुणगणकीर्तनं चकार कविः। कविपण्डितपोषणं भृशं चकारेयं राज्ञी। उद्यानानि सत्राणि तटाकाः श्रीरङ्गदेवालयस्य गोपुरञ्च निर्मापितवती। सक्षसन्तानलक्ष्मीरिति स्तौति कविः।

शिलाशासनम्

शङ्करम्बया निर्मितस्य गोपुरनिर्माणस्य विषये शिलाशासनमेकं होसदुर्गं कृष्णकविना विरचितं यत् श्रीरङ्गनाथदेवालये विराजते। श्रीमदुत्तररङ्ग-माहात्म्यम् इति काव्यस्य पीठिकायां विस्तरेण शिलाशासनस्य चित्रसहितं विवरणं प्रदत्तम्।

वेदशास्त्रपरीक्षाः

श्रीसुरवरं प्रतापरेड्डिप्रभृतीनां प्रेरणया वनपर्तिराजः रामेश्वररावः बहिरी बलवन्त बहद्दरु बिरुदाश्चितः विद्याव्याप्तये भाषोद्धरणाय च श्रीरङ्गापुरे फाल्गुनपूर्णिमायां कविगायकसभाः कार्तिकपूर्णिमायां राजनगरे शास्त्रपण्डित-सभाः व्यवस्थापयति स्म। खण्डवल्लि नरसिंहशास्त्रिवर्यः व्याकरणस्य वनं सीतारामशास्त्रिवर्यः तर्कशास्त्रस्य टि गोपालाचार्यः वेदस्य टि.के.वि सुदर्शनाचार्यः मामांसाशास्त्रस्य वेदाल तिरुमलरामानुजस्वामी आयुर्वेदस्य कप्पगन्तुल लक्ष्मणशास्त्रिवर्यः साहित्यस्य परीक्षकाः आसन्निति साहित्येतिहासग्रन्थेषु उपलभ्यते।

संस्थानस्य विद्वत्कवयः परिशोधकाः

वनपर्तिसंस्थानम् आश्रित्य नैके कवयः साहितीसेवां चक्रुः। मानवल्लि रामकृष्णकविः संस्थानस्यास्य पालकानां प्रोत्साहेनैव परिशोधनं कृत्वा अमुद्रितग्रन्थान् प्राकाश्यं नीतवान्। वीरराघवाचार्यः अमरचिन्त रामचन्द्रकविः पापाशास्त्री विक्राल नरसिंहाचार्यः अक्षिन्तल सुब्बाशास्त्री सिङ्गम्पल्लि नरसिंहसिद्धान्ती अर्चकम् अय्यमाचार्युलु होसदुर्गं कृष्णमाचार्युलु

In Public domain. Digitization Muthulakshmi Research Academy

नम्बाकं राघवाचार्युलु शेट्ठलूरु शेषाचार्युलु कण्ठीरवाचार्युलु प्रभृतयः वनपर्त्तिसंस्थानास्थानकविपण्डिताः।

राजवंशरत्नावलिः - तेलुगु अनुवादः

तिरुपतिवेङ्कटकवी कार्यमपूडि राजमन्नारुकविः गोल्लापिन्नि मल्लिकार्जुनशास्त्री इतरे च विद्वांसः (क्रि.श.1846-1945)वनपर्तिसंस्थानस्य सन्दर्शनं चक्रुः। 'नानाराजसन्दर्शनमु'इति यात्राकाव्ये तिरुपति वेङ्कटकवी राजा रामेश्वररायम् अभ्यर्थयतः स्म यत् सत्काररूपेण गण्डपेण्डेरमिति आभूषणं प्रदाय सत्क्रियताम्। वनपर्त्तिराज्ञ्याः शङ्कराम्बायाः प्रार्थनया कार्यमपूडि राजमन्नारुकविः राजवंशरत्नावलेः पद्यानुवादं तेलुगुभाषया चकार। आन्ध्रानुवादसहितं संस्कृतमूलं क्रि.श. 1894 तमे वर्षे वनपर्तिस्थब्रह्मविद्या-विलासमुद्राक्षरशालायां प्राकाश्यं नीतम्।

वनपर्त्तिसंस्थानचरित्रम्

तेलुगुपद्यकाव्यमिदं रामेश्वररायस्य प्रार्थनया नेमलूरि वेङ्कटशास्त्री व्यरचयत्। काव्यमिदमसम्पूर्णम्।

कृष्णकविविरचिते वनपर्तिराजवंशवृक्षे वर्णितानां राज्ञां सूची

क्र.सं.	नाम	श्लोकसङ्ख्या
1.	मूलपुरुषः वीरकृष्णभूपः	6 श्लोकः
2.	तत्पुत्रः वेङ्कटकुमारगोपालरायः	7 श्लोकः
3.	तत्पुत्रः श्रीरामकृष्णः	8 श्लोकः
4.	तत्पुत्रः वेङ्कटभूपालः (इम्मडि वेङ्कटरेड्डिः)	9 श्लोकः
5.	तत्पुत्रः अष्टभाषाकविः बहिरी गोपालरायः	10,11 श्लोकौ
6.	तत्पुत्रः कुमार बहिरी गोपालरायः	12 श्लोकः
7.	तत्पुत्रः सवै वेङ्कटरेड्डी	12 श्लोकः
8.	तत्पुत्रः बहिरी गोपालरायः	13 श्लोकः
9.	तत्पुत्रः सवायि वेङ्कटभूपालः पत्नी जानमाम्बा	13, 14 श्लोकौ

In Public domain. Digitization Muthulakshmi Research Academy

10.	तत्पुत्रः गोपालरायः पत्नी जानमाम्बा	15, 16 श्लोकौ
11.	तत्पुत्रः रामकृष्णरायः पत्न्यौ नाञ्चारम्बा रामाम्बा	17-19 श्लोकाः
12.	तत्पुत्रः रामेश्वरः पत्न्यौ शङ्करम्बा जानम्मा	20,21रामेश्वरस्य सुरङ्गानिर्गमनवर्णनम् 22-39 शङ्कराम्बायाः औदार्यवर्णनम् 40,41 जानम्मावर्णनम्
13.	तत्पुत्रः रामकृष्णरायः पत्नी श्रीरामचन्द्राम्बा	42-46 श्लोकाः
14.	तत्पुत्रः श्रीरामेश्वररायः	47-54 श्लोकाः

वनपर्तिराजवंशवृक्षः

'वनपर्तिसंस्थानम् तेलुगुसाहित्यसेवा'(पिहेच् डि. सिद्धान्तग्रन्थः डॉ. ए. मोहनरेड्डिविरचितः) इति ग्रन्थस्याधारेण वनपर्तिराजवंशावलौ इतोधिकानि नामानि सन्ति। स्वल्पभेदा अपि सन्तीति अवधेयांशः अस्ति।

कार्तज्ञ्यसमर्पणम्

'राजवंशरत्नावली' इति होसदुर्ग कृष्णकविलघुकृतिं प्रदाय निस्तुलम् उपकृतवद्भ्यः विद्वद्भ्यः वैद्यं वेङ्कटेश्वराचार्युलुमहोदयेभ्यः सविनयं कार्त्तज्ञ्यं निवेदयामि।

वनपर्त्तिसंस्थानराजवंशजेषु अन्तिमस्य राजारामेश्वररायस्य दुहित्रा 'Orient Blackswan' इति प्रकाशनसंस्थायाः निर्वहणदायित्वं वहन्त्या नन्दिनीवर्यया आदिष्टः संस्थानकर्मकरः योगानन्दवर्यः वनपर्तिसंस्थानचरित्रम् आन्ध्रभाषानिलयरजतोत्सवसञ्चिकां अन्यानि चित्राणि च प्रदाय काव्यस्यास्य अवगमने सम्पादकीयलेखने च निस्तुलमुपकृतवान्। तस्मै कार्तज्ञ्यं निवेदयामि।

In Public domain. Digitization Muthulakshmi Research Academy

अनुसन्धानकर्मणि साहाय्यम् आचरते जोषि भरद्वाजाय अभिनन्दनानि वितरामि। प्रोत्साहवचनैरनिशं शोधकर्मणि मां नियुज्य ग्रन्थसम्पादनकर्म कारयद्भ्यः संस्कृत अकाडमीनिदेशकेभ्यः प्रा. के. नीलकण्ठ-महोदयेभ्यः कृतज्ञताम् आविष्करोमि।

इति बुधजनविनीता
डॉ. के. वरलक्ष्मीः
असोसियेट् प्रोफेसर (रिसेर्च)
संस्कृत अकाडमी उस्मानिया विश्वविद्यालयः हैदराबाद
श्रीक्रोधिनामसंवत्सरे दक्षिणायने शरदृतौ आश्विनमासे एकादश्यां कलियुगाब्दः 5125
13 मई क्रि.श. 2024

In Public domain. Digitization Muthulakshmi Research Academy

वृत्तविवरणसहिता श्लोकानुक्रमणिका

क्र.सं.	श्लोकपादः	वृत्तम्
1.	श्रीकरकृपामृताम्बुधि	आर्या गीतिः
2.	श्रितसमवनशीलं श्रीविहारानुकूलं	मालिनी
3.	ख्यातां यशस्सुरनदीं	गीतिः
4.	कामं संविदधातु	गीतिः
5.	कृष्णातटेऽस्ति	गीतिः
6.	तत्रासीन्निजविक्रम	गीतिः
7.	श्रीवीरकृष्णभूपादाविरभूद	गीतिः
8.	असदृशविभवस्तस्मात्प्रसवः	आर्या
9.	श्री रामकृष्णक्षितिपालमौलेर्वाराशितश्चन्द्र	इन्द्रवज्रा
10.	तस्मादुदारविभवो	वसन्ततिलका
11.	विहारन्कविवुर्यकाव्यलक्ष्म्या	गीतिः
12.	भूपात्कुमारबहिरीगोपालनृपालको	गीतिः
13.	बहुराजमौलिमान्यो	गीतिः
14.	अस्य प्रचण्डभुजमण्डलदीप्रतेजश्चण्डां	वसन्ततिलका
15.	गोपालरायनामा	गीतिः
16.	दारास्तस्यानवद्यात्मा	अनुष्टुप्
17.	स्मेराद्भुतकीर्तिनिधिः	आर्या
18.	सौशील्यगुणाम्बोधिर्देशममुं	आर्या
19.	सच्चारित्रप्रथितानाञ्चारम्बेत्यमुष्य	आर्या
20.	कर्तात्यद्भुतकर्मणां	शार्दूलविक्रीडितम्
21.	निर्गत्यशतृवर्गाद्दुर्गाद्योऽसौ	आर्या
22.	जायातस्यानवद्या	स्रग्धरा

In Public domain. Digitization Muthulakshmi Research Academy

23.	पात्रेनिक्षिप्यवित्तं	स्रग्धरा
24.	यत् क्लुप्तोऽत्यद्भुतश्रीर्जगति	स्रग्धरा
25.	कुल्याचतुष्टयभुजोऽभिविराजमान	वसन्ततिलका
26.	चत्वारोऽस्याः पूरुषार्थास्समृद्धा	शालिनी
27.	रामादिभिश्चतुर्भिश्श्रीमान्	आर्या
28.	नानागुणशालिश्रीसख्यं	आर्या
29.	निरुणद्धिकबन्धमयं	आर्या
30.	गङ्गायमुनाकपिला	आर्या
31.	सन्तुक्षोणितलेपरार्धम	शार्दूलविक्रीडितम्
32.	राजानश्शृणुताखिलामम	शार्दूलविक्रीडितम्
33.	सन्त्वन्येकिमुतैरदो	शार्दूलविक्रीडितम्
34.	चातुर्येविनयेन येरिपुजये	शार्दूलविक्रीडितम्
35.	यत्सिंहप्रतिमानदर्पविभवा	शार्दूलविक्रीडितम्
36.	आच श्रीरामसेतोरघतति	स्रग्धरा
37.	अस्यां वर्णित एष	शार्दूलविक्रीडितम्
38.	खगाधिपनगाधिपोत्तम	वसन्ततिलका
39.	कैङ्कर्यं शङ्कराम्बाकृतमनघतमं	स्रग्धरा
40.	अस्यास्सोदर्युदात्ताखिलगुणनिवहा	स्रग्धरा
41.	वरगुणमणिभूषा वारिताशेषदोषाकुल	मालिनी
42.	आसीच्छ्रीशङ्कराम्बातनुज	स्रग्धरा
43.	सकृदुदितमात्रमखिलं	आर्या
44.	विशदतमविपुलकीर्तिं	आर्या
45.	वर्णयितुमस्य सुगुणान्वाचो	आर्या
46.	ज्यायस्तरसुगुणगणा	आर्या
47.	श्रीरामेश्वररायस्स्फार	आर्या

In Public domain. Digitization Muthulakshmi Research Academy

48.	निजजनकसवित्र्याशङ्करम्बाख्यया	मालिनी
49.	षड्वष्युत्तरनवशतशेखरित	आर्या
50.	इदमेव रामकृष्णक्षितिपालो	आर्या
51.	एकाशीत्युत्तरनवशताधिक	आर्या
52.	अस्यातिशैशववशाद्राज्यं	आर्या
53.	सर्वेऽमीविक्रान्तास्सर्वे	आर्या
54.	जयतु जयतु नित्यं शङ्करम्बा	मालिनी
55.	चतुरधिकाशीत्युत्तरनवशतकाधिक	आर्या
56.	बहुनायकरमणीया	आर्या
57.	इति नूतनदुर्गपुरीकृष्णकवीन्द्रस्य	आर्या

In Public domain. Digitization Muthulakshmi Research Academy

राजा रामेश्वररायः (प्रथमः)

వనపర్తి, సంస్థానాధీశులు, శ్రీ. శ్రీ. మహా రాజా (ప్రథమ) రామేశ్వరరావు బహద్దరు.

Raja Rameshwar Rao II of Samsthan Wanaparthy. Hyderabad-Deccan.

राजा रामेश्वररायः (द्वितीयः)

In Public domain. Digitization Muthulakshmi Research Academy

వనపర్తి సంస్థానాధీశులు : శ్రీ శ్రీమదశ్వ రాజా రామేశ్వరరావు బహద్దూరు,
బహద్దూరులు, శ్రీ రాజా కృష్ణదేవ రాయులవారు, శ్రీ రాజా రామదేవ రాయులవారు.

राजारामेश्वरायः तृतीयः

In Public domain. Digitization Muthulakshmi Research Academy

॥ शुभमस्तु ॥

श्री हयग्रीवाय नमः

श्रीमते रामानुजाय नमः

राजवंशरत्नावलीप्रारम्भः

श्रीकरकृपामृताम्बुधिपरिवाहमतिप्रदानधौरेयाः ।
विदधतु हरेरपाङ्गाश्श्रेयो वनपर्तिराजराजानाम् ॥ 1 ॥

श्रितसमवनशीलं श्रीविहारानुकूलं
विधुशिशुकनिटालं विश्वलोकैकपालम् ।
कलयतु शुभजालं कालमेघातिनीलं
दनुजमथनलोलं धामकल्याणलीलम् ॥ 2 ॥

ख्यातां यशस्सुरनदीं स्फीतां लोकेषु शङ्करांबायाः ।
उत्तररङ्गेन्द्रकृपात्युत्तमघनपालिरुत्तरंगयतात् ॥ 3 ॥

कामं संविदधातु क्षेमं रामेश्वरेन्द्रभूनेतुः ।
जगदुज्जीवनहेतुर्निगमस्तुत एष विधरणस्सेतुः ॥ 4 ॥

कृष्णातटेऽस्ति काचिन्निष्णातजनौघरत्नखनिभूता ।
<u>सुगुरुनामनगरी</u> गरीयसी वीरनृपमृगेन्द्रदरी ॥ 5 ॥

तत्रासीन्निजविक्रमवित्रासितविविधवैरिनृपचेताः ।
मित्रानुरागवान् क्षितिसुत्रामा <u>वीरकृष्णभूप</u> इति ॥ 6 ॥

श्रीवीरकृष्णभूपादाविरभूदखिलभूपमान्यश्रीः ।
कूलङ्कषधी<u>र्वेङ्कटकुमारगोपालरायभूपालः</u> ॥ 7 ॥

असदृशविभवस्तस्मात्प्रसवः कल्पद्रुमादिव महीयान् ।
<u>श्रीरामकृष्णनामा</u> वीराग्रसरो बभूव भूनाथः ॥ 8 ॥

श्री रामकृष्णक्षितिपालमौलेर्वाराशितश्चन्द्र इवोदियाय ।
रत्नाकराणां प्रददत्समृद्धिं रम्यैः करै<u>र्वेङ्कटभूमिपालः</u> ॥ 9 ॥

In Public domain. Digitization Muthulakshmi Research Academy

तस्मादुदारविभवोऽभवदुष्टभाषा
विस्मापिताखिलमहाकविराजचेताः ।
गोपालराय इति विश्रुतरम्यकीर्तिः
क्ष्मापालमौलिमणिरुज्वलराजनीतिः ॥10 ॥

विहरन् कविवर्यकाव्यलक्ष्म्या प्रहरन् वैरिखगान् प्रतापदीप्त्या ।
अहरीशमधिक्षिपन्नवाप्नोद्बहिरीशब्दमयं जगत्यमुष्मिन् ॥ 11 ॥

भूपात्कुमारबहिरीगोपालनृपालकोऽजनिष्टास्मात् ।
जातोऽस्माद्वेङ्कटभूनेता भजति स्म यस्सवैबिरुदम् ॥ 12 ॥

बहुराजमौलिमान्यो बहिरीगोपालरायनामाऽस्मात् ।
जातस्तस्मादजनि ख्यातोऽथ सवायिवेङ्कटक्ष्मापः ॥ 13 ॥

अस्य प्रचण्डभुजमण्डलदीप्रतेज
श्चण्डां शुभाग्लपितवैरिचमूचयस्य ।
जायानुरूपमतिविक्रमवैभवासी
त्स्वाख्यानक्लृप्तविपणिः किल जानमाम्बा ॥ 14 ॥

गोपालरायनामा भूपालशिरोमणिस्तनूजोऽस्य ।
गोपायति स्म धरणीं पापानलकीलजालनवजलदः ॥ 15 ॥

दारास्तस्यानवद्यात्मास्फारानघगुणाम्बुधिः ।
सा राज्ञी जानमाम्बाभूद्या राष्ट्रेषु प्रशस्यते ॥ 16 ॥

स्मेराद्भुतकीर्तिनिधिः पारावारो गुणौघरत्नानाम् ।
श्रीरामकृष्णरायश्शूराणामग्रणीस्सुतोऽस्याभूत् ॥ 17 ॥

सौशील्यगुणाम्बोधिर्देशममुं देवमातृकं प्रायः ।
अकृतनदीमातृकमिव सुकृती यः किल तटाकवाप्याद्यैः ॥ 18 ॥

In Public domain. Digitization Muthulakshmi Research Academy

सच्चारित्रप्रथिता नाचारम्बेत्यमुष्य जायाद्या ।
रामामणिरन्यासीद्रामाम्बानाम रामकृष्णविभोः ॥ 19 ॥

कर्तात्यद्भुतकर्मणां रिपुततेर्हर्तातिधूर्तात्मनः
स्मर्ता शास्त्रततेरश्रितावलिस्समुद्धर्तापहर्तापदाम् ।
सीमातीतवदान्यतादिसुगुणश्श्रीमानुदञ्चद्यशा-
भूमिनेतुरतोऽजनिष्ट शुभधीरामेश्वरक्ष्मापतिः ॥ 20 ॥

निर्गत्य शतृवर्गाद्दुर्गाद्योऽसौ सुरङ्गयोपायात् ।
व्यतनोदनार्यशौर्यः प्रतिपक्षाणां महद्भयं भीमः ॥ 21 ॥

जाया तस्यानवद्या बुधनुतमहिमा राजनीतिप्रगल्भा
पातिव्रत्यैकसीमाश्रुतविविधपुराणेतिहासार्थतत्त्वा ।
ब्रह्मज्ञा सत्यवादिन्यतिविमलयशा निर्मितानेकसत्रा राज्ञी श्रीशङ्करराम्बा जगति
विजयते राजमूर्धन्यरत्नम् ॥ 22 ॥

पात्रे निक्षिप्य वित्तं धरणिसुरवरान् वृत्तिभिः प्रीणयित्वा कृत्वोद्यानानि
नानारघुतनयमुखादेव तास्स्थापयित्वा ।
सत्काव्यं कारयित्वा शुभतनयवती रामकृष्णक्षितीशा
कृत्वा नूत्नं तटाकं निरुपधिमयते सप्त सन्तानलक्ष्मीम् ॥ 23 ॥

यत् क्लृप्तोऽत्यद्भुतश्रीर्जगति विजयते शङ्कराम्बा समुद्रा
भिख्या विख्यातभूमाऽनिलवलिततरङ्गच्छटाकस्तटाकः ।
गम्भीरस्सुप्रसन्नश्श्रितजनवितितेर्जीवनं सम्प्रयच्छं
स्तां राज्ञीं शङ्कराम्बां भृशमनुविदधद्गाढरूढात्मसेतुः ॥ 24 ॥

कुल्याचतुष्टयभुजोऽभिविराजमान-
श्रीर्मत्स्यकूर्मविभवप्रथितप्रकर्षः ।
कुक्षावनन्तभुवनानि दधत्स एष
नारायणं तुलयति प्रकटं तटाकः ॥ 25 ॥

In Public domain. Digitization Muthulakshmi Research Academy

चत्वारोऽस्याः पूरुषार्थास्समृद्धा
एवं नित्यं भान्त्यविच्छिन्नपूराः ।
इत्थं राज्ञ्यास्सूचयन्वैभवं किं
तावत्कुल्यो भ्राजतेऽसौ तटाकः ॥ 26 ॥

रामादिभिश्चतुर्भिश्श्रीमान् दशरथ इवायमात्मभवैः ।
शुभशालिभूमिवैभवमभितनुते सारणीझरैर्नित्यम् ॥ 27 ॥

नानागुणशालिश्रीसख्यं भूम्या वितन्यते ह्यमुना ।
वनमालिना स्वकुल्या बाहुचतुष्टयसदापरीरम्भात् ॥ 28 ॥

निरुणद्धि कबन्धमयं श्रितजनताभ्यो ददात्यमृतमचिरात् ।
कथमभिरामाभिख्यां न वहेत तटाकराजोऽयम् ॥ 29 ॥

गङ्गायमुनाकपिलाकावेर्यस्सारणीत्वमवलम्ब्य ।
एनमिह शङ्कराम्बा समुद्रमात्माख्ययैव सेवन्ते ॥ 30 ॥

सन्तु क्षोणितले परार्धमवनीनाथाभिधाना वृथा
क्षोदीयो गुणलेशलेशविधुराः किं शङ्करम्बन्ति ते ।
क्वैषा दिक्पतिनूत्नरत्नमकुटीकोटीड्यभाग्योदया क्वान्ये
स्वस्थितिदेशकालविकलप्रख्यातयोऽनीतयः ॥ 31 ॥

राजानश्शृणुताखिला मम वचस्त्यक्त्वाभिमानं घनं
सम्प्राप्यान्याभिमानदूषितधियां श्रेयांसि भूयांसि किम् ।
यद्येतादृशभाग्यवत्त्वयशसः प्रेप्सास्ति वश्श्रीपतिं
सम्पूज्यात्र जनिं पुनश्च भजत श्रीशङ्कराम्बात्मना ॥ 32 ॥

सन्त्वन्ये किमुतैरदो नृपकुलेऽप्येतादृगासीत्पुमान्
स्त्री वा काचन धैर्यशौर्यविनयप्राग्भारविभ्राजिते ।
विख्याता बहवो रघोरभिजने सन्त्येव किं तेऽपि वा
सीताया गुणलेशतोऽप्यनुकृतिं कर्तुं क्षमेरन् क्वचित् ॥ 33 ॥

चातुर्ये विनयेन ये रिपुजये स्थैर्ये च शौर्ये तथौदार्ये
भक्तिविरक्तिशान्तिभगवत्कैङ्कर्यचर्यासु वा ।
एतादृङ्महिलास्विहान्तिमयुगे दृष्टा श्रुता वास्तु त
त्किं दृष्टः पुरुषेषु वानिशमितः कश्चिज्जनाश्शंसत ॥ 34 ॥

यत्सिंहप्रतिमानदर्पविभवा <u>तच्छिङ्गमाम्बेत्यसौ</u>
सन्दत्तां पितृधाम्नि नामकरणे सार्थां व्यधात्स्वाभिधाम् ।
अश्रान्तं कुरुते शमेव विपुलं यत्स्वाश्रितानां ततो भर्त्रास्थानजनैरसौ
व्यवहृता <u>श्रीशङ्कराम्बाख्यया</u> ॥ 35 ॥

आच श्रीरामसेतोरघततिहरणादाबदर्याश्रमान्ता
त्स्नात्वा तीर्थेषु नारायणमनघगुणं दिव्यदेशेषु नत्वा ।
सर्वं कालं रहस्यत्रयविवरणसत्सम्प्रदायामृताना
मास्वादेन क्षिपन्ती जयति हरिपदाम्भोजयुग्मप्रपन्ना ॥ 36 ॥

अस्यां वर्णित एष सद्गुणगणो नारोपितः कश्चन
क्ष्मापाला इतरे निशम्य तदिदं हृष्यन्तु रुष्यन्तु वा ।
दिङ्मात्रं समुदाहृतं यदि पुनस्सर्वं ब्रुवे विस्तरात्
पर्याप्तिर्हृदि मे भवेत्कथमिव क्ष्मापास्स्युरित्युद्विजे ॥ 37 ॥

खगाधिपनगाधिपोत्तमशिरस्थलप्रोल्लसन्
महोच्चमकुटीनिभं खलु तयैव निर्मापितम् ।
ध्वनद्धुधवधूपदाम्बुजयुगोच्चलन्नूपुरं
चकास्ति किल रङ्गभूरमणसद्मनो गोपुरम् ॥ 38 ॥

कैङ्कर्यं शङ्कराम्बाकृतमनघतमं वीक्ष्य हर्षातिरेक
स्तब्धाङ्गाः केशवाद्यास्सरसिजनयनव्यूहमूर्तिप्रभेदाः ।
ख्याताभूतादिमास्ते गुरुवरनिवहाश्चापि शिल्पीन्द्रक्लृप्त
प्रौढाकारोपलोद्यत्प्रतिकृतिनिभतो गोपुरे भान्त्यमुष्मिन् ॥ 39 ॥

In Public domain. Digitization Muthulakshmi Research Academy

अस्यास्सोदर्युदात्ताखिलगुणनिवहा सैव तस्यास्सपत्नी
जनक्यम्बाभिधाना प्रथितिमुपगता जानमाम्बेति लोके ।
प्राज्ञी राज्ञी चकास्ति क्षितिपतिललनामौलिसंश्लाघ्य शीला
भक्तिज्ञानातिहृद्या नयविनयनिधिस्सर्वविद्यानिषद्या ॥ 40 ॥

वरगुणमणिभूषा वारिताशेषदोषाकुल-
समुचितवेषाकुण्ठिताभीलरोषा ।
विदितनिखिलभाषा विश्वविख्यातयोषा
मणिमकुटविभूषा जानमाम्बाभिधैषा ॥ 41 ॥

आसीच्छ्रीशङ्करम्बातनुज इह धरामण्डलीमण्डनश्री-
मेधाव्याधूतदेवाधिपगुरुधिषणो बाल्य एवातिमात्रम् ।
हूणेन्द्रास्थानसीमामिलितनिखिलभूपालकोटीरकोटी-
वाटीव्यालोलनश्रीः क्षितिपतितिलको रामकृष्णाभिधानः ॥ 42 ॥

सकृदुदितमात्रमखिलं शास्त्रं गृह्णाति वदति च यथोक्तम् ।
श्री रामकृष्णनृपतेरन्यः को नाम बाल एव भुवि ॥ 43 ॥

विशदतमविपुलकीर्तिर्दशवत्सरविदितनिखिललिपिभाषः ।
योऽश्लाघि निखिलभूपैः प्राप्य सभां हूणसार्वभौमस्य ॥ 44 ॥

वर्णयितुमस्य सुगुणान्वाचो मन्दीभवन्ति यदमुष्य ।
अभिमन्योरिव शैशव एवायुर्ह्रीनतामगात्कष्टम् ॥ 45 ॥

ज्यायस्तरसुगुणगणा जायास्ति हि रामकृष्णरायस्य ।
श्रीरामचन्द्रभक्त्या सान्द्रा श्रीरामचन्द्राम्बा ॥ 46 ॥

श्रीरामेश्वररायस्स्फारश्रीरामकृष्णरायसुतः ।
पैतामहनाम्नैव ख्यातात्मा राजबालको लसति ॥ 47 ॥

निजजनकसवित्र्या शङ्कराम्बाख्यया यं विततसकलभोगैर्लालितो बाल एव ।
तदुपगमितसत्तस्तत्कृपावाप्तराज्यो जयति जगति राज्ञां मूर्ध्नि रामेश्वरेन्द्रः ॥48

In Public domain. Digitization Muthulakshmi Research Academy

षड्वष्ट्युत्तरनवशतशेखरितचतुस्सहस्रसङ्ख्येषु ।
कलिवर्षेषु गतेषु प्राप्तं श्रीशङ्कराम्बया राज्यम् ॥ 49 ॥

इदमेव रामकृष्णक्षितिपालोत्तंसराज्यभारदिनम् ।
बाल्यादमुष्य सैषा स्वयमेव बभार सकलराज्यधुराम् ॥ 50 ॥

एकाशीत्युत्तरनवशताधिकचतुस्सहस्रकलिवर्षेषु ।
यातेषु विक्रमाब्दे रामेश्वरराय एष राज्यं प्रापत् ॥ 51 ॥

अस्यातिशैशववशाद्राज्यं श्रीशङ्कराम्बयैवेदम् ।
वनपर्तिनृपालानां निरुह्यतेऽद्यापि पौत्रकृतदयया ॥ 52 ॥

सर्वेऽमी विक्रान्तास्सर्वे श्रीरङ्गनाथदास्यधनाः ।
सर्वे धर्मप्रवणास्सर्वे कुशलाः कुलेऽत्र भूपालाः ॥ 53 ॥

जयतु जयतु नित्यं शङ्कराम्बा वदान्या जयतु जगति पौत्रो वीररामेश्वरोऽस्याः ।
जयतु परममुष्या धर्मसेतुः प्रक्लृप्तो जयतु गरुढभूभृत्प्राङ्गणे रङ्गनाथः ॥ 54 ॥

चतुरधिकाशीत्युत्तरनवशतकाधिकचतुस्सहस्रमिते ।
कलिवर्षगणे याते ग्रथितेयं राजवंशरत्नावली ॥ 55 ॥

बहुनायकरमणी या जयताद्युगपत्समस्तदिक्सुदृशाम् ।
कण्ठमलङ्कुर्वाणाऽगुप्तगुणा राजवंशरत्नावली ॥ 56 ॥

इति नूतनदुर्गपुरीकृष्णकवीन्द्रस्य कृतिषु ललितासु ।
विदधातु सप्तविंशी कृतिरेषा रङ्गनाथहृत्प्रीतिम् ॥ 57 ॥

इति श्री मच्छ्रीशैलकुलतिलकश्रीम
त्प्रत्यग्रदुर्गतातार्यवर्यनन्दनस्य
श्रीकृष्णकविसार्वभौमस्य कृतिषु
राजवंशरत्नावलिर्नाम प्रबन्धस्सप्तविंशः ॥

******

In Public domain. Digitization Muthulakshmi Research Academy

ISBN - 978-81-969575-0-6
In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडम्या मुद्रितानि चम्पूकाव्यानि

1) श्रीवरदाभ्युदयचम्पूः
2) रामकृष्णयुधिष्ठिरचरितचम्पूः
3) जगन्नाथचम्पूः
4) श्रीवेङ्कटेश्वरचम्पूप्रबन्धः
5) युधिष्ठिराश्वमेधचम्पूः
6) नलचम्पूः (तेलुगु व्याख्या सहिता)
7) प्रणयवतीचम्पूः
8) रघुनाथविजयचम्पूः
9) श्रीनिवासविलासचम्पूः
10) कार्तिकोत्सवदीपिका
11) राजरत्नमालाचम्पूः
12) रामेश्वरविजयचम्पूप्रबन्धः

संस्कृत अकाडमी

(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शसंस्कृतशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07

2024